This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रुतिमस्तिरप्रतिबन्धायाः प्राप्तिस्तदर्थं वृत्तिरारस्यत इतीयोजना॥ एतदुक्तं भवति। सनिदा
नानर्थनिवृत्तिः शास्त्रस्य प्रयोजनं ब्रह्मात्मैक्यविद्या तदुपायः तदैक्यं विषयः॥ संबंधो
ज्ञानफलयोरुपायोपेयत्वं॥ शास्त्रतद्विषययोर्विषयविषयिभावस्त्वंलदारस्पं शास्त्र
मिति॥ प्रयोजनादिषु प्रवृत्त्यंगतयोक्तेष्वपि सर्वेषां पाराणां प्रयोजनार्थत्वात्तस्य प्रा
धान्यं। उक्तं हि सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्॥ यावत्प्रयोजनं नोक्तं ता
वत्तत्केन गृह्यतामिति॥ तथा च शास्त्रारंभोपयिकं प्रयोजनमेव नाम व्युत्पादनद्वारा व्युत्पा
दयति सेयमिति॥ अध्यात्मशास्त्रेषु प्रसिद्धास्त्रलिहिताचात्र ब्रह्मात्मैक्यविद्यानन्तिमिष्टा
नां सर्वकर्मसंन्यासिनां सनिदानस्य संसारस्यात्यंतनाशकत्वात्स्वरूपनिषच्छब्दवाच्या।
उपनिषदं सोब्रूलीत्याद्या च श्रुतिः॥ तस्मादुपनिषच्छब्दवाच्यत्वप्रसिद्धेर्विद्यायास्ततो यथो
क्तफलसिद्धिरित्यर्थः॥ कथं तस्याः स्वछब्दवाच्यत्वेप्येतावानर्थो लभ्यते तत्राह॥ उपनि

K K S U LIBRARY
RAMTEK
441 106
M.1495
Dist. Nagpur

Acc. No. ~~2494~~ M.1495
Title - बृहदारण्यकभाष्यतात्पर्यटीका.
Author - आनन्दज्ञान.
Date - ?
Subject - Vedanta.
folio - 151 (first two folio missing)
Xerox - 302.

Checked 2012

सर्वस्येति अस्यार्थः षद्लृ विसरणगत्यवसादनेष्विति स्मर्यते। सदेर्धातोरुपनिपूर्वस्य क्वि
बंतस्य सहेतुसंसारनिवर्त्तकब्रह्मविद्यार्थकत्वादुपनिषच्छब्दवाच्या सा भवत्युक्तफल
वती उपशब्दो हि सामीप्यमाह तत्रासतिसंकोचके प्रतीतिविपर्ययवस्यति॥ निशब्दस्यैनि श्रा २
श्चयार्थः। तस्मादेकात्म्यं। निश्चितां तद्विद्यां सहेतुसंसारं सादयतीत्युपनिषदुच्यते॥
उक्तं हि। अवसादनार्थस्यावसादादिति॥ ब्रह्मविद्यैव चेदुपनिषदिष्यते कथं तर्हि ग्रं
थे वृत्तास्तच्छब्दप्रयुज्यते। न खल्वेकस्य शब्दस्यानेकार्थत्वं न्याय्यमित्याशंक्याह तादर्थ्यादिति।
ग्रंथस्य ब्रह्मविद्याजनकत्वादुपचारात्तत्रोपनिषदेत्येमित्यर्थः। यथोक्तविद्याजनकत्वे ग्रंथ
स्य कृतिमिति तदध्येतॄणां सर्वेषां विद्याभवती सांगश्रवणादिपराणामेवारण्यानुव २
चनादिनियमाधितास्त्ररेफस्तज्ञस्येति बृहदारण्यकनामनिर्वचनपूर्वकमाह सेयमि।
अथारण्यानुवचनादिनियमाधीतवेदांतानामपि केषांचिद्विद्यानुपलंभात्कुतो यथो

त्वाक्षरेभ्यस्तदुत्पत्तिरित्यत आह बृहत्वादिति। उपनिषदंतरेभ्यो ग्रंथपरिमाणातिरेकादस्य
बृहत्वं प्रसिद्धं॥ अर्थतोपि तदस्ति ब्रह्मणोखंडैकरसस्यात्र प्रतिपाद्यत्वात्तद्ज्ञानहेतू
नां चांतरंगबहिरंगाणां कारूयसामिह प्रतिपादनादिति बृहत्वादारण्यकत्वाच्च बृहदारण्य
कं॥ ननैतद्मुमुक्षुबुद्धेरधीतमपि विद्यामारभ्याति कषाये कर्मभिः पक्केततोज्ञानमिति स्मृते
रित्यर्थः ज्ञानकांडस्याविशिष्टाधिकार्यादि वैशिष्ट्येपि कर्मकांडेन नियतपूर्वापरत्वानु
पपत्तिस्त्वेले संबंधो वक्तव्यः सच परिशिष्टविप्रतिपत्तेरनेकोविशेषतो ज्ञातुमिसा
त्रां कथमाह॥ तस्येति। प्रतिज्ञातसंबंधं प्रकटयितुमसिद्धप्रमाणभावानां वेदांतानां। संबं
धाभिधानावसराभावात्॥ तत्प्रामाण्यं प्रतिपाद्य पश्चात्तेषां कर्मकांडेन संबंधविशे
षवचनमुचितमिति मन्वानस्तत्प्रामाण्यं साधयति सर्वोपीति। प्रत्यक्षानुमानाभ्या
मित्यागमातिरिक्तप्रमाणोपलक्षणार्थं। एषोर्थोध्ययनविध्युपात्तः सर्वोपि कांडद्वया

13

हृ· आ· २

त्मको वेदो मानांतरानधिगतं यदिष्टोपायादि तज्ज्ञापनपरः तथा चाज्ञातज्ञापकत्वाद्विशे
षात्प्रामाण्यं कांडयोरिति। अथवा वेदनं वेदोऽनुभवः स च शब्देतरमानयोग्यो रूपा
दिहीनत्वादेतदप्रमेयमिति हि श्रुतिः स चेष्टानिष्टप्राप्तिपरिहारोपायः तस्यैव तत्तदा
त्मनावस्थानात्स च सच्चाभवदित्यादिश्रुतेः स च प्रकाशानः सर्वप्रकाशकत्वात्तमेव
भांतमनुभाति सर्वमिति श्रुतेः स च परो विघातत्कार्यातीतत्वात् विरजः पर आका
शादित्यादिश्रुतेः एवंरूपो वेदपदवेदनीयश्चिदेकरसः प्रसग धातुरेव सर्वोपि कार्य
करणात्मकः प्रपंचः आत्मैवेदं सर्वमिति श्रुतेः तथा च। यथोक्तं वस्तु प्रकाशयंतो वे
दांता विधिवाक्यवत्प्रमाणमिति। अथवा प्रत्यक्षादिनाऽनवगतो योऽसाविष्टप्रा
प्त्याकृपायो ब्रह्मात्मा तस्य प्रकाशनपरः सर्वोप्ययं वेदः तस्यैवाज्ञाततत्वात्तत्र कर्मकां
डं कर्मानुष्ठानप्रयुक्तबुद्धिशुद्धिद्वारा ब्रह्माधिगतावारादुपकारकं विविदिषंतिय

४

३८

तेनेतिश्रुतेः ज्ञानकांडं तु साक्षादेव तन्नोपयुक्तं परमपुरुषस्योपनिषदत्वश्रवणात्। सर्वे
वेदा यत्पदमामनंतीति च श्रुतेः तद्युक्तं कर्मकांडवत् ज्ञानकांडस्यापि प्रामाण्यं इति॥
अधिकारिसौलभ्यप्रतिपादनद्वारा ज्ञानकांडप्रामाण्यमेव स्फुटयति सर्वपुरुषा
णामिति। अयमर्थः। सुखं मे स्यात् दुःखं मा भूत् इति स्वभावतः शास्त्रं विना सर्वेषां पु
रुषाणामनवच्छिन्नसुखादिमात्रेऽभिलाषोपलंभात् तन्मात्रस्य च मोक्षत्वात् तत्का
मिनो ज्ञानकांडाधिकारिणः सुलभत्वात् तस्मिन् प्रमांस्वार्थविषयामादधत् कथं
तदप्रामाण्यमिति। ननु वेदस्य कार्यपरतया प्रामाण्यात् कर्मकांडवत् कांडांतरस्यापि
कार्यपरतया प्रामाण्यमेष्टव्यमिति नेत्याह दृष्टविषयेति। क्रियाकारकफलकर्तव्यता
नामन्यतमे तस्मिन्कार्ये समीहितप्राप्त्याद्युपायकृते व्युत्पत्तिकाले प्रत्यक्षादिसिद्धेः
तथाविधकार्यधियोऽन्यथालब्धत्वात् तत्र नागमोऽनुसंधेयः नहि लोकवेदयोस्त

क्रियते अलौकिके तस्मिन्नव्युत्पत्तिप्रसंगान्न चाव्युत्पन्नानि पदानि बोधकानीति प्रसंगात्
। न च ब्रह्मण्यपि तुल्याव्युत्पत्त्यनुपपत्तिः तस्मिन्न ब्रह्मत्वेनात्मत्वेन च प्रतिसिद्धेन त।
सामान्योपायो विज्ञानादिपदानां व्युत्पत्तेः सुकरत्वात् तानि चालौकिकमखंडं प्रत्यग्ब्र
ह्मनिर्लुप्तसामान्यविशेषं लक्षणया बोधयंति तस्माद्ब्रह्मैव वेदप्रमाणकं न कार्य
मिति तावत्। किंच तिष्ठतु वेदांतप्रामाण्यं कर्मकांडेऽपि व्यतिरिक्तात्मास्तित्वादौ सिद्धे
र्थे प्रामाण्यमावश्यकं। तदभावे तत्प्रामाण्यायोगात्। न हि भविष्यद्देहसंबंध्यात्म
सद्भावानधिगमे पारलौकिके फलविश्वासः तस्मात्कर्मकांडप्रामाण्यमिच्छता सिद्धेर्थे
भविष्यद्देहसंबंधिन्यात्मनि स्वर्गादौ च तत्प्रामाण्यस्याभ्युपेयत्वात् कार्ये चेदप्रा
माण्यानियमाद्वेदांतानामपि स्वार्थे मानत्वं सिध्यतीत्याह न चेति। ननु वेदांतशास्त्र
ज्ञानं विनापि विधिवशाददृष्टार्थक्रियासु प्रवृत्तिः स्यात् इति नेत्याह स्वभावेति। वेदा

त्मा देहांतरसंबंधी। शास्त्रान्मानांतराच्च न प्रमितश्चेत्तदा भोक्तुरनवगमात् न प्रेक्षापूर्व
कारी याद्यनुतिष्ठेत्। लोकायतस्य व्यतिरिक्तात्मास्तित्वमज्ञानतो जन्मांतरेष्टानिष्टा
प्तिहानीच्छया वैदिकक्रियास्वप्रवृत्तेर्दर्शनादतो नातिरिक्तात्मज्ञानं विना सांपरायिके
प्रवृत्तिरित्यर्थः। ननु विधयः साधनविशेषं बोधयंतो नातिरिक्तात्मास्तित्वादौ मानं वा
क्यभेदप्रसंगादित्यत आह तस्मादिति। अतिरिक्तात्मधियं विना पारलौकिकप्र
वृत्त्यनुपपत्त्या कर्मकांडप्रामाण्यायोगादिति यावत्। विधीनां प्रमुख्यार्थस्यामुष्मा
र्थत्वमविरुद्धमित्यर्थः। न केवलं विधिभिरेवार्थादाक्षिप्तं अतिरिक्तात्मास्तित्वं
किंतु श्रुत्यापि स्वमुखेनोक्तमित्याह येयमिति। निर्णयदर्शनाद्व्यतिरिक्तात्मास्ति
त्वमिति संबंधः। तत्रैव प्रकृतोपयोगित्वेनोपक्रमोपसंहारांतरे दर्शयति यथेति। प्र
दैर्ववदेवसंबंधद्योतनायं चकारः उपक्रमोपसंहारैकरूप्यात् कठवल्लीनामतिरि

ह·आ·३

क्तात्मास्तित्वे तात्पर्यमुक्त्वा बृहदारण्यकवाक्यस्यापि तत्र तात्पर्यमाहास्वयमिति। न हि प्रसिद्धजडत्वस्य देहादेः स्वयंज्योतिष्ट्वमिति ज्योतिर्ब्राह्मणगतोपक्रमस्तद्विषयो देहादिव्यतिरिक्तात्मानमधिकरोति संप्रेतं विद्याकर्मणी पूर्वोपार्जिते फलदानायानुगच्छतः स च गत्वा स्वानुकर्मानुगुणं फलमनुभवतीति शारीरकब्राह्मणगतोपसंहारोपि जन्मांतरसंबंधविषयो न चात्रैव तस्मिन्भवतो देहादेर्जन्मांतरसंबंधयोगः तेनात्मा देहादिव्यतिरिक्तो जन्मांतरसंबंधासिद्धेः ब्राह्मणस्यापि तात्पर्यः॥ अजातशत्रुब्राह्मणेप्येव त्वा ज्ञपयिष्यामीत्युपक्रमो व्यतिरिक्तात्मास्तित्वविषयो न हि प्रसुप्ते देहादौ जिज्ञासास्ति तत्रैवोपसंहारे य एष विज्ञानमयः पुरुष इति विज्ञानमयविशेषणादतिरिक्तात्मास्तित्वं दर्शितं न हि देहादेर्विज्ञानमयत्वमस्ति तस्मात्तदुपक्रमोपसंहाराभ्यां व्यतिरिक्तात्मास्तित्वं गमयती साहं ज्ञपयिष्यामीत्युपक्रम्येति। न चोद

६

हलानां वाक्यानामप्रामाण्यं तत्प्रामाण्यस्योत्पत्तिकसूत्रे हेत्वविशेषादभ्युपेयतादितिभा
वः। यथोक्तात्मन्यहंप्रत्ययोमानं तत्र देहाद्याकारास्फुरणादतिरिक्तात्मास्तित्वस्य तेनैव
स्फुर्तेनुपपत्तेरतो न तत्र श्रुतिप्रामाण्यमिति शंकते तत्र सत्वेति। प्रत्यक्षस्वविष
योवकाशो यस्मिन्निति अतिरिक्तात्मास्तित्वमुच्यते। यद्यप्यतिरिक्तात्मास्तित्वं तद
पि प्रायेणाहंधीगोचरस्तथापि न साव्यतिरेकमात्मनो गोचरयति। युक्त्यागमविवे
कशून्यानामहंप्रत्ययस्याजांव्यतिरेकप्रत्ययप्राप्तौ विपश्चितां विप्रतिपत्त्यसंभाव
प्रसंगात् रतिपरिहरतिँनवा ~ तिवेदप्रतिकूलावादिनो नास्तिकानैव विवादं मु
चंतीत्याह नहीति। तेषु प्रातिकूल्पसंभावनार्थविशेषणं नेत्यादि इति च दंतः सं
तोनोस्माकं प्रतिकूला न हि स्युः एवं वदनस्यैवासंभवादध्यक्षविरोधादिति योजना।
प्रत्यक्षे विषये विप्रतिपत्त्यभावे दृष्टांतमाह नहीति। तमव्यभिचारं शंकते। स्यादेवा

9

दाविति। प्रत्यक्षे धर्मिणि स्थाणुर्वा पुरुषो वेति विप्रतिपत्ते रुपलंभान्न प्रत्यक्षे विप्रतिप
त्यभावोऽस्ति चायदिति त्वं कार्थी॥ आदिपदेन पाषाणादौ गजादिविप्रतिपत्तिः संग
ह्यते॥ किं प्रत्यक्षमात्रे विप्रतिपत्तिः किंवा तेन विविक्ते प्रतिपत्ते नाद्यः अंगीकारात्
नचैवमात्मनि प्रत्यक्षे विप्रतिपत्तावपि नागमान्वेषणा तेनैव तन्निरासे तन्निर्णाया
दिति मत्वा नो द्वितीयं दूषयति नेत्यादिना॥ प्रत्यक्षतो विविक्तेर्थे विप्रतिपत्त्यभावं
प्रपंचयति महीति। आत्मनः स्थूलदेहे व्यतिरिक्तत्वं न प्रत्यक्षमिति प्रतिपाद्य सूक्ष्म
देहव्यतिरिक्तत्वमपि नाहंप्रत्ययग्राह्यमित्याह वैनाशिकास्त्विति। ते खल्वहमिति
धियमनुभवंति तथापि देहांतरं स्थूलदेहातिरिक्तं सूक्ष्मं तत्प्रधानतया बुद्धेर
तिरिक्तस्यात्मनो नास्तित्वमेव प्रनूपंति तन्नाहंधिया सूक्ष्मदेहातिरिक्तात्मास्ति
द्धिरित्यर्थः। किंच प्रत्यक्षस्य विषयो रूपादिस्तद्राहित्यं तद्वैलक्षण्यं तदात्मनोऽस्ति ७

अशब्दमस्पर्शमरूपमित्यादिश्रुतेः नहि रूपादितदाधारं चाविनाप्रत्यक्षं क्रमतितो नदेह
व्यतिरिक्तात्मास्तित्वस्य प्रत्यक्षात्सिद्धिरिति स्यात् तस्मादिति। प्रत्यक्षतो विविक्ते विप्र
तिपन्नयोगात्प्रकृतेन तद्दर्शनादिति यावत्। अथेच्छादयः क्वचिदाश्रिता गुणत्वात्
रूपादिवत् इत्यनुमानादतिरिक्तात्मसिद्धिरिति नेत्याह। तथेति नात्मास्तित्वप्रसि
द्धिरिति संबंधार्थस्तथाशब्दः॥ अयंभावः इच्छादीनां स्वातंत्र्ये स्वरूपासिद्धिः पारतं
नुग त्र्ये परस्य रायत्वं आधारस्येदानीमेव साध्यमानत्वात् क्वचिच्छब्देनाश्रयमात्रवत्त्व
ने सिद्धसाधनत्वं मनसस्तदाश्रयस्य सिद्धत्वात् आत्मोक्तौ च दृष्टांतस्य साध्यविक
लतेति यः प्राणेन प्राणितीत्यादिश्रुत्या प्राणनादिव्यापारत्वस्य लिंगस्यात्मनिद
र्शितस्य चव्याप्तिसापेक्षस्य प्रत्यक्षादिसिद्धात्मविषयत्वात् न तस्य शब्दैकगम्य
तेति शंकते श्रुत्येति। आत्मनः स्वातंत्र्योपात्लिंगगम्यत्वाप्तिप्रायेण श्रुत्या लिंगं नोप

दृ· आ· २

क

न्यस्त्वमिति परिहरति नेति। योचेतनव्यापारः सचेतनाधिष्ठानपूर्वको यथा रथादि
व्यापारः प्राणनादिव्यापारंस्याप्यचेतनव्यापारत्वात् चेतनाधिष्ठानपूर्वकत्वमिति सं
भावनामात्रेण लिंगोपन्यासो नहि निश्चायकत्वेन तदुपन्यस्यते। आत्मनो जन्मांत
रसंबंधस्य प्रमाणांतरेणाग्रहणात् तद्व्याप्तलिंगायोगादित्याह। जन्मांतरेति।
ननु व्यतिरिक्तात्मास्तित्वमागमैकगम्यं चेत्कथंतस्य समनुमेयं चेतिवादिनो त
वदंति तत्राह॥ आगमेनान्विति। येयं प्रेते विचिकित्सेत्याद्यागमेन को ह्येवान्यात्
इत्यादिवेदोक्तेश्च प्राणनादिभिर्लौकिकैर्लिंगविशेषैरात्मास्तित्वे सिद्धे यथोक्तामा
त्मसिद्धिमनुसरंतो वादिनो वैदिकमेवाहंप्रत्ययं प्रतिलभमाना वैदिकान्येवालिं
गानि पश्यंतः स्वोत्प्रेक्षानिर्मितानि तानीति कल्पयंतो द्विविधात्मानं वदंति वस्तुत ८
स्त्वात्मा यथोक्तस्तुलैकसमधिगम्य इत्यर्थः॥ तस्यास्येत्यादिना कंडयोः संबंधं प्रतिता

यत्तादर्थ्येन सिद्धेर्वेदांतप्रामाण्यं सर्वोपासनादिना प्रसाध्याधुना कर्मभिः शुद्धबुद्धेर्वैराग्या
दिज्ञानोत्पत्तिरिति तयोः संबंधं कथयति सर्वथापीति। आगमान्तानां तदाद्यव्यतिरि
क्तानामास्तित्वप्रतिपत्तावपीत्यर्थः। पुमर्थोपायविशेषार्थिनोस्ततत्त्वापनार्थकर्मकांडमा
रब्धं चेत्तर्हि तेनोक्तकर्मभिरेव विवक्षितपुमर्थसिद्धेर्वेदांतारंभवैयर्थ्यात् न संबं
धोस्ति। सावकाशोस्यान्तं क्याह नत्विति। आत्माज्ञानं खल्वनर्थकारणमन्वयव्यतिरेक
त्राक्ष्यगम्यं मिथ्याज्ञानकार्यलिंगकं च नत्वाकर्त्रभोक्तृब्रह्मात्मज्ञानादपनेयं न हित
त्कर्मकांडोक्तैरेव कर्मभिः शक्यमपनेतुं विरोधाभावात्तस्मात्तद्धानार्थं ज्ञानासिद्ध्यै वे
दांतारंभसंभवात् उक्तसंबंधसिद्धिरित्यर्थः। यदि कर्मभिरज्ञानं न निवर्त्तते। मा निव
र्त्तिष्ट। सत्येव तस्मिन् कर्मबलात् मोक्षः स्यादित्याशंक्याह। यावद्धीति। सम्यक् ज्ञानमेव
साक्षान्मोक्षहेतुर्न कर्म तत्तु मनायाज्ज्ञातदुपयोगि न हि सत्येवाज्ञाने मुक्तिस्तस्मिन्स

ति संसारस्य दुर्वारत्वात्। तस्मात्कर्मकांडस्य वैराग्यद्वारा प्रवेशो मुक्ताविति भावः। अयमित्यस्तो निर्दिश्यते रागद्वेषादीत्यादिशब्देनाविद्यास्मिताभिनिवेशादयो गृह्यंते दोषाणां स्वाभाविकत्वं शास्त्रानपेक्षत्वं। अपिकारः संभावनार्थः दृष्टत्वमन्वयव्यतिरेकसिद्धत्वं अदृष्टत्वं शास्त्रमात्रगम्यत्वं। अधर्मोपचयप्राचुर्ये हेतुमाह स्वाभाविकेति॥ अथ वैराग्यार्थं कर्मफलं प्रपंचयन् धर्मफलमाह तत्र रतीति। उक्तं हि। शारीरजैः कर्मदोषैर्याति स्थावरतां नरः इति। तत्किं पुण्योपचयाभावादनवक्त्रां स्वर्गादिफलमिति नेत्याह। कदाचिदिति॥ शास्त्रीयसंस्कारस्य बलीयस्त्वे फलितमाह तत्र रतिः आदिशब्दो वाग्देहविषयः। फलविभागं वक्तुं कर्मभिन्नत्ति तद्विविधमिति। तस्य मुक्तिफलत्वं निरसितुं फलं विभजते तत्रेति। केवलमिष्टादिकर्मेति शेषः। कर्मप्रापितलोक इति हि वक्ष्यति॥ तस्मिन् फले नानात्वमभिप्रेत्यादिशब्दः। विद्यया देवलो ९

14

कइति श्रुतिमाश्रित्याह ज्ञानेति। तं देवलोका यस्यादिर्ब्रह्मलोकश्चांतो यस्य तस्यार्थस्य
प्राप्तिरेव फलमस्येति विग्रहः। उक्तेऽर्थे न्नातपथी श्रुतिं प्रमाणयति तथा चेति। सर्वत्र पर
मात्मभावनापुरःसरं नित्यं कर्मानुतिष्ठन्नात्मयाजी॥ कामनापुरःसरं देवान्यजमानो
देवयाजी॥ तयोर्मध्ये कतरः श्रेयानिति विचारेस्तात्मयाजी श्रेयानिति निर्णयः कृतोऽ
तोऽज्ञानपूर्वं कर्म देवलोकस्य कामनापूर्वं पितृलोकस्य प्रापकमित्यर्थः॥ प्रवृत्तं च निवृ
त्तं च द्विविधं कर्म वैदिकं॥ इह वामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते। निष्कामं ज्ञानपूर्वं
तु निवृत्तमभिधीयते इत्यादिमनुस्मृतिं चात्रैवोदाहरति॥ स्मृतिश्चेति। धर्माधर्मयो
रेकैकस्य फलमुक्त्वा मिश्रयोः फलमाह साम्येति। उक्तं हि। उभाभ्यां पुण्यपापाभ्यां मानु
षं लभतेऽवशः इति त्रिविधमपि कर्मफलं वैराग्यार्थं संक्षिप्योपसंहरति। एवमिति। सा
चाविद्याकृतत्वात्। अनर्थरूपेत्याह स्वाभाविकेति। विचित्रकर्मजन्यतया तस्या वैचि

15

हृ·आ·२

न्यमाह धर्माधर्मेति। तर्हि धर्माधर्माभ्यामेव तन्निर्माणसंभवात् कृतमविद्ययेत्यत आह।
नामेति। तेषां सूक्ष्मावस्थाऽविद्या तदालंबनेति पावृत्त॥ धर्मादेरविद्यायाश्च निमित्त
त्वोपादानत्वाभ्यामुपयोग इति भावः ननु संसारगतेराविद्यत्वमयुक्तं प्रत्यक्षादिप्रति
पन्नत्वात्तन्नामरूपाभ्यामेव व्याक्रियतेति श्रुतौ च नामरूपात्मनो जगतोऽभिव्यक्ति
श्रवणात्। न च प्रामाणिकस्याविद्याकृतत्वमत आह। तदेवेदमिति। जगतः सद्रूप
मात्मा तत्राध्यस्तत्वात् आत्मतत्त्वे नाभिव्यक्ते प्रत्यक्षादिनाश्रुत्वाच्चाभिव्यक्तमिवदृ
श्यमानमपि जगदनभिव्यक्तमेवेति न तस्याविद्याकृतत्वक्षतिरिति भावः। अविद्या
कृतां संसारगतिमनुभाषते संसरति। अविद्याकृतत्वे कथमनादित्वमित्याशंक्य
तस्य प्रवाहरूपेणेत्याह॥ बीजांकुरादिवदिति तर्हि कादाचित्कतया साधनापेक्षामं
तरेणानाशो भविष्यतीत्याशंक्याह। अनादिरिति। चैतन्यवदात्मनि तस्याविद्याकृत

त्वानुपपत्तिमाशंक्य नानारूपत्वेन तनो विलक्षणत्वात् एकरूपे युक्तं तस्य कल्पितत्व
मित्याह। अनंतरेति। प्रयत्नतो हेयत्वं द्योतयितुमनर्थ इति विशेषणं। नैसर्गिक इति पा
ठकारणरूपेण तत्वमुक्तेयं। तस्मात्कर्मसंसारफलं न मोक्षं फलयति तस्मात् सन्निदान
संसारनिवर्त्तकात्मज्ञानार्थत्वेन साधनचतुष्टयसंपन्नमधिकारिणमधिकृत्य वेदां
तारंभः संभवतीत्युपसंहरति इत्येतस्मादिति। यथोक्तज्ञानार्थत्वेनोपनिषदारंभे
ब्रह्म वान्त दंमग्र आसीदित्यारभ्यं तस्मादारभ्य ज्ञानोपदेशादुषा वा अश्वस्येत्या
रंभस्तु न युक्तः साक्षादत्र तदनुक्तेरित्याशंक्य तस्मादारभ्योपनिषदारंभे प्राप्य फलम
भिधित्समानः प्रथममश्वमेधोपासनफलमाह अस्येति। राजयज्ञत्वादश्वमेधस्य
तदनधिकारिणामपि ब्राह्मणादीनां तत्फलार्थिनामस्मादेवोपासनात्तत्प्राप्तिरिति
मत्वश्रुतो तदुपासनोक्तिरित्यर्थः। किमत्र नियामकमित्याशंक्य विकल्पश्रवणं केव

लस्यापि ज्ञानस्य साधनत्वं सूचयती सर्थविकल्पश्रुतिमुदाहरति विधयेति। तत्फलप्राप्ति
रितिमर्वेपासंबंधः। तत्रैव श्रुत्यंतरमाहतद्वेति। तदेतत्प्राणदर्शनं लोकप्राप्तिसाधनं
प्रसिद्धमितियावत्। आदिशब्देन केवलोपास्यब्रह्मलोकप्राप्तिवादिन्यः श्रुतयो गृह्यंते।
अश्वमेधेयदुपासनंस्योतेप्यरवादिनछेषत्वेन फलवत्वान्नास्वातंत्र्येण तत्वमंगेषु
स्वतंत्रफलाभावादिति शंकते कर्मविषयत्वमिति। ज्ञानस्य फलवत्वं दूषयति नेति। पूर्व
त्रार्थतोदर्शितां विकल्पश्रुतिमत्र हेतुतया स्वरूपतोनुक्रामति। योऽश्वमेधेति स्तस
र्वंपाप्मानंतरति तरति ब्रह्महत्यामिति संबंधज्ञानकर्मणोस्तुल्यफलत्वस्य न्याय्य
त्वादिति शेषः। उपास्तिफलश्रुतेरर्थविदत्वमात्राक्याश्वमेधवदुपास्तेरपि कर्मता
द्विहितत्वात्कर्मकेप्रेणानुशिष्टत्वाच्चमैवमित्याह विधेति। फलश्रुतेरर्थवादत्वाभावे हे ११
त्वंतरमाह॥ कर्मातिरेचेति। अश्वमेधातिरिक्तकर्मण्ययंवावलोकोऽस्तिरित्यादौचित्याम्याह

वेत्तल्लोकादिसंपादनस्य स्वतंत्रफलोपासनस्य दर्शनान्न फलश्रुतेरर्थवादतेत्यर्थः अश्व
मेधोपासनं न कर्त्तव्यं किंतु पुरुषार्थ्यं वा तत्र वाधिकारोश्वमेधफलतनधिकारिणामपीते
तावदेवेषं चेदुपासने कमिप्रकरणस्थेपि तल्लुप्यात् विद्याप्रकरणेनास्याध्ययनमर्थवद्दि
त्यानर्थक्यात् सर्वेषां चेति। परत्वे हेतुः समस्तीति। अनुवृत्तव्यावृत्तरूपहिरण्यगर्भप्राप्ति
हेतुत्वात्तस्य श्रेष्ठतेत्यर्थः। तस्य पुण्यश्रेयत्वेपि प्रहृते किमायातं तदाह तस्य चेति। यदा
क्रतुप्रधानस्याश्वमेधस्योपास्तिसहितस्यापि संसारफलत्वं तदा तदीयसामग्रिहो
त्रादीनां संसारफलत्वेपि किं कायमित्यास्मिन् कर्मराशौ बंधहेतौ विरक्ताः साधन
चतुष्टयविशिष्टा ज्ञानमपेक्षमाणास्तदुपाये श्रवणादावेव सर्वकर्मसंन्यासपूर्वके
कं यत्नं प्रवर्त्तेरन्नित्याम्नायवती श्रुतिरुपासनां विद्यारंभे विदधातीति तेनोषा वा अ
श्वस्येत्याद्युपनिषदारंभो युक्तोस्य विशिष्टाधिकारिसमर्पकत्वादित्यर्थः। उपासन

१९

फलस्य संसारगोचरत्वमेव कुतः सिद्धमत आह। तथा चेति। अज्ञानायाहिमल्कः सर्वैनैव
रेसेसोऽविषेदिति भयाइसादिश्रवणादुपस्तियुक्तं तु फलस्य सूत्रस्य बंधमध्यपा
तित्वाद्विशिष्टोपि क्रतुर्नमुक्तये पर्याप्तो भवतीत्यर्थः॥ उक्तेः सर्वकर्मणां बंधफलत्वे नित्यनै
मित्तिकानां न तत्फलत्वं तेषां विध्युद्देशे फलाश्रुतेर्न ह्याश्वदग्धरथन्यायेन मुक्तिफलता
भादिति शंकते न नित्यानामिति। एतावान्वै काम इति सर्वकर्मणामविशेषेण फलसंबं
धश्रवणात्काम्यादेश्च काम्यफलत्वस्य तद्विध्युद्देशावगतस्य सिद्धत्वात्। कर्मणामपि तत्फले
कू इति वाक्यस्य नित्यादिकर्मफलविषयत्वान्न मोक्षफलतां शंकेति परिहरति नेति
उक्तमेव स्फुटयति सर्वैहीति। पत्नीसंबंधे मानमाह जायेति तथापि कथं कर्मणः स
र्वकामोपायत्वं तत्राह एतावान्वै काम इति कथं तर्हि तेषां फलसेदोलप्यते तत्राह पुत्रे
ति। अथैव फलविभागे कथं समष्टिव्यष्टिप्राप्तिफलत्वमश्वमेधस्योक्तमत आह ज्यांना १२

त्मकृतं चेति अस्याध्यायस्यावसाने कर्मफलस्य हिरण्यगर्भरूपतां नयमित्याद्याश्रुतिरूप
संहरिष्यतीत्यर्थः। उपसंहारश्रुतेस्तात्पर्यमाह सर्वकर्मणामिति। कर्मफलं संसारश्चेत्या
कृतदनुष्ठानात् दृष्टावान्मुक्तानां पुनर्बंधः स्यादित्याशंक्याहेदमेवेति। तर्हि तस्यामवस्था
यामिति यावत् तस्य पुनर्व्याकरणे कारणमाह तदेवेति। व्याकृताव्याकृतात्मनः संसार
स्य प्रामाणिकत्वेन सत्त्वमाशंक्याविद्याकृतत्वेन तन्मिथ्यात्वमुक्तं स्मारयति सोयमि
ति स एष हि भ्रांतिविषयो न प्रामाणिकस्तत्कुतोस्य सत्यतेत्यर्थः कथमस्यात्मन्यध्ये
कूटस्थे प्राप्तिरित्याशंक्याह क्रियेति समारोपे मूलकारणमाह अविद्ययेति। आत्मन्यवि
द्ययारोपितं द्वैतमित्यत्र द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्यादि वाक्यं प्रमाणय
ति मूर्तेतिनन्वात्मन्यारोपो नोपपद्यते तस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य द्वैतविलक्ष
णत्वात् असतिसादृश्ये ध्यासासिद्धेरत आहात्मेति संसाद्वैलक्षण्यमेव प्रकटयति अ

अन्नामेति। आदिपदेनान्येपि विपर्ययभेदाः संगृह्यंते आरोपे प्रमिणोमि करोमि भुंजे चेत्यनु
भवं प्रमाणयति। अवभासतरति। आत्मन्यध्यासः साहंरूपाभ्यासो घेवेपि न भासिमत्ति
नत्वादिवचतोनुभूयते। तः सविलासाविद्यानिवर्तकब्रह्मविद्यार्थत्वेनोपनिषदा
रंभः संभवतीत्यपसंहरति अतरति एतावदित्यर्थोक्तिः तत्वज्ञानादज्ञानदृष्टांतमाह
रज्वामिति। एवमुपनिषदारंभे स्थिते प्राथमिकब्राह्मणयोरवांतरतात्पर्यमाह तत्र
२ तावदिति आद्यस्य पुनरवांतरतात्पर्यं दर्शयतीतत्रेति। नन्वश्वमेधस्यांगबाहुल्ये कस्मा
दश्वास्यांगविषयेमेवोपासनमुच्यते तत्राह प्राधान्यादिति। तदेव कथमिति तदाह प्रा
धान्यं चेति। प्रजापतिदेवताकत्वाच्चाश्वस्य प्राधान्यमित्याह प्राजापत्यत्वाच्चेति प्रती
कमादाय व्याचष्टे। उषा इत्यादिना। स्मारणार्थत्वंतमेव निपातस्य स्फुटयति प्रसिद्ध २३
मिति। शास्त्रीये लौकिके च व्यवहारे प्रसिद्धो ब्राह्मो मुहूर्तस्तं कालमिति यावत् उषः शिरः

राद्धप्रयोगादिनावयवेषु तस्य प्राधान्यं हेतुमाह प्राधान्यादिति। तथापि कथं तत्र राद्धप्रयोगस्तत्राह शिरश्चेति आश्वमेधिकाश्वशिरस्युषसो दृष्टिः कर्त्तव्येत्याह अश्वस्येति। कालादिदृष्टिरश्वांगेषु क्रिमिति क्षिप्यते ऽश्वांगदृष्टिरेव तेषु किं न स्यादित्याशंक्याह कर्मांगस्येति अंगेषु अनंगमतिक्षेपे हेत्वंतरमाह प्राजापत्यत्वं चेति अश्वस्य सेत्स्यतीति शेषः। तत्र हेतुः प्रजापतीति ननु कालादिदृष्टयोऽश्वावयवेषु आरोप्यंते न तस्य प्रजापतित्वं क्रियते तत्राह कालेति। कालाद्यात्मको हि प्रजापतिस्तत्करणं अश्वमेधाधिकारी हि सत्यश्वे कर्मणो वीर्यवत्तरत्वार्थं कालादिदृष्टीरश्वावयवेषु कुर्यात्तदनधिकारी तु अश्वाभावे स्वात्मानमश्वं कल्पयित्वा स्वशिरःप्रभृतिषु कालादिदृष्टिकरणेन प्रजापतित्वं संपाद्य प्रजापतिरस्मीति ज्ञानात्तद्भावं प्रतिपद्येतेति भावः। चक्षुषि सूर्यदृष्टौ हेतुमाह शिरस इति उषसोनंतरत्वं सूर्ये दृष्टं च चक्षुषि च शिरसोनंतरत्वं दृश्यते तस्मात्तत्र तद्दृष्टिर्युक्तेत्यर्थः।

बृ·आ·२

तत्रैव हेत्वंतरमाह सूर्येति आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदिति श्रुतेः। चक्षुषि सूर्योधिष्ठा
त्री देवता तेन सामीप्यात्तत्र तद्दृष्टिरित्यर्थः। पर्यायोपादानं व्यर्थमित्याशंक्य क्रव्यादादिति
वृत्त्यर्थविशेषणमित्याह वैश्वानर इत्यग्नेरिति। अग्निर्वाग्भूत्वा मुखं प्राविशदिति श्रुतिमा
श्रित्य मुखे तद्दृष्टौ हेतुमाह मुखस्येति। अधिकमासमनुसृत्य त्रयोदशमासो वेत्युक्तं।
शरीरे संवत्सरदृष्टिरित्यत्रात्मत्वं हेतुमाह कालेति। आत्मा हस्तादीनामंगानामिति
शेषः कालावयवानां संवत्सरस्यात्मत्ववदंगानां शरीरस्यात्मे प्रमाणमाह मध्यं ह्येति
पुनरुक्तेरर्थवत्त्वमाहाश्वस्येति पृष्ठे द्युलोकदृष्टौ हेतुमाह ऊर्ध्वत्वेति। उदरेंऽतरिक्षदृष्टौ
मितमाह सुषिरत्वेति। पादअस्यंते अस्मिन्निति व्युत्पत्तिमाश्रित्य विवक्षितमाह पादेति।
अश्वस्य हि खुरेण पादस्य नतत्वसामान्यात्पृथिवीदृष्टिरित्यर्थः पार्श्वयोर्दिक्चतुष्टय
दृष्टौ हेतुमाह पार्श्वेनेति। द्वे पार्श्वे च तस्याश्चादिशस्तत्र कथं तयोस्तदारोपणं शंकामेन द्वयोः

२८

संबंधादिति शंकते पार्श्वयोरिति यद्यपि द्वे दिशौ द्वाभ्यां पार्श्वर्षियां संबध्येते तथाप्यश्व
स्य प्राङ्मुखत्वे प्रत्यङ्मुखत्वे च दक्षिणोत्तरयोस्तन्मुखत्वे च प्राक्प्रतीच्योर्दिशोस्ता
भ्यां संबंधसंभवात्तत्र तद्दिग्विरुद्धेति परिहरति नैसादिनात उपपन्नो चाश्वस्य
च लिंगुत्वं हेतुकर्त्तव्यं। पार्श्वास्थिषु चांवतरादिनामारोपे पार्श्वदिक्संबंधो हेतुः॥
ऋतवः संवत्सरस्यांगानि हस्तादीनि च देहस्यावयवास्तस्मादृतुष्टिदेरंगेषु कर्त्तव्ये
त्याह ऋतव इति। अस्ति मासादीनां संवत्सरसंधित्वं अस्ति च शरीरसंधित्वं पर्वणां।
अतस्तेषु मासादिदृष्टिरित्याह संधीति। युगसहस्राभ्यां प्रजापतमेकमहोरात्रं। अ
यनाभ्यां देवं पक्षाभ्यां पित्र्यं। षष्ठिघटिकाभिर्मानुषमिति भेदः। प्रतिष्ठानात्वस्यपा
दविषयत्वं व्युत्पादयति प्रतितिष्ठतीति। पादेष्वहोरात्रदृष्टिसिद्ध्यर्थं युक्तिमुपपाद
यति अहोरात्रैरिति। अस्थिषु नक्षत्रदृष्टौ हेतुमाह स्तुकृत्वेति। नक्षत्राच्छेनांतरिक्षं

त्रिमितिनगरघ्नतेमुख्येसत्युपचारायोगादित्याशंक्यपुनरुक्तिंपरिहर्त्तुमित्याहांतरिक्षस्थे
ति।उदरंसिंचंतिमेघामांसानिरुधिरमतःसोत्कृत्वसामान्यान्मांसेषुमेघदृष्टिरित्या
होदकेति।अभ्रजठरविपरिवर्त्तिन्यैद्रजीर्णेसिकताद्दृष्टोहेतुःविद्युल्लेखेति।किमिति
गुदन्त्रावेदनपायुरेवनगरघ्नतेत्रिराग्रहणेहिमुख्यार्थातिक्रमःस्यात्तत्राहबहुवचना
द्दिति।चकारोवधारणार्थः।यद्यपिबहुत्वात्त्रिरास्योर्थांतरमपिगुदशब्दमर्हतितत
थापिस्पंदनसादृश्यान्नाड्यास्वेवसिंधुदृष्टिरितितासामितिग्रहणमितिसाचं।कुतो
मांसखंडयोर्द्वित्वमेकत्वबहुवचनाबहुत्वाप्रतीतेरित्याशंक्यदारइतिवद्बहुत्वे
कु० २ र्गतिमाह[illegible]मानरतातितयोःपर्वतदृष्टौहेतुद्वयमाहकाठिन्यादित्यादिनास्तुनत
साधर्म्यादोषधिदृष्टिर्लोमसुमहत्त्वसामान्याद्वानस्पतिदृष्टिरन्ध्रकेशेषुकुर्त्तये १५
स्याहयथासंभवमिति।सर्वसामान्याल्लब्ध्वा।प्रागवस्थादिसदृष्टिरम्बरस्यनाभेरूर्ध्व

भागे कर्तव्ये स्याहोष्यन्नित्यादिना विषजृंभे तरस्यादोऽप्रसयार्थो न विवक्षितः। विजृंभणं मु
खं विदारयति विद्योतनं पुनर्मेघं अतो विद्योतनदृष्टिर्जृंभणे कर्तव्येत्याह मुखेति। स्त
नयतीति स्तनितमुच्यते तद्दृष्टिर्गात्रकंपे कर्तव्येत्यत्र हेतुमाह गर्जनेति मूत्रकरणो
वर्षपाहृष्टौ कारणमाह सेचनेति। अश्वस्य हेषितशब्देनास्यारोपणमित्यतो ब्रह्म
हरूपं वक्तव्यमित्याह तान्नेति। अश्वावयवेषु कालादिदृष्टिर्विधायाश्वं प्रजापतिरूपं
विवक्षित्वा कंडिकांतरं गृहीत्वा तात्पर्यमाहाहर्वेत्यादिना। ग्रहो हवनीयद्रव्याधारे
पात्रविशेषो अग्रतः पृष्ठतश्चेति संतपनात् यावत्प्रसिद्धा तावदाक्लिदी।प्तिः सोवर्णे
च ग्रहे सास्यते तस्मिन्नहर्दृष्टिरिति दर्शनं विभजते अहरिति। अश्वसंज्ञपनात्
पूर्वं यो महिमाख्यो ग्रहः स्थाप्यते स चेदहर्दृष्ट्योपास्यते। कथं सोऽश्वमन्वजायतेति प
श्चादश्वस्य तज्जन्म नान्वोयुक्तेरिति शंकते। अहरश्वमिति। नायं पश्चादर्थोऽनुशब्दः किंतु लक्ष

बृ·आ·३

गार्थस्तथाश्वेचाश्वस्य प्रजापतिरूपत्वात्तंलक्षयित्वा ग्रहस्य यथोक्तस्य प्रवर्त्ते रूपदेशा
दश्वमन्वजायते स्याविरुद्धमितिपरिहरति अश्वस्येतितदेवस्फुटयति प्रजापतिरिति
कालल्लोकदेवतात्मा प्रजापतिरश्वात्मना दृश्यमानोत्राह दृष्टादृष्टेन ग्रहेपालक्ष्यते।
तथा चाश्वमन्वजायतेतिश्रुतेरविरुद्धोर्थः। अनुशब्देन पश्चाद्वाचीत्यत्र दृष्टांतमाह
वृक्षमिति यथा वृक्षंलक्षयित्वा तस्याग्रे विद्युद्विद्योततेतदा वृक्षमनुविद्योततेत्से
ति प्रयुज्यते तथात्राप्यनुशब्देन पश्चादर्थ इत्यर्थः। यत्र च स्थाने ग्रहः स्थाप्यते तत्स
र्वसमुद्रस्योद्देश्येयमित्याह तस्येति सर्वत्वमत्र साहस्रं कथं सहस्रमी प्रथमार्थे योज्य
ते। छंदस्यार्थानुसारेण [illegible]स्यय संभवादित्यर्थः। हविप्राक्तीति यथा सौवर्णे ग्रहेऽह
र्दृष्टिरूपदृष्टा तथा राजते ग्रहे रात्रिदृष्टिः कर्त्तव्येत्याह तथेति। आस्ति हि चंद्रातपव
त्वाद्रात्रेः शौक्ल्यमस्ति च राजतस्य ग्रहस्य तद्युक्तं तत्र रात्रिदर्शनमित्याह वपीति रजतं

२८

ज्ञापयन्त्यमन्त्रश्वरात्रिरतो वासादस्यास्तत्र रात्रिदृष्टिरित्याह उजपन्योति प्रजापतिरूपं प्र
कृतमश्वंलक्षयित्वा तत्संज्ञपनात्पश्चादस्य मृतिं दर्शयत्येनमिति तदासदनस्थाने
पश्चिमसमुद्रदृष्टिर्विधेयेत्याह तस्येति कथमेतौ ग्रहौ महिमाख्यावुक्तौ महत्वोपेतत्वा
दित्याह महिमेति॥ अथाश्वविषयं दर्शनमादिश्य ग्रहविषयं तदादिशतो वाक्यभेदः
स्यान्नेत्याहाश्वस्येति किमत्र मित्रनियामकमित्याशंक्य पुनरुक्तिरिति मत्वाह ताविति स्वादि
नावैशाद्वार्थकथमेवेति वाक्यशेषोप्यत्रानुगुणीभवतीत्याह तथा चेति हयशब्दनि
ष्पत्तिपुरःसरं तदर्थमाह हयरति॥ वाज्यादिशब्दानां जातिविशेषवाचित्वादत्रापि तदे
वग्राह्यमिति पक्षांतरमाह जातीति देवानां देवत्वप्रापकत्वं कथमस्येत्याशंक्याह प्रजा
पतित्वादिति॥ अश्वं स्तोतुमारभ्य पक्षांतरोक्त्या तन्निंदावचनमनुचितमिति शंक
तेनत्विति॥ उपक्रमविरोधो नास्तीति परिहरति नेत्यादिना समुत्पद्यत्तानिदनं स्यास्मि

न्निति व्युत्पत्त्या परमगंभीरस्येश्वरस्य समुद्रशब्दतामाह परमात्मेति तत्र योनित्वमुत्पाद
कत्वं बंधुत्वं स्थापकत्वं समुद्रत्वं विलापकत्वमिति भेदः ॥ अथ परमात्मयोनित्वादि वचन
मुपास्येश्वरस्य क्वोपयुज्यते तत्राहैवमिति। श्रुत्यंतरानुरोधेन समुद्रयोनिरित्यत्र समु
द्रशब्दस्य रूढिमनुजानातीति ॥ अप्सु योनिरिति ॥ ॥ इति तृतीयस्य प्रथमं ब्राह्मणं ॥ ॥
अस्मादिर्दीदैनौ स्त्यनंतरं अग्निदर्शनं वक्तुं ब्राह्मणांतरमवतारयति। अथेति। मैवेहे
त्यादेत द्दृष्टिर्नास्तीति चेत्सत्यं तत्राग्ने र्जन्म वक्तुं कर्मिका क्रियतरस्याह ग्नेरिति। वायो
रग्निरित्यादौ प्रसिद्धं तज्जन्मेति चेत्सत्यं तद्विशेषस्याग्नजन्मोक्तिरित्याहाश्वमेधेति
दर्शने विधित्सिते किं जन्मोक्त्येति चेत्तत्राह तद्विषयेति ॥ अग्निदर्शनस्य विधातुमि
ष्टस्याश्वमेधमुपास्याग्निस्तुतिफला तदुत्पत्तिरिशास्त्ररूढत्मात्वादुत्कृष्टत्वेनायमुपास्यो
राजादिवदित्यर्थः ॥ तात्पर्यार्थमुक्त्वा वाक्यार्थमादायाक्षराणि व्याचष्टे नैवेत्यादिना। नाम

रूपाभ्यां विभक्तो विशेषो यस्मिन्निति बहुव्रीहिः॥ अन्नम्तन्यवादिलब्धावकाशोऽविमृ
नयपरे श्रुत्यवष्टंभेन स्वपक्षमाह किमित्यादिना कार्यस्य प्रागसत्वे हेत्वंतरमाह॥ उत्प
त्तेश्चेति विमतं प्रागसत् उत्पद्यमानत्वात् यन्नैवं न तदेवं यथा परेशंब्रह्मेत्यर्थः। हेत्व
सिद्धिं शंकित्वोत्तरमाह उत्पद्यते हीति। घटग्रहणं कार्यमात्रस्योपलक्षणार्थं उक्तमनुमा
नं निगमयति अत इति तत्र तार्किकोक्तेन्विति यदुक्तं न कार्यं कारणं वासीदिति तत्रेभा बाधोभागे
गे चानुमतिरित्यर्थः॥ कार्यस्यापि कथं प्रागसत्वोपपत्तिरित्याशंक्याह यन्नेति। एतेनानु
मानस्यासिद्धसाध्यतोक्ता कार्यवत्कारणस्यापि प्रागसत्वं किं न स्यादित्याशंक्योक्त
हेत्वभावान्नैवमित्याह नत्विति॥ मृन्यवाद्याह न प्रागुत्पत्तेरिति विमतं प्रागसत् योग्य
त्वे सति तदानुपलब्धत्वात् संमतवत् न चासिद्धो हेतुः। श्रुतेरनुतिरांकृतात् तद्विरो
धे सत्युपलब्धेराभासत्वादित्यर्थः तदेव प्रपंचयति। अनुपलब्धिश्चेदिति कार्यवत्कार

31

१८ पास्यापि प्रागसत्त्वे प्राप्ते सिद्धांतयति नेत्यादिना नैवेत्यादिश्रुतिरव्यक्तानामरूपादिविष
यान प्रागसत्त्वं कार्यकारणयोराह अन्यथा वाक्यशेषविरोधादित्यर्थः ॥ श्रुतिं विवृणो
ति यदिहीति द्वयोरसत्त्वेपि का वाचोयुक्तिरनुपपत्तिस्तत्राह नहीति। मा तर्हि वाक्यमेवप्र
दित्याशंक्याह ब्रवीति चेति। मत्सकलेत्यादिवाक्यार्थमुपसंहरति तस्मादिति श्रुतेः प्रामाण्यादि
ति तत्प्रामाण्यस्य प्रमाणलक्षणोपेतत्वादिति यावत् परकीयानुमाने श्रुतिविरोधमभि
धायानुमानविरोधमाहानुमेयत्वाच्चेति। कार्यकारणयोः सत्त्वस्यानुमेयतया तदसत्त्व
मनुमातुमशक्यमुपजीव्यविषयतया सत्त्वानुमानस्य बलीयस्त्वादित्यर्थः ॥ कार्यकार
णयोः सत्त्वानुमानं प्रतिज्ञाय प्रथमं कारणसत्त्वमनुमिनोति ॥ अनुमीयते हीत्यादिना कारणस्य सत्वे १८
गुभा नमाप् कार्यस्येति विमतं सत्त्वैककार्यत्वात्कुंभवदित्यर्थः ॥ नानुपमर्द्य प्रादुर्भावादिति न्याये
न दृष्टांतस्य साध्यवैकल्यं चोदयति दीति न तावदसिद्धो घटः स्वकारणमनुपमृद्नाति। अ घटा

असतोऽकारकत्वात्सिद्धस्योपमर्दकत्वेनासत्पूर्वकृतत्वमिति कुतः साध्यविकलतेत्याह नेति
किंचात्वसिद्धत्वमेव सर्वत्र कारणं न पिंडादिर्विशेषोऽनन्वयादनवस्थानाच्चेति कुतः साध्य न
वैकल्यमित्याह मृदादेरिति। तदेव स्फुटयते मृत्तु व्यापारितेति दृष्टांतोक्तिः। किंचान्वय
व्यतिरेकाभ्यां कारणमवधेयं न च पिंडाभावे घटो न भवतीति व्यतिरेकोऽस्ति पिंडाभावे
पिन्ना कुलादिभ्योऽपि घटाद्युत्पत्त्युपलंभादित्याह तदभावेति तदेव स्फुटयति असत
पिच्य पीति। त्वन्मतौतिरेकराहित्यं तु तुल्यमित्याशंक्याह असतीति। मृदाद्येव घटादिकारणं
चेत्किमिति पिंडादौ सत्येव ततो घटाद्यनुत्पत्तिरित्याशंक्याह सर्वमिति॥ [illegible]वि त्र
धावनाद्युपपत्तिरिति भावः॥ अन्वयि द्रव्यं पूर्वोत्पन्नस्वकार्यातिशयेन न कार्यांतरं
जनयति चेत्तत्कार्यतादात्म्येन स्वसमर्पितरूपेतन्नोत्तरकार्योत्पत्तिर्हेत्विति तिप्तावादित्या
शंक्याह न चेति कार्यांतिरेप्यनुवृत्तिदर्शनात्कार्यातिमानाभावाच्चेत्यर्थः॥ अन्वयिद्रव्यस्यैव

कारणत्वे फलितमाह तस्मादिति अन्वयिनो मृदादेर्भानाभावेनाभावान्नकारणतेति शंकते पिंडादीति दे तेव चोद्यं विरूपोति पिंडादीत्यादिना मृद्घटः स्वर्णकुंडलमित्यादितादात्म्यप्रत्ययस्यर्ति डघति शिलामृदघभावेनुपपत्तेरनुगतं मृदाद्युपेयमिति परिहरति तेति किंच या पिंडात्मना सर्वैर्घुमर्दासीत्सैवा घटाद्युत्तर इति प्रत्यभिज्ञया मृदोन्वयित्सा:सिद्धेस्तत्कारणत्वं दुरपह्नवमित्याह मृदादीति। यत्सत्तत्क्षणिकं यथा दीपः संतश्चेमे भावा इत्यनुमानात्सर्वार्थानां क्षणिकत्वसिद्धेरन्वयदृष्टिः सादृश्याद्भ्रांतिरिति शंकते सादृश्यादिति॰ प्रत्यभिज्ञासिद्धस्याप्यर्थविसंवादं क्षणिकार्थबोधि लिंगमनुछ्तानुमानवदिति दूषयति नेत्यादिना॥ सादृश्याद्दीसादिनैकत्वेन प्रत्यभिज्ञाभ्रांत्यादिगम्यते प्रत्यक्षात्कारणैक्यं गम्यतेऽनुमानात्तद्भेदोऽतो द्वयोर्विरुद्धत्वस्याव्यभिचारित्वान्नाध्यक्षेणानुमानबाधो वैपरीस्यसंभवादित्याशंक्याह ताचेति प्रत्यभिज्ञामुपजीव्य क्ष

णिकत्वानुमानाप्रवृत्तावप्युपजीव्यजातीयत्वात्तत्प्राबल्यादुपजीवकजातीयमुक्तानुमा
नं दुर्बलं तत्साध्यमित्यर्थः। प्रसक्तिशंकां स्वार्थे स्वतो न मानं बुध्यंतः संवादादेव बुद्धीनां मा
नत्वस्य बौधे शिष्टत्वान्न च बुद्ध्यंतरं साधकमस्तीति प्रसक्तिज्ञानस्यापि क्षणिकत्व
मित्याशंक्याह सर्वत्रेति। प्रसंगमेव प्रकटयति यदि चेति क्षणिकत्वादिबुद्धेरपि स्वार्थे
स्वतोमानत्वाभावात्त्वादृग्बुध्यंतरापेक्षायां तस्यापि तथात्वेनानवस्थाना बुद्धेः स्व
तःप्रामाण्यमुपादेयं तथा च प्रसक्तिज्ञानं सर्वं तथैवाबाधादित्यर्थः।। किंच प्रसक्ति
ज्ञायाभ्रांतित्वं वदता स्वरूपायक्कोन्त तदिदं बुद्ध्योः सामानाधिकरण्येन संबंधो
वाच्यः स च वक्तुं न शक्यते स्पादव संबंधिनौ द्रष्टुरक्तावादित्याह तदिदमिति। अ
सतिसंबंधे बुद्ध्योः सादृश्यात्तद्धीरिति शंकते सादृश्यादिति तयोः स्ववेद्यत्वात्तद्ग्राहकां
तरस्य चालाभान्न सादृश्यप्रसिद्धिरिति दूषयति न तादिदं बुद्ध्योरसितितथापि किमिति सा

रि

न्या. ए. ३
दृ. आ. २

दृश्यासिद्धेत्याशंक्याह सतीति चेति। सादृश्यासिद्धिमभ्युपेत्य शंकते। असत्ये वेति॥ यत्र सत्ये वार्थधीस्तत्रैव साधकापेक्षा नान्यत्रेति भावः। तत्र बाह्यार्थबाधितं प्रत्याह। न तदिदं बुद्ध्योरिति। विज्ञानबाधाऽसदिति। सत्यासत्यनालंबनं क्षणिकं विज्ञानमित्यस्यापि ज्ञानस्यासद्विषयतया विज्ञानबाह्यासिद्धिरित्याहुतेति॥ अन्यबाधाहतदपीति॥ सर्वाधीरसद्विषयेत्येषाऽपि धीरसद्विषयास्यात्तत्रैव सर्वबुद्धेरसद्विषयत्वासिद्धिरिति दूषयति नेत्यादिना॥ परपक्षासिद्धत्वात्तत्स्यत्पिज्ञयास्त्वापि हेतौ सिद्धे दृष्टांतस्य साध्यवैकल्यं परिहृतमित्यवांतरप्रकृतमुपसंहरति स्मोतेदि २
ति। संप्रति कारणसत्तानुमानं निगमयति॥ अतरति कार्यकारणयोर्द्वयोरिति प्रागुत्पत्तेः सत्वमनुमेयमिति प्रतिज्ञाय कारणास्तित्वं प्रपंचितमिदानीं कार्यास्तित्वानु २०
मानं दर्शयति कार्यस्य चेति॥ प्रागुत्पत्तेः सद्भावः प्रसिद्ध इति च कारार्थः॥ प्रतिज्ञाभागं

36.

विप्रजते कार्यस्येति। हेतुप्रागभावाप्तिपतिकव्यमिति॥ अभिव्यक्तिर्लिंगमस्येति व्युत्पत्त्याक
थमभिव्यक्तिलिंगत्वादिति कार्यसत्त्वे हेतुरुच्यते सिद्धे हि सत्त्वेऽभिव्यक्तिर्लिंगमस्येति सि
ध्यति तद्बलाच्च सत्त्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः॥ संप्रतिपन्नयाभिव्यक्त्या विप्रति
पन्नं सत्त्वं साध्यते तन्नान्योन्याश्रयत्वमिति परिहरति॥ अभिव्यक्तेरिति॥ कथं तर्हि हे
तुमानं प्रयोक्तव्यमित्याशंक्य प्रथमं व्याप्तिमाह यद्यपीति यद्यपि व्यज्यमानं तत्प्राग
भिव्यक्तेरस्ति तमसि तस्य घटादिवदित्यर्थः॥ संप्रत्यनुमिनोतीति तथेति। विमतं प्राग्भिव्यक्तेः
सत् अभिव्यक्तिविषयत्वात् संप्रतिपन्नवदित्यर्थः॥ ननु तमसि तस्थो घटोऽभिव्यंजकसा
मीप्यादभिव्यज्यते न तत्प्राक्कालीनसत्त्वं प्रयोजकमित्याशंक्याह न हीति। उक्तेनु
माने कार्यस्य सदोपलब्धिप्रसंगं विपक्षबाधकमाशंक्य तेनेत्यादिना॥ उक्तानुमान
निषेधीनत्यर्थः॥ अविद्यमानत्वाभावादिति छेदः॥ अनुमाने बाधकोपन्यासं विवृणोति

ह्रीति वर्तमानवदिति। नागामि च घटादि सदेव चेदुपलब्धिसामग्र्यां सत्यां तदस्याग्रुमेनी
राच्चार्देमुपलभ्येतेन चैवमुपलभ्यते तस्माद्यदुक्तं कार्यस्य सदासत्त्वमित्यर्थः। मूलिं
उग्रहपांविरोधियंतिरोपलक्षणार्थं। असन्निहितेसतीतिच्छेदः। न ताद्द्यमानत्वमात्रं
कार्यस्य सदोपलंभापादकं सतोपि घटादेरभिव्यक्त्यनभिव्यक्त्योरुपलब्धत्वादिति
समाधत्ते नेति॥ अभिव्यक्तिसामग्रीसत्त्वमभिव्यक्तिसाधकं न तु सततस्तत्सामग्री
नियमोस्तीत्यभिप्रेत्याह द्विविधत्वादिति। उत्पन्नस्य कुड्याद्यावरणमनुत्पन्नस्य विशि
ष्टं कारणमिति द्वैध्यमेव प्रज्ञाहर्वकं साधयति घटादीति॥ यदोपलभ्यमानं कार्या
वयवानांकार्यंतिराकारेण स्थितिस्तदा नेदं कार्यमुपलभ्यते इत्यन्वयव्यतिरेकसि
द्धं कारणस्य कार्यंतिरणरूपेण स्थितस्य कार्याविरकत्वमिति दृष्टव्यं विशिष्टस्य कार
णस्यावरणत्वासिद्धोसिद्धमर्थमाह तस्मादिति। प्राक्कार्यास्तित्वे सदा तदुपलब्धिप्रसंग

बाधकं निराकुर्वन्नपि घटो नास्तीत्यादिप्रयोगप्रत्ययभेदानुपपत्तिं बाधकांतरमाशंक्याह नन्वेति॥ कपालादिना तिरोभावेन नष्टव्यवहारः पिंडाद्यावरणभंगेनाभिव्यक्तावुत्पन्नव्यवहारो दीपादिना तमोनिरासेनाभिव्यक्तौ भावव्यवहारः। पिंडादिना तिरोभावेऽभावव्यवहारस्तदेवं कार्यस्य सदा सत्वेपि प्रयोगप्रत्ययभेदसिद्धिरित्यर्थः पिंडादिनघटाद्यावरणं तेन समानदेशत्वात् यद्यस्यावरणं न तत्तेन समानदेशं यथा कुड्यादीति शंकते पिंडेति। व्यतिरेकानुमानं विवृणोति तमसादिना। अनुमानफलं निगमयति तस्मादिति किमिदं समानदेशत्वं किमेकाश्रयत्वं किं वैककारणत्वमिति विकल्प्याद्यं विरुद्धत्वेन दूषयति नेत्या। दिनाहारेण संकीर्णस्योदकादेराध्रियमाणस्येति यावत्॥ द्वितीयमुदस्यापयति घटादीति। यस्येदं कार्यं तस्मिन्नसदात्मनि तेषामेव स्थानानुवृत्तेषामनावरणत्वमित्यर्थः॥ घटावस्थमन्मात्रवृत्ति कपालादेर्घटानावरणत्वमिष्ट।

टी॰ आ॰ २

मेवेति सिद्धसाध्यता। अव्यक्तघटावस्थमृद्वृत्तिकपालादेरनावरणत्वसाधने हेत्वसिद्धिः।।
घटस्य कपालादेश्चाप्ययमदृश्यत्वभेदादिति दूषयति न विपक्षानामिति विद्यमान
स्यैवावृतत्वादनुपलब्धिश्चेदावरणतिरस्कारे यत्नः स्यान्न घटादेरुत्पत्तावतोनु
भवविरोधः सत्कार्यवादिनः स्यादिति शंकते आवरणेति। तदेव प्रपंचयति पिंडे
ति।। यत्रावृत्तं वस्तु व्यज्यते तत्रावरणेति। तदेव प्रपंचयति पिंडेति।। यत्रावृत्तं व
स्तु व्यज्यते तत्रावर्णारे भंग एव पलंभ इति व्याप्त्यभावान्नानुभवतिरोधोस्तीति दूष
यति नानियमादिति। अनियमं साधयति न हीति तमसावृत्ते दीपाद्युत्पत्तौ यत्नो
स्तीत्यत्र चोदयति सोपीति।। अनुभवविरोधमाशंक्योक्तमेव व्यनक्ति दीपादीति।।
दीपस्तमस्तिरयति चेत्कथं कुंभोपलब्धिरत आह तस्मिन्निति तत्र हेतुमाह न हीति।
अनुसरत्सपरिहरति नेत्यादिना किमिदानीमावरणभंगे प्रयत्नो नेत्येवं नियमोस्तु नेत्या

२२

ह क्वचिदिति॥ अनियमं नियमयन्ननुभवविरोधाभावमुपसंहरति तस्मादिति किंचा
भिव्यंजकव्यापारे सति नियमेन घटोऽभिव्यज्यते तदभावे नेत्यन्वयव्यतिरेकावधारितो घ
टार्थः कुलालादिव्यापारस्तस्यार्थवत्वार्थमभिव्यक्त्यर्थ एव प्रयत्नो वक्तव्यः आव
रणापगमस्त्वार्थिक इत्याह नियमेति। उक्तं स्मारयन्नेतदेव विवृणोति कारणेत्यादि
ना॥ आवृत्तिभंगार्थे यत्ने यतो घटानुपलब्धिरतस्तदुपलब्ध्यार्थत्वेन नियतः स
त्यसौ यत्नः सफलः स्यादिति फलितमाह॥ तस्मादिति प्रकृतमभिव्यक्तिलिंगकम
नुमानं निर्दोषत्वादादेयमन्वानस्तत्फलमुपसंहरति। तस्मात्त्वागिति। कार्यस्यास
त्वेयुक्तं तनाहातीतेति विमतं सदर्थं प्रमाणत्वात्संप्रतिपन्नवदित्यर्थः॥ तदेवानु
मानं विनादयत्यतीतइति। तत्रैवोपपत्त्यंतरानागतेति॥ आगमिनि घटे तदर्थित्वेन
लोके प्रवृत्तिर्दृष्टा न चासत्यतासतिसंप्रयुक्ता तेन स्यात्सदिति लक्षणा तेत्यर्थः। किंच योगीना

41

मीशस्य चातीदिंतो विपर्यं प्रत्यक्षसंज्ञानमिष्टं तच्च विद्यमानोपलंभनमतो घटस्य सदास
त्वमित्याह योगिनां चेति। ईश्वरस्य समुच्चयार्थश्चकारः। अत्र विष्यग्रहणमतीतोपल
क्षणार्थं।। ऐश्वरं योगिकं चेति दृष्ट्यो। प्रसंगस्येष्टत्वमाशंक्याह न चेति। अधिकव
लं हि बाधकं न चानतिशयादीशादिज्ञानादधिकबलं ज्ञानं दृष्टमतो बाधकाभावा
न्न तन्मिथ्येत्यर्थः।। तस्य साम्प्रतेऽपि पूर्वोत्तरकालयोरसद्घटविषयत्वं किं न स्यादित्या
शंक्याह घटेति। पूर्वोत्तरकाल्ययोरिति शेषः।। घटस्य प्रागसत्त्वाभावे हेत्वंतरमाह
विप्रतिषेधादिति।। स हि कारकव्यापारदशायामसन्निति कोऽर्थः किं तस्य भविष्यत्वा
दितदा नास्ति किं वार्थक्रियासामर्थ्यं आद्ये व्याहतिं साधयति।। यदेति।। घटार्थं कुला
लादिषु व्याप्रियमाणेषु सत्सु घटो भविष्यतीति प्रमाणेन निश्चितं चेत् कथं तत्र विरु
द्धं प्रागसत्त्वमुच्यते कारकव्यापारावच्छिन्नेन हि कालेन घटस्य भविष्यत्त्वेनातीतत्वेन

वाप्त विष्पत्सपत्त्र्दितिवा संबंधो विनस्यन्ते तथाम्वतस्मिन्नेव च काले घटस्य तथा विधसत्व
निषेधे स्याहतिरति व्यक्ते सर्थः॥ तामेवाप्तिनयति प्त विष्पन्निति यो हिकारः कृ व्यापार
दर्ग्रायांष्प निष्पत्वादिरूपेणास्तिसतदानास्तीत्युक्ते तस्यतस्याम वस्थायां तेनाकारेणा
सत्वमथोपि नतिनयाच घटोयदाये नाकारेणास्ति तदा तेनाकारेण नास्तीति व्याहति स्ति॰
रित्यर्थः। द्वितीयमुत्थापयत्सपेति प्रागुत्पत्तेर्घटार्थं कुलालादिषु प्रवृत्तेषु सोऽसन्नि
सत्त्वाससद्व्यवहारस्य यमेन विवेचयति तत्रेत्यादिना॥ तत्र सिद्धांतो ब्रूते न विरुध्य
त इति। कथं पुनः सत्कार्यवादिनस्तदसत्वमविरुद्धमित्याह॥ कस्मादिति। प्रागु
त्पत्तेस्तुच्छव्यावृत्तिरूपं सत्वं घटस्यासिसाधयिषितं तच्चेत्कृवाज्ञपितस्य तदा तन
मर्थक्रियासामर्थ्यं निषेधन्नानुमन्यते नानयोर्विप्रतिपत्तिरियत्ति प्रेसालत्वेन
होति। ननुत्वन्मते सर्वस्यमन्मात्रत्वाविशेषात्तिंडादेर्वर्तमानाता घटस्य स्यात्तस्य चा

43

वृ·आ·३

तीतता भविष्यत्ता च पिंडकपालयोः स्यादिति सांकर्यमाशंक्याह। नहीति। व्यवहारदशा
यां यथा प्रतिभासमनिर्वाच्यसंस्थानभेदास्थानादित्यर्थः॥ प्रागवस्थायां घटस्यार्थक्रि
यासामर्थ्यलक्षणसत्वनिषेधे विरोधाभावमुपपादितमुपसंहरति तस्मादिति। उक्त
मेवव्यतिरेकद्वारा विवृणोति यदीत्यादिना यदा कारकाणि व्याप्रियंते तदा घटे सम्प्रति
तस्य भविष्यत्वादिरूपं तत्काले निषिध्यते चेदुक्तविधया व्याघातः स्यात्॥ तच्च तस्य उ
न्मोत्रलणे। तस्मिन्काले भविष्यत्वादिरूपसत्वं निषिध्यतेऽर्थक्रियासामर्थ्यस्यैव नि
षेधात्तत्र विरोधावकाशोऽस्तीत्यर्थः॥ नहि पिंडस्येत्यादिना सांकर्यसमाधिरुक्तस्तमेवेदा
नीं सर्वतंत्रसिद्धांततया स्फुटयति न चेति। भविष्यत्वमतीतत्वं चेति शेषः॥ कार्यस्य प्रा
गुत्पत्तेर्नाशोर्ध्वमसत्वाभावे हेत्वंतरमाहापि चेति॥ तदेवानुमानतया स्पष्टयितुं दृष्टां ३२
तं साधयति॥ चतुर्विधानामिति। षष्ठी निर्धारणे घटान्योन्याभावस्य घटादन्यत्वे तत्रापन्यो

न्यभाववांतरांगीकारादनवस्थेत्याशंक्याह। दृष्टरति। नयोक्तिकमन्यत्वं किंतु घटो न भवति पट इ
ति॥ प्रतीतिर्वं तथाच घटाभावः पटादिरेवेति पटादेस्ततोन्यत्वात्॥ घटान्योन्यस्यावस्यापि
घटादन्यत्वसिद्धिरित्यर्थः ननु घटाभावः पटादिरित्युक्तं विशेषणत्वेन घटस्यापि पटादा
वंतर्भावप्रसंगादिति चेन्नैवं दृष्टपदेन क्रोडीकृतत्वात्। घटाभावस्य पटादित्वाभावेपि
नस्वातंत्र्यमभावत्वविरोधान्नापि तदन्योन्याभावः पटादेर्धर्मः संसर्गाभाववांतर्भावापा
तात् न च स घटस्यैव धर्मः स्वरूपं वा घटो घटो न भवतीति प्रतीत्यभावादित्यभिप्रेत्याह॥
न घटस्वरूपमेवेति। यदि प्रतीतिमाश्रित्य घटान्योन्याभावः पटादिरिष्यते तदा पटादे
र्भावस्याभावत्वविधानाद्व्याघातः स्यादित्याशंक्याह। नचेति॥ स्वरूपपररूपाभ्यां सर्वं सदसदात्म
कमिति दृष्टस्तथाच पटादेः स्वेनात्मनाभाववत्त्वं घटतादात्म्याभावाभावत्वं नचेत्य
स्यादितिरित्यर्थः॥ सिद्धे प्रतीत्यनुसारिणि दृष्टांते विवक्षितमनुमानमाह। एवमिति। किंचते

45

नं २

प्रागभावानां घटाद्भिन्नत्वात्पटवदेवसत्वमेष्टव्यमित्यनुमानांतरमाहतथेति। अनुमा
नफलं कथयति एवं चेति। तेषां घटान्यत्वे तस्यानघैंतत्वं दयत्वं सर्वात्मत्वं च प्राप्नोति
सत्वे च तेषामभावाभावात्मभावाभावयोर्मिथःसंगतिरित्यर्थः॥ ननु प्रसिद्धोऽभावोभा
ववदत्राक्योपन्होतुमिति चेत्सततर्हि घटस्य स्वरूपमर्थांतरं चेति विकल्प्याद्यमनूद्य
दूषयति। अथेत्यादिना। प्रागभावादेर्घटत्वेपि संबंधं कल्पयित्वा घटस्यैत्युक्तिरितित्रं
कृतेऽथेति। संबंधस्य कल्पितत्वे संबंधिनोप्यभावस्य तथात्वं स्यादिति दूषयति तथा
पीति॥ यत्र संबंधं कल्पयित्वाव्यपदेशास्तत्र न वास्तवोभेदो राहुशिरसोस्तथात्रापि
कल्पिते संबंधे भेदस्य तथात्वात् वास्तत्वं वे संबंधिनोरन्यतरस्य स्यान्न चाभावस्तथा
सापेक्षत्वादतो घटस्तत्वेत्यर्थः॥ कल्प्यांतरमनुवदति अथेति अनुमानफलं वदन्निर्घ
टस्यात्मनाधूकचत्ववचनेनसमाहितमेतदित्याहउक्तोत्तरमिति। असत्कार्यवादे दोषांत

२५

रमाहं किं चेति स्वहेतुस्वंबंधः सत्तासंबंधः सत्तासंबंधो वज्जन्मेति तार्किकानां च प्रागुत्पत्तेर
सतः संबंधस्तस्य सतो वृत्तेरित्यर्थः। युतसिद्धयोरनुपृथग्योर्मिथः॥ संयोगे पृथक्सि
द्धिरपेक्षत्वे युतसिद्धानां परस्परपरिहारेण प्रतीत्यनर्हाणां कार्यकारणादीनां मिथो यो
गः पृथक्सिद्ध्यभावो न दोषमावहतीति शंकते आयुतेति। उक्तमेव स्फोरयति सावेति।
व्यवहारदृष्ट्या कार्यकारणयोः। साधितां तु छव्यावृत्तिमुपसंहरति। तस्मादिति। नैवेह स
त्सर्वस्य प्रागुत्पत्तेरसत्त्वं कथमस्तु नेत्यादिवाक्यव्याख्यानेन निरस्ता संगतिमसत्कार्यवद
स्यार्थांतरे रूढत्वान्न तेनावरणं जगतः संभवतीत्याक्षिपति किंलक्षणेनेति। अनभि
व्यक्तनामरूपमध्यक्षायोग्यमपंचीकृतपंचमहाभूतावस्थातिरिक्तं मायारूपं सा
सासेमस्त्विरित्युच्यते न हि सर्वकार्यमवांतरकारणादुत्पत्तुमर्हतीत्यभिप्रेत्याहत
आहेति। कथंमयोक्तो मत्करशानायपाल्लस्पतेन। हि मूलकारणस्याज्ञानायादिमत्वं। अ

47

बृ·आ·३

अशनायापिपासे प्राणस्येति श्रुतेरितित्रांकृते कथमिति मत्वा कारणस्यैव सूत्रत्वं प्रागस्य
सर्वसंहर्तृत्वान्मृत्युत्वे सति वाक्यशेषोपपत्तिरिति परिहरति। अन्यतर इति। प्रसिद्धमेव प्र
कटयति॥ यो हीति। तथापि प्रसिद्धं मृत्युं हित्वा कथं हिरण्यगर्भोपादानं मत आह बुध्याल
न इति॥ उक्तहेतुं कृत्वा फलितमाह स इति। ननु नतेन जगत आव्रियते मृत्युकारणेनैव तदा
वरणात् तत्कथं वाक्योपक्रमोपपत्तिरत आह तेनेति। ननु हिरण्यगर्भप्रकृते कथं सृरि
नत्रं सत्प्रयोगस्तत्राह। तदिति। मनस इति। वाक्यार्थमधुना कथयति सप्रकृत इति। भूत
सृष्ट्यतिरेकेण भौतिकस्य मनसः सृष्टिरयुक्तेति मत्वा पृच्छति केनेति। अपंचीकृतानां भूता
नां हिरण्यगर्भदेहस्थतानां भागेन लब्धाऽऽत्मकृतात्स्योमनोऽभिव्यक्तिरनिरुद्धेति मत्वा नो
तूतेंउच्यत इति। स्वात्मवत्तस्य स्वाभाविकत्वान्न तदारंभसंनियमिस्यात्त्रां कमनाक्यार्थमाह॥
सोऽहमिति। मनसोऽभिव्यक्तस्योपायोगमाह स प्रजापतिरिति ननु तैत्तिरीयकाणामाकाशादिका

२६

सृष्टिरुच्यते तत्कथमित्यपामादौ सृष्टिवचनं तत्राहाग्नेति। सत्यम्याहिरण्यगर्भकर्तृकसर्गोक्तिः
त्रयाणां पञ्चीकृतानामिति यावत्तान्नाकाशाद्यात्तैत्तिरीये सृष्टिरित्यबाद्योस्तुदितमनुदि
तहोमवद्विकल्पो भविष्यति नेत्याह विकल्पेति। पुरुषतंत्रत्वात्क्रियायामुक्तो विकल्पः
।सिद्धेर्थे तु पुरुषानधीने नासौ संभवत्यतः सृष्टिर्विवक्षिता चेत् आकाशादेव सा युक्ता वि
द्याप्रधानत्वात्तु नादरः सृष्टाविति भावः॥ अश्मात्र सृष्टिवचनमनुपयुक्तं न स्व पुरुषार्थि
रेन प्रजासिध्यतीत्याशंक्याश्वमेधिकाग्नेरर्कनामसिध्यर्थेत्युपयोगमुपन्यस्यति। अ
र्चतेरिति। कोसौ हेतुरित्यपेक्षायामर्चतीति पदावयवस्यारः कृ इति शब्देन संगतिरिति मन्वा
हृनः सन्नाह॥ अर्कत्वमिति। एवं मत्स्योरर्कत्वेपि कथमग्नेरर्कत्वमित्याशंक्य मत्युसंबंधा
दित्याहाग्नेरिति। किमर्थमग्नेरर्कनामनिर्वचनमित्याशंक्या सर्वसंज्ञायोगस्य फलं तराभा
वादुपासनार्थमित्याहाग्नेरिति निर्वचनमेव स्फोरयति अर्चत इति फलवत्वाच्चयोक्ता

भवतोग्नेरुपास्तिरत्र विवक्षितेत्याह य एवमिति। अपामर्कत्वश्रवणान्नाग्नेरर्कत्वमिति शंकते
कः पुनरिति। प्रकरणमाश्रित्य तासामर्कत्वमौपचारिकमित्युत्तरमाह। उच्यत इति। तास्वेत
द्धिरण्मयं मंडलं भवतीति श्रुति मनुरसन्नुपचारे हेतुं तत्रमाह। अप्सु वेति मुख्यमर्कत्वमपां वा
रयतिन पुनरिति। ननु श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्य
मर्थविप्रकर्षादिति प्रकरणादापो वा अर्क इति वाक्यं बलवदिति स्यात्। किं वाक्यसहकृतं प्रकरण
मेव केवलवाक्यात् बलवदित्याशयवानाह न ह्यपतीति चेति। पक्तं तालरसहितासु अप्सु क्षारपा
क्ततासु पृथिवीद्वारा पार्थिवोग्निः प्रतिष्ठित रत्कत्कं रद्रामौ पृथिव्युत्सर्गताभ्यो दर्शयतीतदि
त्यादिना। अप्सु पक्तं तालरसहितासु उत्पन्नासु सतीष्विति सम्यगर्थः। क्षाररवृक्षाररत्कक्रमे
णयाच पेद[illegible] एवेति। संघाते सहकारिकारणमाह तेजसेति। यत्तादिति पदेन संसंकृते
नश्रुतेः कथं तयोः क्षारत्वाद्देन कारणस्योद्भूतत्वाद्वा विना पुल्लिंगेनान्वयस्तत्राह लिंगमस्तेय २

मेति। उक्तानुपपत्तिद्योतनार्थो विशब्दः। अमुमर्थमेवान्वयमेवाभिनयति योयमिति वाक्यतात्प
र्यमाह तात्पर्य इति। स्थूलप्रपंचात्मकविराजः सूक्ष्मप्रपंचात्मकसूत्रात् उत्पत्तिं वक्तु पातनि
कामाह तस्यामिति। उक्तलोकप्रसिद्धिं तु कलयति सर्वो हीति। इदानीं विराडुत्पत्तिमुपदिश
ति। किं तस्येत्यादिना। अग्निशब्दार्थं स्फुटयति सोऽस्येति। तस्य प्रथमशरीरित्वे मानमाह।
स वा इति। विराजो ध्यानार्थमवच्छेदभेदमाह सचेति। कोऽस्य त्रेधात्मा वस्य कर्त्रीति वीप्साया
माह स च मेनेति। कथमेकस्य त्रिधात्वमन्यथा कथमेकत्वमित्याह। कथमिति। महोघटत्रा
सा वा घनेकरूपत्वव विराजो बहुरूपत्वं साधयति अहेत्यादिना॥ कथमग्निं स्तौति यमित्य
श्रुतं कल्प्यते तत्राह सामर्थ्यस्येति वाय्वादित्ययोरिवाग्नेरपि संख्यासरण त्वशाकेर वि
त्रिः एत्वादग्नित्वं तीयम कुरुते स्वप संख्यायते स त्रेधात्मानमिति चोपक्रमादित्यर्थः। ननु
किमयं त्रेधात्मा वो विराट् स्वरूपो पमर्दनं क्रियते न हि तस्मिन् सत्येव सुक्तो विरोधादत आह

51

बृ·आ·३

संचरति। यथा त्वेतं बस्थानुपमर्दनेन मल्लकारणात्परो जायते तथा सर्वेषां प्रत्तानां प्राण
तयासाधारणोप्ययं स्वेनैव रूपतंत्रेणानुगतेन मृत्युरूपेण त्रिधा विभागस्य कृतत्वेचे कृ
स्य बहुरूपत्वविशेधामायाविवदुपनैवेरित्यर्थः। तस्य प्राचीत्यादेस्तात्पर्यमाह तस्येति।
उक्तानि विशेषणानि प्रकरणाविछेदार्थमनूद्यंते। अग्निविषयं दर्शनमिदानीमुच्य
तेचेन्नैवेहेत्यादिसर्वोक्तिमनर्थकमित्याशंक्याह सर्वाहीति स्तुतिमेवाभिनयति इत्थमिति।
कर्मांगस्याग्नेः संस्कर्त्तव्यत्वाच्छित्याग्निशिरसि प्राच्यादिदृष्टिः कर्त्तव्येत्याह तस्येति आ
रोपे सादृश्यमाह विशिष्टत्वेति शिरसोऽनंतरत्वा। विलात्तत्वाद्बाह्वोरैशान्यादिदृष्टिमा
हासौ चेति कथमसौ मंत्राद्वो बाहुवाची स्यान्नं काष्ठात्तदुपपत्तिमाह ईर्मेतिरि। गत्यर्थयो
गादीर्मशब्दो बाहुमभिकरोतीत्यर्थः। तत्सुछादिषु प्रतीच्यादिदृष्टीरध्यस्यति अथेत्यादिना
चितस्याग्नेः शिरसि बाह्वोश्च प्राच्यादिदृष्टिकरणानंतरमित्यर्थः। सक्थियपदं दृष्टानि शे

स्र
२८

न्तताऽस्थिदयविषयं। उपायशब्देन प्रतीचीप्रतीदयं गृह्यते। उरसि पृथिवीदृष्टिमाहरय
मिति। उपास्यमग्निमुक्तमनुवदति स एष इति। तस्य उपासनार्थमेवाप्सु प्रतिष्ठितत्वं
गुणमुपदिशति अग्निरिति। एतांतरसंहितानामपां सर्वलोककारणत्वादग्नेष लो
कात्मकोऽग्निस्तत्र प्रतिष्ठितः संपन्नवतीत्यत्रमुसंतरं संचारयति एवमिति यथैतेषु
लोकेषु सर्वकार्यं प्रतिष्ठितं तथेति यावत् लोकशब्देन स्थूलानां भूतानां संनिवेशं
विन्रोपागरलंतो॥ अप्सु भूतांतरसंहितासु कारणपाभूतास्विति यावत् फलमुक्तिं व्याच
ष्टे यत्रेति। अथोपास्तिफलमप पुनर्मृत्युं जयतीत्यादिना वक्ष्यते किमिदं मस्थाने फ
लसंकीर्तनमत आह गुणेति। उत्तरग्रंथमवतार्य तस्य पूर्वग्रंथेन संबंधं वक्तुं वृत्तं
कीर्तयति सोऽकामयतेत्यादिना। अवांतरव्यापारमंतरेण कर्तृत्वानुपपत्तिरिति मत्वा पृ
च्छति स किंव्यापार इति कामनादिरूपमवांतरव्यापारमुत्तरवाक्यावष्टंभेन दर्शयति॥

उच्यत इति। कामनाकार्यं मनः संयोगमुपन्यस्यति स एवमिति। कोयं मनसा सह वा
चो द्वंद्वभावस्तत्राह मनसेति वाक्यार्थमेव स्फुटयति त्रयी विहितमिति। वेदोक्तस
ष्टिक्रमालोचनं प्रजापतेर्नेदं प्रथमं संसारस्यानादित्वात् इति वक्तुमनुशयः सोका
मयतेत्यादौ सर्वनाम्नो ऽव्यवहितविराड्विषयत्वमाशंक्य परिहरति कोसाविसा
दिना कथं तया मनस्सृक्ष्यते तत्राह अशनायेति किमिति तर्हि पुनरुक्तिरित्याशं
वे क्याह तमेंति। अन्यत्रानंतरप्रकृते विराडात्मनीति यावत्। अवांतरव्यापारांतरमाह
तादित्यादिना प्रासिंचदिरेतो व्यावर्त्तयति ज्ञानेति ननु प्रजापतेर्ज्ञानं का कर्म संपन्नति
तत्रानधिकारादित्याशंक्यासीदित्यस्यार्थमाह जन्मांतर इति। वाक्यस्यापेक्षितं
पूरयन् व्याख्यांतरमादाय व्याकरोति तत्रावेत्यादिना। ननु संवत्सरस्य प्रसंगे न सिद्धे २२
त्वान्न प्रजापतेस्तन्निर्माणेन तदात्मत्वमित्याशंक्योत्तरं व्याक्यमुपपादयन्नेन हपुरेति॥

तथा चेष्टे सर्वमिति। प्रजापतेरादित्यात्मकत्वात्तदधीनत्वाच्च संवत्सरव्यवहारस्यादि
त्यात्सर्वांतानव्यवहारो नास्तीदेवेत्यर्थः। कियंतं कालमंउरूपेण गर्भस्य बहुवत्सापेक्षा
यामाह। तमित्यादिना॥ आवर्तांतरव्यापारमनेकविधमभिधाय विराडुत्पत्तिमाकांक्षा
द्वारोपसंहरति यावानित्यादिना॥ केयं सर्वमेव गर्भतया विद्यमानस्य विराजः स्र
ष्टिस्तत्राह अन्नमिति। विराडुत्पत्तिमुक्त्वा शब्दमात्रस्य स्रष्टिं विवक्षुर्म्मित्युं करोति
तमेवमिति॥ अयोग्येपि पुत्रभक्षणे प्रवर्त्तकं दर्शयति अशनायावत्वादिति विरा
जो भयकारणमाह स्वाभाविकेति। इंद्रियं देवतां च व्यावर्त्तयति वाक्छब्द इति। इदा
नीमृगादिसृष्टिमुपदेष्टुं पातनिकां करोति सरत्यादिना ईक्षणे प्रतिबंधकसद्भावं
दर्शयति अशनायावानपीति अभिसर्वे मन्युतिरिति कृतोस्य पशुनभिमन्यते
नास्य पशून्नभिमन्यते इत्यादिनास्तमत्र प्रमाणयितव्यं। अन्नस्य कनीयस्त्वे काह

55

सू॰ आ॰ २

निरितसारांक्या ह वक्षु ह्याति तथाविविराजोऽभ्यक्षणेक्षति सत्त्वाह। तज्जक्षणेहीति॥ तस्मात्मात्मकत्वात्तदुत्पादकत्वाच्चेति शेषः॥ कारणनिवृत्तौ कार्यनिवृत्तिरित्यत्र दृष्टांतमाह बीजेति। यथोक्तेक्षणानंतरं मिथुनीभावदारात्र यी सृष्टिं प्रस्तौतीत्स एवमिति। ननु विराजः सृष्टस्थावरजंगमात्मनो जगतः सृष्टेरुक्तत्वात्। किं पुनरुक्तेत्याशयेन दृष्ट्वा परिहरति। किंतदिति। गायत्र्यादीनां सादिपदिनोष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगतीछंदास्युक्तानि। केवलानां छंदसां सर्गस्यासंभवात्तदारूढानामृग्यजुःसामात्मनां मंत्राणां सृष्टिरत्र विवक्षितेत्याह स्तोत्रेति॥ उक्तादीनां गीयमानमृग्जातं स्तोत्रं। तदेव होत्रादीनां शंस्यमानं शास्त्रं स्तुतमनुशंसतीति हि श्रुतिः पन्नगीयते न च शस्यतेऽध्वर्युप्रभृतिभिः प्रयुज्यते तद्यजुः श्राद्यमित्यभिप्रेत्यादिपदं॥ अत एव २०
त्रिविधानीत्युक्तं॥ अजादयो ग्राम्याः शेषे वो गवयादयस्त्वारण्या इति भेदः॥ कर्मसाध

नभक्तता नसङ्गेति संबंधः। स मनसा वाचं मिथुनं समभवदिति स्फुटत्वात् प्रागेव त्रय्याः सि
द्धत्वात् तच्च तस्याः सृष्टिः। स्ति हेति त्र्यंकृते। नन्विति। व्यक्ताव्यक्तविभागेन परिहरति नेत्या
दिना। इति मिथुनीभावसर्गयोरुपपत्तिरिति शेषः। अन्नसर्गस्यान्नसर्गस्येति हृदयमु
क्तं। इदानीमुपास्यस्य प्रजापतेर्गुणांतरं निर्दिशति॥ प्रजापतिरित्यादिना॥ कथं मृ
त्योरदितिनामत्वं सिद्धवदुच्यते तत्राह तयाचेति अदितेः सर्वात्मत्वं वदता मंत्रेणा सर्गक्रा
रपास्यमृत्योरदितिनामत्वं सूचितमिति भावः। मृत्योरदितित्वविज्ञानवतोऽवांतरफल
माह सर्वस्येति। सर्वात्मनेति कुतो विशिष्यते तत्राहन्यथेति। सर्वरूपेणावस्थानाभावे
सर्वान्नभक्षणस्याशक्यत्वादित्यर्थः। विरोधमेव साधयति न हीति फलस्योपासना
धीनत्वात् सत्यमदितिनामानमात्मत्वेन ध्यायन् ध्येयात्माभक्तत्वात् तद्रूपत्वमापन्नः सर्व
स्यात्तास्यादित्यर्थः। अन्नमन्नमेवास्य न कदाचित्तदस्यात्तृ भवतीति वक्तुमनंतरवाक्य

57

मादत्ते सर्वमिति। अतएवैतत्कर्तृं व्यक्तीकरोति। सर्वात्मनो हीति। उपास्तिविशेषस्य फ
लेस्तमाप्तिरेव ब्रह्मणस्योचिता। किमुत्तरग्रंथेनेत्याशंक्य प्रतीकमादाय तात्पर्यमा
ह सोऽकामयतेत्यादिना। तेदेवाश्वमेधस्याश्वमेधत्वमिति तदेतं वा कथमिदमाति दि
रूपते। फलयोर्दक्षिणावत्त्वादश्वमेधस्य फलयत्त्वमिति श्राद्धेऽकामयते त्यनेन संबध्यते।
कूपंतु नस्तेन यक्ष्यमाणस्य प्रजापतेर्त्तिमः श्राद्धे किंनहि सत्त्वमश्वमेधमन्वतिष्ठ
न् कर्मानधिष्ठाकारत्वात्तत्राह जन्मांतरेति। तदेवस्पष्टयति स प्रजापतिरिति॥
अथापि तत्तन्मूनि यजमानोश्वमेधस्य फकर्त्रीफ्तदधुना हिरण्यगर्भोस्मि यो यजेयेत्ये
त्याह तथा च कर्त्तृभेदान्नूयःश्राद्धासामंजस्यमतआह सत्त्राचेति। स प्रजापतिरश्वमे
ध वा सनागविद्रिष्टोसान् कर्मफलत्वेन कल्पायैतिर्वृत्तोऽनूयो यजेयेत्याह कर्त्तृफ्लोह्लै क्तो
रैक्येनसाधकफलावस्थयोर्यजमानसूत्रयोर्भेदाभावादित्यर्थः। प्रजापतिरीश्वरोऽनतस्य हे

दुःखात्मककत्वनुष्ठानेछायुक्तेत्याशंक्य प्रकृतिवशात्तदुपपत्तिमभिप्रेत्याह सोऽश्वमेधे
ति कथमेतावताविवक्षितास्तुतिः। सहेत्याशंक्याह। एवमिति। अश्रमकार्यमाह स तप्र
त्ति॥ चक्षुरादीनां यत्रास्त्वहेतुमाह॥ यद्यो हेतुत्वादिति तदेव साधयति तेषु हीति। प्राणा ए
वेति। तथान्नान्द्रार्थः सत्सु हि तेषु शरीरे बलं भवतीति सर्वत्र हेतुरूह्येयः॥ उक्तहेतुं व्य
तिरेकद्वारा स्फोरयति नहीति। प्राणानां यत्रास्त्वं वीर्यत्वं चोपसंहरन्वाक्यार्थमिगम
यति तदेवमिति तत्त्राणोऽग्नि त्वादिव्याचष्टे तदेवमित्यादिना। शरीरान्निर्गतस्य प्रजाप
तेर्मुक्तत्वमाशंक्याह तस्येति। सम्यग्ज्ञानाभावादासंगे सत्यपि न पुनस्तस्मिन्नवेशे
मुक्तः परिश्रयत्वक्तपरिग्रहायोगादिति शंकते सत्तस्मिन्निति। अज्ञानवशात्सदित्यक्तप
रिग्रहोऽपि संभवतीत्याह। उच्चतरति वीतदेहस्य कामनोयुक्तेति शंकते कथमिति।
शामेध्यमीति शायादशरीरस्यापि प्रजापतेस्तदुपपत्तिरिति मन्वानो ब्रूते। मेध्यमिति॥

बृ·आ·२ कामनाफ — माह इति प्रविवेशेति॥ तथापि कूर्पं प्रकृतनिरुक्तिसिद्धिरित्याशंक्याह यस्मा
दिति। यच्छब्दो यस्मादिति व्याख्यातः। देहस्याश्वत्वेपि कथं प्रजापतेस्तथात्वमित्याशंक्य
तत्तादात्म्यादित्याह॥ ततरति। अश्वस्य प्रजापतित्वेन स्तुतत्वात्तस्योपास्यत्वं फलतीति
भावः। तथापि कथमश्वमेधनामनिर्वचनमित्याशंक्याह यस्माच्चेति। ऋतोस्तदात्मक
स्य प्रजापतेरिति यावत्। देहो हि प्राणवियोगादश्वयत्पुनस्तत्प्रवेशाच्च मेधार्होऽभवदतः
सोऽश्वमेधस्तत्तादात्म्यात्प्रजापतिरपि तथेत्यर्थः। ननु प्रजापतित्वेनाश्वमेधस्य स्तुति
र्नोपयोगिनी अश्वेरुपास्यत्वेन प्रस्तुतत्वात्तस्य क्रतूपासनाप्रधानादत आह क्रियेति॥
ननूक्तलिंगस्याश्वस्याश्वमेधक्रत्वात्मनश्चाग्नेरुक्तरीत्या स्तुतत्वात् तदुपास्तौ श्वप्रा
गेनौ क्रतुत्वात्। एष ह वा अश्वमेधमित्यादिवाक्यं नोपयुज्यते तत्राह क्रतुनिर्वर्तकस्ये
ति। उक्तं च चितस्याग्नेस्तस्य प्राची दिगित्यादिना प्रजापतित्वमिति शेषः॥ अश्वोपास ३२

तमग्रकूपासनं चैवक्रमेवेति वस्तुमुत्तरवाक्यमाह तस्यैवेति। य एवमदितेरदितित्वं वेदेसा
दै प्रागेव विहितमुपासनं किंपुनरारंभेणेत्याशंक्याह तर्वत्रेति। यद्यपि विधिरदिति
त्वं वेदेति श्रुतिस्तथापि सगुणोपास्तिविधिर्नप्रधानविधिरत्र तु प्रधानविधिरुपास्ति
प्रकरणत्वाऽदपेक्ष्यतेऽतोऽश्वमेधं वेदेति प्रधानविधिरिति भावः॥ तात्पर्यमुक्त्वा वाक्य
मादायाक्षराणि व्याकरोति एष इति। यथोक्तमित्यकस्य यत्र प्रजापतित्वमनुक्ष्यते
तमनविरुध्येत्यादिप्रदर्श्यमानविशेषणं विधिरत्रस्पष्टो न प्रवृतीत्याशंक्याह।
तस्मादिति अश्वमेधो विशेष्यत्वेन संबध्यते। एवंशब्दात्प्रसिद्धत्वैर्यस्यातिकुतो वि
धिरित्याह कथमिति। एष ह वा अश्वमेधं वेदेत्यादौ विवक्षितस्य विधेर्भूमिकां क
रोति तन्नेत्यादिना। उपास्तिविधिप्रस्तावः सप्तम्यर्थः कथं तु पशुविषयं तौ दर्शनं तद्दर्श
यति तत्रेति। एवमनंतरवाक्ये प्रवृत्ते सतीति यावत्। अथ विवक्षितविधिमपि दधाति।

यस्माच्चेति प्रजापतिरियं फलावस्थायाममन्यते तत्र किंप्रमाणमित्याशंक्य संप्रति
तत्कार्यमिति तासु प्रजासु तथा विधाचेष्टादर्शित्याह तदेवेति। प्रोक्षितं मंत्रसंस्कृतं
पशुमिति यावत्। फलावस्था प्रजापतिवदित्येवं त्वाद्यार्थः। उपासनस्य विधिरुक्तः
संप्रति प्रतीकमादाय तात्पर्यमाह सदेवेति। द्विविधो हि क्रतुः कल्पितपशुहेतु
को वास्तवहेतुकश्च सचाद्विप्रकारोपि फलरूपेणास्थितः सवितैवेति। उपास्तिफ
लं वक्तुमेतद्वाक्यमित्यर्थः। विशेषोक्तिं विनानास्ति बुभुत्सोपपन्नं तित्याह कोसौ
विति। क्रतुफलात्मकः सविता मंडलं देवता चेति संदेहे द्वितीयं स्थलीलात्तस्येत्यादि
त्याचष्टे तस्येति। आदित्योदयानुदयाभ्यामहोरात्रद्वारा संवत्सरव्यवस्थानान्न
न्तोमातुस्तस्य युक्तं तत्राहात्म्यमित्यर्थः। क्रतोरादित्यत्वमुक्त्वा तदंगस्याग्नेस्तद
नुमयमग्निरर्क इति वाक्यं तस्यार्थमाह तस्येवेति। ननु सर्वोक्तस्यैव वाग्नेरादित्यत्वं कुतो ३२

62

नियम्यते ऽन्यश्चाग्निसोमाग्निरन्यश्चाग्निरादित्यः किंतस्यादित्साशंक्याह॥ तस्य चेति। त
था पि कथं तस्यैवादित्यत्वं तत्राह। तथा चेति। तथा प्राचीसादिना लोकगतत्वंच्चिसा
ग्नेरुक्तं तदिहाप्युच्यते तस्मात्तस्यैवान्नादित्यत्वमिष्टमिति सर्वः। अग्न्यादित्यभेदस्य
लोकवेदसिद्धत्वान्न तयोरेकेनक्रतुना तादात्म्यमित्याशंक्याह ताविति। यथा वि
शेषेत तत्वमादित्यरूपत्वं कुतस्येत्ये चार्कस्य क्रतुरूपत्वं साधनत्वेन भेदादित्याशं
क्योपचारादित्याह क्रियात्मक इति। तथापि कथमादित्यक्रतु तादात्म्योक्तिरित्या
शंक्याह ताविति। क्रतुफलत्वान्न तादात्म्यासंविलातद्धेतु अग्निसोग्निस्तावुक्तविषागात्
मुत्पादितोपासनादिव्यापारे संतौ स्वैकैव प्राणाख्या देवतेति तयोरेक्योक्तिरित्य
र्थः। एकैवेत्युक्ते प्रकृतयोरग्न्यादित्ययोरन्ययोरन्यतरपरिशेषंत्वं शंकते। कासेति।
कथं द्वयोरेकत्वेरेकत्वं एकत्वे वा कथं द्वित्वं तत्राह सर्वमपीति। उक्तेर्थे बाध्योपक्रमननु

63

बृ·आ·३ फलमपीति। तथा चेति। स पुनरि सत्र पुनरित्यत्र पुनरपुनरित्यादेरर्थं निगमयति स पुनरिति।
ननु फलकथनार्थमुपक्रम्य प्राणात्मनाग्न्यादित्ययोरेकत्वं वदता प्राक्रांतं प्रस्मृतइति मि २
नेत्याह यः पुनरिति। एकत्वं चिन्तितं। द्वितीयं ब्राह्मणं॥ ब्राह्मणांतरमवतारयति स्व
प्रवेशसंबंधाप्रतीतेन सोस्तीत्याशंक्य पति द्वयाहेत्यस्येति। विवक्षितं संबंधं वक्तुं
वृत्तं कीर्तयति कर्मणामिति। सा का खासापरागतिरिति श्रुतेरुक्ता परागतिर्मुक्तिरि
त्याशंक्याह मत्यात्मभाव इति। अश्वमेधोपासनस्य साश्वमेधस्य केवलस्य वा फ
लमुक्तं नोपास्यं तच्छ्रयां चेत्ताशंक्याश्वमेधफले क्तोपास्यं तराणाकेवलानां समुच्चि
तानां च फलमुपलक्षितमित्याहाश्वमेधेति। वृत्तमनूद्योत्तरब्राह्मणस्य तात्पर्यमा
हाथेति। ज्ञानयुक्तानां कर्मणां संसारफलत्वदर्शनानंतरमिति यावत्। ज्ञानकर्मणोरु २४
त्रावकस्य प्राणस्य स्वरूपं निरूपयितुं ब्राह्मणमिस्कह्याप्योत्थापकत्वे संबंधमुक्तमा

सिपतीतान्विति । मत्कमतिक्रांतौ दीप्यतइति गत्सोरतिक्रममस्योक्तत्वात् । उपासनस्यापि
फलस्य भेदात् सर्वेत्विरयो ज्ञानिकर्मणोर्विषयत्वाद्धितो देद्रूपभेदान्न तत्त्वोक्तयोस्तयोरु
भेवकारणप्रकाशनार्थत्वात्तस्य मित्यर्थः॥ सर्वेत्विरतान कर्मफलत्विदप्यावादेकविषयत्वा
त्तु उभयकप्रकाशनार्थत्वात्तत्प्रयुक्तमिति परिहरति नायमिति । वाक्यशेषविरोधं द्रा
कित्वा दूषयति । नत्वित्यादिना । स्वाभाविकःत्रूणस्त्रानाधे योयोयं पाप्मा विषयासंगरू
पः समस्तस्यास्यातिक्रमणं नाकयत्रोषे कल्पते न हिरण्यगर्भस्यास्य मत्योः । अतः सर्वे
क्तज्ञानकर्मणां तुल्यविषयत्वमेवोत्तरस्त्रान कर्मणोरित्यर्थः । ज्ञानकर्मणोरुक्तावक
त्वं वक्तुं ब्राह्मणमारभ्यतां । आरभ्याधिकातु किमर्थेत्याशंक्य तस्यास्तात्पर्यमाह को
सावितिकथं यथोक्तो ब्राह्मणारभ्याधिकयोरर्थः । ज्ञाक्यो ज्ञातुमित्याशंकां ज्ञों निष्टिपा
द्रराणि व्याकरोति कथमित्यादिना । निपातमेवस्फुटयति वर्तमाने लौ । प्रजापतिरा

65

स॰आ॰२ द्धो नाविहृत्यायजमानं गोचरयतीत्याह वृत्तेति। इंद्रादयो देवा विरोचनादयश्चासुरा इतिशं
कां वारयति तस्मै चेति। याजमानेषु प्राणेषु देवत्वमसुरत्वं च विरुद्धं न। सिध्यतीतिन्नांक
ते वृथ्यमिति। नेषु तदुभयमौपाधिकं साधयति उच्यत इति। शास्त्रानपेक्ष्ययोर्ज्ञानकर्मणो
रुत्पादकमाह प्रसक्ते। तासंनिधानासंनिधानाभ्यां प्रमाणाद्वयोक्तिः॥ स्वेष्वेवासुषु आ
रमणं नामालं भरितं। ततइत्यादिना कथं द्वयं प्राचष्टे यस्माच्चेति देवानामल्पत्वं प्रपंच
यति स्वाविकी हीति। महत्तरत्वे हेतुः। दृष्टप्रयोजनत्वादिति। असुराणां बहुत्वं प्रपंच
यति। शास्त्रजनितेति असुराणां बहुत्वमिति शेषः। तदेव साधयति। अल्पं तेति। उ
भयेषां देवासुराणां मिथः संघर्षं दर्शयति तेदेवाश्चेति। कथ ब्रह्मादीनां स्थावरांता
नां भोगस्थानानां स्पर्धानिमित्तत्वमित्याशंक्य तेषां शास्त्रीयेतरज्ञानकर्मसाध्यत्वा २५
त योश्च देवासुरजयाधीनत्वात्तस्य च स्पर्धात्वं कृत्वा त्परंपरया लोकानां तन्निमित्त

मित्यपास्तिप्रेत्यविज्ञानपरिस्वाभाविकेचेति। कापुनरेषांस्पर्धनाभिलाषांक्याह देवानांचेति॥
लाभेनस्वफलंविदधोति। कदाचिदित्यादिना। अधिकृतैरसुरपराजये देवजये च प्रयति
तव्यमित्यनुश्याह बुभूषाजयफलमाहारायेवमिति। आकांक्षा सर्वकर्मनंतरत्वा कांक्षा राय
व्याकरोति तथेनमित्यादिना। योयमुद्गीथो नामकर्मांगभूतः परार्थः स्तत्कृतुः प्राणस्य स्व
स्वरूपाश्रयणामेव कथंसिद्ध्यतीत्याशंक्याह उद्गीथेति। किंतत्कर्मर्त्विग्वाज्ञानंतदाह कर्मे
ति। तान्येतान्यसतोमासद्गमयेत्यादीनि यजंष्विजयेदिति विधित्स्यमानमिति योजना।
ह्वयाहेत्यादिनज्ञाननिरूपणापरंजपविधिशेषत्वेनार्थवादत्वात् तत्कुतोस्यज्ञानस्य
निरूपमापामिसाक्षिपति। नन्विति। आभिमुख्येनारोहति देवभावमनेनेनेत्याभ्यारो
होमंत्रजपस्तद्विधिशेषार्थवादो न यमाहेत्यादिवाक्यमित्यर्थः उपास्तिविधिश्च नज्ञानस्त
तरंवाकथंनजपविधिशेषइतिदूषयतिनेति। माभूज्जपविधिशेषस्तथाप्युद्गीथे दिलो

बृ॰१आ॰३

ङ्गात्रस्य कर्मणः संनिधाने पुरातनकल्पनाप्रकारस्य द्व्याहेत्यादिनाश्रयणात्तद्विधि
शेषोर्थवादोयमिति चोक्ते उद्गीथेति। नेदं वाक्यज्ञानं चोद्गीथविधिशेषस्तत्प्रकरण
स्यत्वाभावेन संनिध्यभावादिति दूषयति नाप्रकरणादिति। उद्गीथस्तर्हि किंविधीय
तेन खल्वविहितमंगं भवतीत्याह उद्गीथस्य चेति। अन्यत्रेति कर्मकांडोक्तिः। अथोद्गी
येत्कङ्गीथा। विधिरपीह प्रतीयते तत्कथं संनिधिरपोद्यते तत्राह विद्येति। उद्गीथविधि
शेषत्वं वा ज्ञानस्य नास्तीत्यर्थः। इदानीं जपविधिशेषत्वाभावे युक्त्यंतरमाहाभ्यारोहेति।
अनित्यत्वं साधयति। एवं वदिति। प्राणविज्ञानवतामनुष्ठेयो जपो न तद्विज्ञानस्यागस्ति
तन्त्वा सोपश्राङ्गावा प्रागेव सिद्धं विज्ञानं प्रयोजयतीत्यर्थः।। तस्यापि प्राचीनत्वं कथमि
त्याशंक्याह विज्ञानस्य चेति। य एवं विद्वान्पौर्णमासां यजत इति वाक्ये एवं वेदेति विज्ञा
नं श्रुतं न हि प्रयाजादिः पौर्णमासीप्रयोजकं तस्या एव तत्प्रयोजकत्वात् तथा प्राणवित्प्रयो

२६

68

ऽस्योजपीनविज्ञानप्रयोजकस्तस्य स्वप्रयोजकत्वेन प्रागेव सिद्धेरावरपकत्वादित्यर्थः। फलव
त्वात्प्राणविज्ञानं स्वतंत्रं विधित्सितमित्याह। तद्धेति। प्राणोपास्तेर्विवक्षितत्वे हेत्वंतरमाह।
प्राणस्येति। यद्धि स्तूयते तद्विधीयत इति न्यायमाश्रित्योक्तमेव प्रपंचयति नहीति। अतश्च
प्राणोपास्तिरत्र विधित्सितेत्याह मत्स्कमिति फलवचनं प्राणस्यानुपास्यत्वे नोपपद्यते इ
ति संबंधः। उक्तमेव व्यनक्ति प्राणेति। मस्कमोक्षणानंतरं वागादीनां यदग्न्यादित्वं फलं तद
ध्यात्मपरिच्छेदं हित्वोपासितुराधिदैविकप्राणस्वरूपापत्तेरुपपद्यते तस्माद्विधित्सितै
वात्र प्राणोपास्तिरित्यर्थः। उक्तन्यायेन प्राणोपास्तिमुपेत्य प्राणदेवतां मुख्यादिगुणव
तीमाक्षिपति। नवेति। यथा प्राणस्योपास्तिः शास्त्रदृष्ट्यादिलिंगतथास्यगुणसंबंधः
श्रुतत्वादेष्टव्यः। उपास्त्यानुपास्येच गुणावलिप्राणे प्रामाणिकत्वेतरविशेषादिति सिद्धांती
क्तेनान्वेति। प्राणोपास्यत्वेपि मुख्यादिगुणवादस्य स्तुत्यर्थत्वेनार्थवादत्वसंभवान्नय

69.

योक्तादेवतास्यादिति सर्वबाधाह नस्यादिति। शुच्यादिगुणवादस्यार्थवादत्वेपि नाक्तता
र्थवादत्वमिति परिहरति नेति। विशुद्ध्यादिगुणविशिष्टप्राणदृष्टेरत्र फलप्राप्तिः श्रुतान
ज्ञानस्य मिथ्यार्थत्वे युक्ता सम्यग्ज्ञानादेव पुमर्थाप्तिः संभवात्। अतः स्तुतिरपि यथार्थै
वेत्यर्थः। लोकदृष्टांतव्याचष्टे योहीति। इहेति वेदारस्य दार्ष्टांतिकोक्तिः। ननु विशुद्ध्यादिगु
णवतीं देवतां वदंति वाक्यावैदन्त्युपासनाविध्यर्थत्वात् न स्वार्थे प्रामाण्यं प्रतिपद्यते
तत्राह नचेति। अन्यपराणामपि वाक्यानां मानांतरसंवादयोरसतोः स्वार्थे प्रामाण्य
मनुभवानुसारिभिरिष्टव्यमित्यर्थः। न तु प्राणस्य विशुद्ध्यादिवादेन स्वार्थे मानं अन्य
परत्वादादित्ययूपादिवाक्यवदत आह नचेति। आदित्ययूपादिवाक्यार्थज्ञानस्य प्रत्य
क्षादिनापवादवद्विशुद्ध्यादिगुणविज्ञानस्यनापवादः श्रुतस्तस्माद्विशुद्ध्यादिवादस्य
स्वार्थे मानत्वमप्रत्यूहमित्यर्थः। विशुद्ध्यादिगुणकप्राणविज्ञानात्फलश्रवणात्तद्वादस्य ३७

यथार्थत्वमेवेत्युपसंहरति तत इति। लोकवद्वेदेऽपि सम्यग्ज्ञानादिप्राप्तिरनिष्टपरिहा
रश्चेत्यन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेनापि समर्थयते विपर्ययस्त्वेत्यादिना शास्त्रान
र्थत्वमिष्टमिति शंकां निराचष्टे नचेति। अपौरुषेयस्यासंभावितसर्वदोषस्याशेषपुरुषार्थ
हेतोः शास्त्रस्यानर्थार्थत्वमेष्टुमशक्यमित्यर्थः॥ शास्त्रस्य यथाभूतार्थत्वं निगमयति त
स्मादिति। उपासनार्थं ज्ञानार्थं चेति शेषः॥ शास्त्राद्यथार्थप्रतिपत्तेः श्रेयःप्राप्तिरित्यत्र व्य
दा भिचारं चोदयति नामाविति। तदेव स्फुटयति स्फुरमिति। अब्रह्मणि ब्रह्मदृष्टिरतस्मिंस्तद्बु
द्धित्वान्मिथ्याधीः सा च यावन्नाम्नो गतमित्यादिश्रुत्या फलवती ततः शास्त्राद्यथार्थप्रति
पत्तेरेव फलमित्ययुक्तमित्यर्थः॥ नन्वेदाग्रहः सर्वकोऽन्यस्यान्यात्मतावभासो मिथ्याज्ञानं
अत्र तु भेदे भासमाने न्यत्रान्यदृष्टिर्विधीयते यथा विष्णोर्भेदे प्रतिमायां स्फुरमाणे तत्र
विष्णुदृष्टिः क्रियते तन्नेदं मिथ्याज्ञानमित्याह नेति। नमर्थं स्पष्टयति नामादाविति। प्रमत्र

बृ.आ.३

र्वकं हेतुं व्याचष्टे कस्मादिति। प्रतिमायां विष्णुदृष्टिं प्रसालंबनत्वमेव न विष्णुतादात्म्यं नामादे
स्तु तादात्म्यं श्रुतमिति वैषम्यमाशंक्याह आलंबनत्वेनेति॥ उक्तमर्थं वैधर्म्यदृष्टांतेन स्प
ष्टयति यथेति। कर्ममीमांसको ब्रह्मविद्वेषं प्रकटयन् प्रत्यवतिष्ठते ब्रह्मेति। किं वक्ता तद्दृष्टि
रेव नाम्नि चोद्यते चोदनं वस्तुत्र फलं संस्पृशति ब्रह्म तु नास्ति मानाभावादित्यर्थः॥ अथ यथ
था देवानां प्रतिमादिरूपास्यमानानामस्त्यत्र सत्त्वं तथा ब्रह्मणो नामादावुपास्यत्वादस्त
त्रसत्त्वं भविष्यति। तामाशंक्याह एतेनेति। नामादौ ब्रह्मदर्शनेति नैयावत्॥ दृष्टांतासि
द्धेर्न कापि ब्रह्मास्तीति भावः। स्यन्यत्र ज्ञानादिलक्षणं ब्रह्म नास्तीत्ययुक्तं सदेव सोम्येद
मग्र आसीदित्यादिश्रुतेरित्याह नेति किंच ब्रह्मदृष्टेः सत्स्वर्थान्तरास्त्रीयदृष्टित्वात् इयमे
व स्त्रिः सामेदृष्टिवदित्याह ऋगादिष्विति विद्यमानेति। तावि दृष्टिभिः सामान्यदृष्टित्वं त ३०
स्मादिति यावत्। वस्तुदृष्टांतासिद्धिरिति तत्राह एतेनेति। ब्रह्मदृष्टेः सत्सार्थत्ववचनेनेति यावत्॥

ब्रह्मास्तित्वे हेतुं तत्र माह मुख्यापेक्षत्वादिति। उक्तमेव विवृणोति पंचेति। पंचाग्नयो द्युपर्जन्यपृ
थिवीपुरुषयोषितः। आदिपदं चाग्न्येन्वादिग्रहणार्थं। ननु वेदांतवेद्यं ब्रह्मेष्यते न च तेष्वास्त
द्धीः। सिध्यति तेषां विधिवैधुर्येणाप्रामाण्यात् तत्कुतो ब्रह्मसिद्धिरित्यर्थः॥ सिद्धसाध्यार्थ
त्वे देनत्वेषम्यार्थद्विशिष्टत्वमनिष्टमित्याशंक्योक्तं विवृणोत्युक्तं विवृणोति। यथा चेति। वि
शिष्टत्वं स्वरूपोपकारित्वं फलोपकारित्वं च पंचमोक्तप्रकारं परामृष्टमेवमित्यादिषुं। अ
लौकिकत्वं साधयति प्रत्यक्षादीति। किंच वेदांतानामप्रमाण्यं बुध्यनुत्पत्तेर्वा संशयाद्यु
त्पत्तेर्वा नाद्य इत्याह न चेति। न द्वितीय इत्याह न चानिश्चितेति। कोटिद्वयास्पर्शित्वाद
बाधाच्चेत्यर्थः॥ क्रियार्थैर्वाक्यैर्विध्यार्थैर्नावाक्यानां सामर्थ्यं धर्म्यमुक्तमाक्षिपति॥
अनुष्ठेयेति। साधर्म्यस्यायुक्तत्वमेव व्यनक्ति क्रियार्थैरिति। वाक्योत्थबुद्धेर्यथार्थत्वा
द्विध्यभावेपि वाक्यप्रामाण्यं अज्ञापकत्वेनाविरुद्धमिति परिहरति न ज्ञानस्येति। अनुष्ठे

73

यनिष्ठत्वमंतरेण कुतो वस्तुनि प्रयोगप्रत्ययौ येस्तथार्थत्वमित्याशंक्य तयोर्विषयतया
त्वार्थं तदपेक्षास्वप्रामाण्यार्थं वेति विकल्प्याद्यं दूषयति नेति। तदुक्तस्य विषयस्य कर्त्तव्या
र्थस्य तथात्वं न कर्त्तव्यतापेक्षं किंतु मानगम्यगत्वात्। अन्यथा विप्रलंभकविधिवाक्येपि
तथात्वोपपत्तेरित्यर्थः। द्वितीयं प्रत्याह नेति। बुद्धिग्रहणं प्रयोगोपलक्षणार्थं। कर्त्तव्यतार्थ
विषयप्रयोगादेर्नानुष्ठेयविषयत्वात् मानत्वं किंतु प्रमाकरणत्वात्तज्जन्यत्वाच्च। अ
न्यथोक्तातिप्रसक्तितादवस्थ्यात्। अतोनुष्ठेयनिष्ठत्वं मानत्वेऽनुपयुक्तमित्यर्थः। कुतस्त
र्हि कार्यकामधिया। वित्याशंक्याह वेदेति। वैदिकस्यार्थस्याबाधेन तथार्थत्वसिद्धेः। समी
हितसाधनत्वविशिष्टं चेद्वस्तु तदा कर्त्तव्यमिति धियानुतिष्ठति तच्चेदनिष्टसाधनाविशि
ष्टं तदा न कार्यमिति धिया नानुतिष्ठत्यतो मानस्यानुष्ठानानुष्ठानहेतू कार्याकार्यधिया ३२
वित्यर्थः। तथापि ब्रह्मणो वाक्यार्थत्वं पदार्थत्वं वा नाद्य इत्याह अनुनेष्ठेयत्वाति। तस्याकार्य

74

त्वेपि वाक्यार्थत्वं किं न स्यादित्याशंक्याह न हीति। उपपद्यन्नासत्ती।ति छेदः। द्वितीयं दूषयति।
पदार्थत्वेति। ब्रह्मणः शास्त्रार्थत्वमेतदुच्यते। कार्यमिष्टे चेद्वाक्यप्रामाण्यं दृष्टांतेन साध
यति नेत्यादिना। शुक्लं लक्ष्लोहितमिश्रलक्षणं वर्णचतुष्टयं तद्विशिष्टो मेरुरस्तीत्यादिप्र
योगे मेर्वादिवत्कार्येपि सम्यग्धारर्शनात् तत्वमसीवाक्यादपि कार्यास्पृष्टे ब्रह्मणि सम्यग्ज्ञा
नासिद्धिरित्यर्थः। दृष्टांतेपि कार्यधीरेव वाक्यादुदेतीत्याशंक्याह न चेति ननु तत्र क्रियापदाध्या
नापरसंगतिर्युक्ता वेदांतेषु पुनस्तदभावात् पदसंहत्ययोगात्कुतो वाक्यप्रमाणकत्वं ब्रह्म
णः संभवतीति तत्राह तथेति। विमतं अफलं सिद्धार्थज्ञानत्वात् संमतवदित्यनुमानान्
न तत्वमादेः सिद्धार्थस्याप्युक्तं मानत्वमिति शंकते मेर्कीदृति। श्रुतिर्विरोधेनानुमानं धुनो
तीत्यादिना। विद्वदनुभवविरोधाच्च नैवमित्याह संसारेति। फलश्रुतेरर्थवादत्वेनामा
नत्वादनुमानाबाधकतेत्याशंक्याह नान्येति। पर्णमपीत्यधिकरणन्यायेनानुक्तं फलश्रुते

ब्र·आ·३ रर्थवादत्वं युक्तं ब्रह्मविधियोन्यत्रशेषत्वप्रापकाभावात् तत्फलश्रुतेरर्थवादत्वासिद्धिरन्यत्रा
शारक्रानारंभः स्यादित्यर्थः श्रुत्यनुभवाभ्यांजाक्योस्य ज्ञानस्य फलं न त्वदृष्टं युक्ताकायस्थि
देर्थेतित्वमस्यादेर्मनितेत्युक्तं। संप्रतिज्ञास्त्रस्य कार्यपरत्वानियमे हेत्वंतरमाह प्रतिषिद्धे
ति। यद्यपि कलंजभक्षणादेरधःपातस्य च संबंधेन कलंजं भक्षयेदित्यादावोदिक्यात्वती
यते तथापि तस्यानुष्ठेयता वाक्यस्यानुष्ठेयनिष्ठत्वासिद्धिरित्याशंक्याह नचेति। संबंध
स्याभावार्थत्वान्नानुष्ठेयतेत्यर्थः। अभक्षणादिकार्यमिति विधिपरत्वमेव निषेधवाक्य
स्य किं न स्यादित्याशंक्याह। नचेति। तस्यापि कार्यार्थत्वे विधिनिषेधभेदभंगान्नञश्च
संबंध्यभावबोधने मुख्यस्यार्थांतरे वृत्तौ लक्षणापातात् न निषिद्धविषये रागादिना प्रवृ
त्तक्रियायत्तो निषेधशास्त्रार्थधीसंस्कृतस्य निषेधश्रुतेरकरणात्प्रसक्तक्रियानि ३८
रसुपत्वसितादेदाक्तौन्यायान्यदनुष्ठेयं न प्रतिभातीत्यर्थः। भावविषयं कर्तव्यत्वं विधाना

मर्थेऽशिषाव विषयं तु निषेधानामिति विशेषमानां कथाह। अकर्त्तव्येति। अभावस्य प्रमाणार्थत्वा
भावात्कर्त्तव्यताविषयत्वासिद्धिरिति हिन्साद्यर्थः॥ प्रतिषेधस्थानवतोपि कलंजभक्षणादि
ज्ञानदर्शनात्तन्निवृत्तेर्नियोगधीनत्वात्तन्निष्ठमेव वाक्यमेष्टव्यमिति चेन्नेत्याह सुधा
र्तस्येति। विषलिप्तबाणहतस्य पशोर्मांसं कलंजं ब्रलवधाद्यप्तिनापयुक्तस्यान्नपाना
दि तस्मिन्नपस्ये अशोऽप्येव प्राप्ते यद्भ्रमशानं कृत्स्नामस्योत्पन्नं तन्निषेधधीसंस्कृतस्य
तदास्यात्साध्यमिति तत्र लौकिकं दृष्टांतमाह मृगतृष्णिकायामिति। तथापि प्रवृत्तस्याव
सिद्धये विधिरर्थतामिति चेन्नेत्याह तस्मिन्निति। तद्भावः प्रवृत्तस्याभावो न विधिजन्य
प्रयत्नसाध्यो निमित्ताभावेनैवासिद्धेरित्यर्थः दृष्टांतमुपसंहरति। तस्मादिति। दृष्टां
न्ति क्रमाह तथेति। न केवलं तत्वमस्यादिवाक्यानां सिद्धवस्तुमात्रपर्यवसानता किंतु स
र्वकर्मनिवर्त्तकमपि सिध्यतीत्याह तथेति। अकर्त्तृत्मोक्षत्वेत्याहमिति ज्ञानसंस्कृतस्य प्र

वृत्तीनामभावः स्यादिति संबंधः। तस्माद्दृष्टस्याबाधाद्विपरीतार्थेयस्य कर्त्तृत्वादिज्ञानस्य
तन्निमित्तानामनर्थार्थत्वेन ज्ञायमानत्वादिति हेतुः। कदा पुनस्तासामभावः स्यादित आह
परमात्मादीति। भ्रांतिप्राप्तप्तक्षणादिविरासेन निवृत्तिविषयतया निषेधवाक्यमानत्वं।
तत्त्वमादेरपि न्यायगतानोत्यकर्त्तृत्वादिनिवर्त्तकत्वेन मानत्वोपपत्तिरिति समुदायार्थः।
दृष्टांतदार्ष्टांतिकयोर्वैषम्यमाशंक्याह। नन्विति तस्य निषिद्धत्वादनर्थार्थत्वमेव वस्तु
याथात्म्यं तज्ज्ञानेन निषेधे कृते तत्संस्कारद्वारासंपादितस्यन्यायशास्त्रीयज्ञानविपरी
तज्ञाने बाधिते तत्कार्यप्रवृत्त्यभावो निमित्ताभावे नैमित्तिकाभाववन्न्यायेन युक्तो न
तथाग्निहोत्रादिप्रवृत्त्यभावो युक्तो ब्रह्मविदाग्निहोत्रादि न कर्त्तव्यमिति निषेधानुपलं
भादित्यर्थः। तत्त्वमस्यादिवाक्यवाच्यान्निषिद्धमप्यग्निहोत्रादीति मन्वानः साम्यमाह नेत्या
दिना। शास्त्रीयप्रवृत्तीनां गर्भवासादिहेतुत्वादनर्थार्थत्वमहं कर्त्तेत्याद्यभिमानकर्तृत्वेन ५

विपरीतज्ञाननिमित्तं। एतदेव दृष्टान्तावष्टंभेन स्पष्टयति कृत्स्नेति। काम्यानामज्ञानहेतु-
त्वानर्थार्थत्वाभ्यां विदुषस्तेषु प्रवृत्त्यभावो युक्तो नित्यानां तु शास्त्रमात्रप्रयुक्तानुष्ठान-
त्वान्नाज्ञानकृतत्वं प्रत्यवायाख्यानर्थध्वंसित्वाच्च नार्थजनकत्वं अतस्तेषु प्रवृत्त्यभावो यु-
क्तो न भवतीति। कृत्स्नेति। नित्यानां शास्त्रमात्रकृतानुष्ठानत्वमसिद्धमिति परिह-
रति नेत्यादिना। तथैव देव प्रपंचयति यथेति। अविद्यादित्यादिना वेदनास्मितादिचतुष्टयोक्तिः।
तैरविद्यादिभिर्जनिते दृष्टप्राप्तौ तादृगनिष्टप्राप्तौ च क्रमेण रागद्वेषवतः पुरुषस्येष्टप्राप्ति-
मनिष्टपरिहारं च वांछतस्ताभ्यामेव रागद्वेषाभ्यामिष्टं मे स्यादनिष्टं मा भूदित्यवि-
शेषकामनाभिः प्रेरिता विशेषप्रवृत्तियुक्तस्य नित्यानि विधीयंते स्वर्गकामः पशुका-
म इति विशेषार्थिनः काम्यानि तुल्यं तूभयेषां केवलशास्त्रानिमित्तत्वमित्यर्थः किंच का-
म्यानां दुष्टत्वं ब्रुवता नित्यानामपि तदिष्टं। उत्पत्तिविनियोगप्रयोगाधिकारविधिरूपे वि

7a

आ·हृ·२

शोकाभावादित्याह। नचेति। कथं तर्हि काम्यनित्यविभागस्तत्राह कर्त्तृगतेनेति। स्वर्गकामः पशुकाम इति विशेषार्थिनः काम्यविधिः। इष्टं मे स्यादनिष्टं मा भूदित्यविशेषकामप्रेरिताविशेषितप्रवृत्तिमतो नित्यविधिरित्यर्थः। नन्वविद्यादिदोषवतो नित्यानि कर्माणीत्ययुक्तं परमात्मज्ञानवतोऽपि यावज्जीवश्रुतेस्तेषामनुष्ठेयत्वादित्याशङ्क्य श्रुतेरविरक्तविषयत्वान्नैवमित्याह न परमात्मेति। योगारूढस्य तस्यैव शमः कारणमुच्यत इति। स्मृतेर्ज्ञानपरिपाके कारणं कर्मोपशम एव प्रतीयते न तथा कर्मविधिरित्यर्थः। न केवलं विहितं नोपलभ्यते न संभवति चेत्याह कर्मनिमित्तेति। यदा नासि त्वं संसारी किंतु अकर्त्रभोक्तृब्रह्मासीति श्रुत्या ज्ञाप्यते तदा देवतायाः संप्रदानत्वं करणत्वं व्रीह्यादेरित्येतत्सर्वमुपमर्दितं प्रवृत्तितत्कथमकर्त्रादितानवतः संभवति कर्मविधिरित्यर्थः। उपमर्दितमपि वासनावशाद्भविष्यति ततश्च विदुषोऽपि कर्मविधिः स्यादित्याशङ्क्याह। नचेति।

वासनावशादुत्पन्नस्याभासत्वादात्मस्मृता पुनः पुनर्बाधाच्च विदुषो न कर्मप्रवृत्तिरित्यर्थः
किंचानवच्छिन्नब्रह्मास्मीति स्मरतस्तदात्मकस्य देहादिसापेक्षं कर्म निरवकाशमि
त्याह नहीति। विदुषोपि स्फाटनादिवत् कर्मविसरः स्यादिति शंकते भोजनादीति। अपक्षे
रोक्षज्ञानवतो वा परोक्षज्ञानवतो वा भोजनादिप्रवृत्तिर्नोघो नस्तूपगमात् तत्त्वतो
ते बाधितानुवृत्तिमात्रत्वात् अग्निहोत्रादेरबाधिताभिमाननिमित्तस्य तथात्वानु
पपत्तेरित्यपि प्रेत्याह नेति न द्वितीयः परोक्षज्ञानिनः शास्त्रानपेक्षक्षुत्पिपासादिदो
षकृतत्वात् तत्प्रवृत्तेरिष्टत्वात् इत्याह विद्याहीति। अग्निहोत्राद्यपि तथा स्यादिति चे
त्नेत्याह नन्विति। भोजनादिप्रवृत्तेरावनूपकत्वानुपपत्तिं विवृणोति केवलेति। ननु तथे
त्यादि प्रपंचयति। शास्त्रनिमित्तेति। तर्हि शास्त्रविहितकालाद्यनपेक्षत्वान्निता नाम
दोषप्रभवत्वं भवेदित्याशंक्याह। दोषेति। एवं दोषकृतत्वेपि नित्यानां शास्त्रसापेक्षत्वा

त्कालाद्यपेक्षत्वात्कालाद्यपेक्षत्वमपि विरुद्धमित्याह एवमिति। भोजनादेर्दोषकृतत्वेपि नि
त्यानां शास्त्रसापेक्षत्वात्कालाद्यपेक्षत्वमविरुद्धमित्याह एवमिति। भोजनादेर्दोषकृ
तत्वेपि चातुर्वर्ण्यं चरेद्भैक्षं यतीनां च चतुर्गुणमित्यादिनियमवद्विदुषामग्निहोत्रादि
नियमोपि स्यादिति शंकते तत्र भोजनादीति। विदुषो नास्ति भोजनादिनियमोऽतिक्रां
तविधित्वात्तन्नचैतावतास्यथेष्टचेष्टापत्तिः। अधर्माधीनाविवेककृता हि सा न सौतो
विदुषो विद्यतेऽविद्यावस्थायामप्यसती यथेष्टचेष्टा विद्यादशायां कुतः स्यात् सं
स्कारस्याप्यभावाद्बाधितानुवृत्तेश्चाग्निहोत्रादेस्तु नाभासत्वान्न बाधितानुवृ
त्तिरित्याह नेति। किंच विदुषां विविदिषूणामेव नियमस्तेषां विधिनिषेधगोचरत्वा
त्तन्न च तेषामप्येषणानोदयपरिपंथी तस्यात्यनिवृत्तिरूपस्य स्वयं क्रियात्वाभावात्त
नापि सक्रियामाक्षिपन् ब्रह्मविद्यां प्रतिक्षिपति अन्यनिवृत्त्यात्मनस्तदाक्षेपकत्वासि

दै रित्याह नियमस्येति। कर्मसु रागादिमतोऽधिकारात् विरक्तस्य ज्ञानाधिकारात् निनो हे
त्वभावादेव कर्माभावात् तस्य भोजनाद्यनुल्पत्वात् तत्त्वमारेः सर्वव्यापारोपरमात्म
कज्ञानहेतोर्निर्वर्त्तकत्वेन प्रामाण्यं प्रतिपादितमुपसंहरति। तस्मादिति। तस्य विधिरू
त्पादकं वाक्यं तस्य निषेधवाक्यवत्तत्त्वज्ञानहेतोस्तद्विरोधिमिथ्याज्ञानध्वंसित्वाद
शेषव्यापारनिवर्त्तकत्वेन कूटस्थवस्तुनिष्ठस्य युक्तं प्रामाण्यं मिथ्याज्ञानध्वंसहे
त्वभावे फलाभावस्याभेन सर्वकर्मनिवृत्तेरित्यर्थः। तस्य दोषापात्तं हेतुमेवस्य ष्टयाति।
कर्मप्रवृत्तीति। यथा प्रतिषेधे हननादौ प्रतिषेधशास्त्रवशात्तदभावस्तथा तत्त्व
मस्यादिवाक्यसामर्थ्यात्कर्मस्वपि प्रवृत्त्यभावस्य तुल्यत्वात्प्रामाण्यमपि तुल्यमित्य
मूलस्थ २ र्थः प्रतिषेधसाम्येन तत्त्वमस्यादिशास्त्रस्योच्यमाने तथैव निवृत्तिनिष्ठत्वे स्यात् न व
स्तुप्रतिपादकत्वमित्याशंक्याह तस्मादिति। प्रतिषेधा हि प्रसक्तक्रियां निवर्त्तयंतस्तु

83

दे·आ·३ पलक्षितोदासात्म्यात्मके वस्तुनि पर्यवस्यंतीति तथा तत्त्वमस्यादिवाक्यस्यापि वस्तुप्रतिपादकत्वमविरुद्धमित्यर्थः वेदांतानां सिद्धे प्रामाण्यवत् अर्थवादादीनामन्यं परापामपि संवादविसंवादयोरभावे स्वार्थे प्रमाणत्वसिद्धेः सिद्ध्या विग्रहादिगुणवती प्राप्ता देवतेति चकारार्थः। ज्ञानमिह परीक्ष्यमाणमित्येतत् प्रसंगागतं विचारं परिसमापयते हवाचमित्यादिनाचष्टे। ते देवा इति। अचेतनायागादौ नियोज्यत्वं वारयति। नागभिमानिनोमिति। नियोक्तृणां देवानामभिप्रायमाह वागेवेतीति। नन्वौरुत्रं कर्मजपमंत्रप्रकाश्या देवता निर्वर्तयिष्यति ननु कागेदेवतेति तत्राह तामेवेति। असतो मा सद्गमयेति जपमंत्राभिधेयां हृ एवं त इति पूर्वेणासंबंधः॥ वागाद्याश्रयं कर्तृत्वादि दर्शयतोऽर्थवादस्य प्रासंगिकं तात्पर्यमाह नचेति। आश्रये कर्तृत्वादेव वक्ता समाने तस्या वागाद्याश्रयत्वमयुक्तमित्याह कस्मादिति परस्य जीवस्य वा कर्तृत्वादिस्तदाश्रयो यस्मात्प्रतीतस्तस्मात्पर

स्यात्मनः स्वतस्तच्छक्तिमन्यस्य न तदाश्रयत्वमित्यर्थः। किंचाविद्याश्रयः सर्वोऽपि व्यवहारो
न तद्धीने परस्मिन्नवतरतीत्याह तद्विषम इति। कर्त्ता शास्त्रार्थवत्त्वादिति न्याये न कर्तृत्वमा
त्मनोऽङ्गीकर्त्तव्यमित्याद्यं व्याख्याय यथा च तक्षोभयथेति न्यायादौपाधिकं तस्मिन्कर्तृत्व
मित्यपि प्रसाह बृहस्पति हीति। यदुक्तमविद्याविषयः सर्वो व्यवहार इति तत्र वाक्यशेष
मनुकूलयति हापीति। एतच्च परस्मिन्नात्मनि कर्त्तृत्वादिव्यवहारो नास्तीत्याह अव्या
कृतादिति अनामरूपकर्मात्मभूमि तस्मादुपरिष्टात्तत्पदमध्याहर्त्तव्यं। पृथगविद्या
विषयात्क्रियाकारकफलजातादिति शेषः। साक्षात्परमात्मा कर्त्तृत्वाद्याश्रयो जीवस्तु
स्यादिति द्वितीयमाशंक्याह॥ यत्त्विति। जीवत्वावच्छिन्नस्य विशिष्टस्य कल्पितत्वात्तन्न तात्त्वि
कं कर्त्तृत्वादिकं किंतु तद्द्वारा स्वरूपे समारोपितमिति भावः॥ आत्मनि तात्त्विककर्त्तृत्वा
द्यभावे फलितमर्थवादतात्पर्यमुपसंहरति तस्मादिति तात्पर्यमर्थवादस्योक्तमित्युक्त

85

यावाग्देवतया यत्कर्तृत्वं तदुपन्यस्यति तथेत्यादिना। तुष्कात्त्वं जपमंत्रप्रकाशयत्वं चात्मनो गीतृ
त्ववागुष्ठाने प्रवृत्ता चेत्तया कश्चिदुपकारो देवानामुष्ठानेन निवर्त्तनीयः स च नास्तीति
त्रंकृते कः पुनरिति। वदनादिव्यापारे सति यः सुखविशेषः संघातस्य निष्पद्यते स एव
कार्यविशेष इत्याह। उच्यत इति। यो वाचीति प्रतीकमादाय व्याख्यायते। कथं पुनर्वाचो
वचनं चक्षुषो दर्शनमित्यादिना निष्पन्नं फलं सर्वसाधारणमित्याशंक्यानुपपत्रमनु
सत्याह सर्वेषामिति। किंच देवार्थमुष्ठायं त्या वाचः स्वार्थमपि किंचिदुष्ठानमस्ति। तथा
च ज्योतिष्टोमे द्वादशस्तोत्राणि तत्र त्रिषु पवमानाख्येषु स्तोत्रेषु याजमानं फलमुष्ठानेन कृ
त्वाऽवशिष्टेषु नवसु स्तोत्रेषु यत्कल्याणवदनसामर्थ्यं तदात्मने स्वार्थमेवागायदित्या
हतं सोमामिति॥ ऋत्विजां क्रीतत्वान्न फलसंबंधः संभवतीत्याशंक्याह वाचनिकमि
ति। अथात्मनेऽन्नाद्यमागायेदिति श्रुतमित्यर्थः। कल्याणवदनसामर्थ्यस्य स्वार्थत्वं समर्थयते

तद्धीति। कल्याणवदनं वाचो साधारणं चेत् कस्तर्हि यो वाचीत्यादेर्विषयस्तत्राह यत्त्विति। आग्दे
वतायामसुराणामवकाशं दर्शयति तत्रेति। स्वार्थे परार्थे चोत्काले सतीति यावत्। कल्याणव
दनस्यात्मनावान्वैकसंबंधो योयमासंगोपि निवेशः स एवावसरो देवतायास्तमवस
रं प्राप्येत्यर्थः। अवसरमेव व्याकरोति। रंध्रमिति। असमानतीयेति संबंधः ॥ कोसावसु
यसं ५ रास्यैस्त्वं व्याचष्टे स्वाभाविकमिति। तत्रोपायमुपन्यस्यति ज्ञात्वेति। असुराणामपि भयहे
नागत्मनादेवाः स्थास्यंतीति विवक्षायामाह स यः स पाप्मेति। प्रतिषिद्धवादनमेव पाप्मेत्य
मुक्तमदृष्टस्य क्रियातिरिक्तत्वांगीकारादित्याशंक्याह यदेवेति। असत्यस्य सभ्यानर्हस्यानीर
र्वचनादिवीभत्सस्य पापात्मकत्वेनादिवर्णकेनं अनृतमयथादृष्टवचनं आदिग्राह्यमिति मु
न्नत्वं गृह्यते। किमत्र प्रजापतेर्वीचिपाप्मसत्वेमानमुक्तं भवतीत्याशंक्य स एव पाप्मे
तिव्याकरोति। प्राजापत्यासु प्रजासु प्रतिपन्नो नासत्यवदनादिना लिंगेन तद्वाचिपाप्मानु

87

बृ॰ आ॰ ३

मीयते। विमतं पाप्मपूर्वकं प्रतिकूलधीविषयत्वात् दुःखवत्। यः स पाप्मा प्रजावाच्यनुमितः
स एव प्रजापतिवाग्विपाप्मानं गमयतीति विमतं कारणपूर्वकं कार्यत्वात् घटवत् न च
प्रजागतं दुरितं प्राजापत्यं तद्भिनाहेत्वंतरादेव स्यात् कारणानुविधायित्वात् कार्यस्य।
न च तत्कारणोपि परस्मिन् प्रसंगो पाय विदमिति श्रुतेः॥ ननु न ह वै देवान्पापं गछतीति
श्रुतेर्निसत्त्रेति पि पापवेधः तस्य फलत्वावस्थस्यापापत्वेनैपि यजमानावस्थस्य तज्ञावादि
सर्पिः॥ आद्यसकाराभ्यां कारणस्थपाप्मानमनद्यतस्यैव कार्यावस्थत्वमुच्यते। उत्त
राभ्यां तु कार्यस्थं पाप्मानमनद्यस्यैव कारणस्थत्वमिति विभागः। वाग्देवताबाज
पमंत्रप्रकाश्यत्वमुपास्यत्वं चनेति निर्धार्याअवशिष्टपर्यायचतुष्टयस्यतात्पर्य
माह तथैवेति। परीक्षाफलनिर्णयमाह देवानां चेति। अनुपपत्ते हेत्वंतरमाह। इतरे
ति। इतरः कार्यकारणसंघातस्तस्मिन्नव्यापकत्वं परिच्छिन्नत्वं परिच्छिन्नत्वं अतस्मानु

पास्यत्वं तत्पमंत्रप्रकाश्यत्वं चेत्यर्थः। उक्तैरिंद्रियैरनुक्तेंद्रियाण्युपलक्षणीयानीति विवि
क्षितोपसंहरति एवमिति। वागादिवत्त्वगादिषु कृत्स्नकार्याभावान्न पाप्मवेधोस्तीत्याशंक्या
ह। कल्याणेति। पाप्मभिरुपासृजन्पाप्मना विध्यन्नित्यनयोरस्ति पौनरुक्त्यमित्याशंक्य वा
ख्यानव्याख्येयभावान्नैवमित्याह रतीति यदुक्तमिति संप्रति मुख्यप्राणस्य मंत्रप्रकाश्यत्व
मुपास्यत्वं च वक्तुमुत्तरवाक्यमुपादाय व्याकरोति वागादीति क्रमेणोपासीनामिति संबं
धः। वागादिषु नैशत्र्यपानंतर्यमथशब्दार्थः। विवक्षितार्थज्ञापको साधारणो देहलदवय
वव्यापारेति नियमः। दोषाणां संसर्गिणां दोषेणासंसृष्टं कर्तुमिच्छा कुतोऽजायतेत्याशंक्याह।
स्वेनेति। तदभ्यासानुवृत्त्या तस्य पाप्मसंसर्गकरणस्याभ्यासवशात्तद्रति यावत्। उक्त
मर्थं दृष्टांतेन स्पष्टयति कथमित्यादिना। असुरनाशेन संगमनित्तपाप्मविधोशहेतुमाह
असंसर्गेति वक्ष्यमाणं स्योग्निरस्पृष्टवदित्यादिनेति शेषः। वागादीनां स्थितानां न प्राणोचेकुतो

स्यादिरूपत्वमित्याशंक्याह सर्वमपीति। ननु हि तेषां परिच्छेदाभिमानः स्यादित्याशंक्याह स्वाभा
विकेनेति। परिच्छेदाभिमानाद्दृश्याद्यात्माभिमानस्य बलवत्त्वं सूचयति। शास्त्रेति। न केव
लमप्राप्तानामेवासुराणामसंसर्गिधर्मिप्राणाश्रयादिनाशः किंतु तत्तुल्यजातीयानामपी
त्यभिप्रेत्याह किंचेति। वागादीनामग्न्यादिभावापत्तिवचनेन तत्संहतस्य यजमानस्य देवता
प्राप्तिरासुरपाप्मध्वंसश्च फलमित्युक्तं तत्र सर्वकल्पीययजमानस्यातिशयशालित्वाद्य
योऽन्त्यफलवत्त्वेऽपि नेदानींतनस्यैवमित्याशंक्य परासुरा भवतीत्यादिश्रुतिमवतारयति
यथेति। सर्वकल्पनाप्रकारेण सर्वजन्मस्थो यजमानः शास्त्रप्रकाशितं वर्त्तमानप्रजापति
त्वं प्रतिपन्नोऽथयेति संबन्धः सर्वयजमानरंलस्य व्याख्यातिक्रान्तकालिक इति। पुराकल्प
मेव दर्शयति एतामिति। तेनेति। श्रुत्युक्तेनेत्येतत्। तेनैव विधिना श्रुतिप्रकाशितेन क्रमेण ६७
मुख्यप्रमाणमात्मत्वेनोपगम्येति शेषः। सपत्नो भ्रातृव्यः तस्याद्विषन्निति कुतो विशेषणम

र्थसिद्धत्वाद्वेषस्यैतत्सांक्याहयलराति। तस्य द्वेष्टत्वनियमे हेतुमाह पारमार्थिकेति। अप
रिच्छिन्नदेवतात्वमत्र पारमार्थिकमात्मस्वरूपं विवक्षितं तत्तिरस्करणकारणत्वात्। उ
क्तपाप्मनो विशेषणमर्थवदिति शेषः। उयदाग्नेयोष्टाकपालरतिवद्यएवंवेदेति प्रसि
द्धार्थवंधोपि विधिपरं वाक्यं अतश्चैवं विद्यादिति विवक्षितमित्यपित्रेत्याह यथोक्तमिति।
फलवत्प्रधानोपास्तेरुक्तत्वात्तलेहोच्युरित्याद्युत्तरवाक्यं गुणोपास्तिपरमित्याशंक्या
हफलमिति। फलवंतं प्रधानविधिमुत्क्वाप्रत्यारभ्याविकामे नाम्नित्य गुणविशिष्टप्रा
णोपासनमाहानंतरश्रुतिरित्यर्थः। शंकेनारत्वेनावांतरग्रंथमवतारयति कस्माच्चेति।
विशुद्धस्योक्तत्वाद्धेत्वंतरं जिज्ञास्यमिमिध्यातयितुं शाब्दं कुरणानां कार्यस्य तदवृयवानां
च प्राप्यो यस्मादात्मा व्यापकस्तस्मात्सु एवाश्रयितव्य इत्युपपत्तिनिरूपणार्थं तस्य
व्यापकत्वमित्येतदर्थमारभ्याधिकयादर्शयंतो श्रुतिर्हेत्वंतरमाहेति योजना। तद्धृद्धस्तस्मा

बृ॰आ॰ ३

दर्थी। प्राणस्यात्मत्वादिव्याख्यां कर्तुमारम्भाविकाश्रुतिं विभजते। तेप्रजापतीति। वागादयस्त्वेर्
प्राणमाश्रित्य फलावस्थास्तर्हि किमिति प्राणं स्मरंति प्राप्तफलत्वादित्याशंक्याह स्मरंतिही
ति। विचारफलमुपलब्धिं कथयति लोकवदिति तामेवोपलब्धिमाकांक्षाद्वारेण विवृणो
ति। कथमिति। दृष्टांतं स्पष्टयति सर्वो हीति। तथादेवा विचार्य प्राणमास्यांतराकाशस्थं नि
र्धारितवंत इत्याह। तथेति। किमनया कथया सिद्धमित्याशंक्याह यस्मादिति। उपलब्धि
सिद्धेर्थे युक्तिं समुच्चिनोति विशेषेति स्वर्गनैव वागादीन विशेषेणास्यादिस्थानेन प्राणः
संज्ञितत्वोन्नं च मध्यमस्थः साधारणं कार्यं निवर्त्तयत्ततो मुक्तिर्नोप्ययमास्यांतराकाशे
वर्तमानः सिद्धस्तत्र्थः। अयास्यत्ववदांगिरसत्वं गुणांतरं दर्शयति अतएवेति। सर्वसा ४८
धारणत्वादेवेति यावत्। तथापि कुतोस्यांगिरसत्वं साधारणेन प्रसिद्धमनुपलब्धेरित्या
शंक्य परिहरति। कथमित्यादिना। अंगेषु चरमधातोः सारत्वप्रसिद्धेर्न प्राणस्य तथात्वमिति

त्रां कृत्वा समाधत्ते कथं पुनरित्यादिना। कस्मान्न्वहेतोरित्यादिचोद्यपरिहारमुपसंहरति। यस्माद्वे
ति। वाक्यार्थं प्रपंचयति। आत्मा हीति प्राणस्य शुद्धत्वाद्व्यापकत्वाच्चोपास्यत्वमुक्तं तस्य शुद्ध
त्वं वागादिवदसिद्धमित्याशंक्य तेस्यान्नमतमिति। त्रां कामाक्षिप्य समाधत्ते नन्वित्यादिना। त्रा
वेन स्पृष्टिर्यस्मास्तितेन स्वपापरस्याशुद्धत्वावदशुद्धवागादिसंबंधात् अशुद्धत्वान्न
का प्रापास्योन्निपतीत्यर्थः। तात्पर्यं दर्शयन्नुत्तरवाक्यमुत्तरत्वेनावतारयति आहेति। न
त्वन्न प्राणो नोच्यते। स्त्रीलिंगेनार्प्यंतिरोक्तिमपीतीतेरित्याशंक्याह यं प्राणमिति। तस्य मूर्त
स्य परोक्षत्वादपरोक्षवाची वकृथमेतच्छब्दो युज्यते तत्राह सैवेति। कथं प्राणो देवतान्नाच्छेन
हितस्य तच्छब्दस्य प्रसिद्धमित्याशंक्याह देवता चेति। यागे देवता कारकत्वेन गुणत्वात्प्र
सिद्धात प्राणोपि द्रव्यान्यत्वे सति विहितक्रियागुणत्वाद्देवतेत्यर्थः। प्राणोपास्तेर्द्विवि
धं फलं पापहानिर्देवताभावस्य स्वतंत्रपापहानेरेव प्रधानस्याश्रवणात्तद्गुणविशि

ष प्राणोपास्तिरिहविवक्षितेति वाक्यार्थमाह यस्मादिति मतावत्प्राणदेवता वा दूर्नामत्वं नि-
रूढं। तन्नात्र छेद्यप्रसिद्धेरदर्शनात्। नाप्यैयोगिकं प्राणाप्रसंगहृते दूरित्वाभावादित्याशि-
पति कुतः पुनरिति परिहरति आहेति। कृत्यं पाप्मसान्निधौ वर्तमानस्यतो दूरत्वमित्या-
शंक्याह संश्लेषेति। उपास्ते सदा भावयतीति यावत् ब्रह्मज्ञानादिवत्प्राणतत्त्वज्ञाना-
त्फलसिद्धिसंभवे किं सदा तद्भावनयेत्याशंक्य भावनापर्यायोपासनशब्दार्थमाह ॥
उपासनं नामेति। दीर्घकालादरनैरंतर्यरूपविशेषणत्रयं विवक्षित्वाह लौकिकेति। तस्य
मर्यादां दर्शयावदिति। मनुष्योऽहमिति यस्य जीवत एवाभिमानोऽभिव्यक्तिस्तस्यैव देहपा-
तादूर्ध्वं तत्संबंधफलतीत्यत्र प्रमाणमाह देवो भूत्वेति। कादेवतारूपं तद्देवोऽसौ ति तद्भावो तद्भा-
वोप्राप्तीत्यर्थः। कंडिकांतरमवतारयति यदित्तं कीर्तयति सा वार्तेति नित्यानुष्ठातृपापहानि-
र्धर्मात्पापहृयश्रुतेः। न चेदमुपासनं नित्यं नैमित्तिकं वा देवतात्मत्वकामिनो विधानात्

तत्कथं पापमेवं विदो दूरे भवतीत्याक्षिपति कथं पुनरिति। विरोधिसंपाते सर्वध्वंसमा
वश्यकं मन्वानः समाधत्ते उच्यत इति। उक्तमेव व्यनक्ति। इंद्रियेति। इंद्रियाणां विषयेषु
संसर्गयोग्यमिति बेत्रास्तेन जनितः पाप्मा परिच्छेदाभिमानो ऽपरिच्छिन्नेप्राणात्माभिमान
वतो विरुध्यते। परिच्छेदापरिच्छेदयोर्विरुद्धस्य प्रसिद्धत्वादित्यर्थः। विरोधं साधयति। रा
गादीति। पाप्मनो रागादिविशेषवत्त्वात्मनि विशिष्टेऽभिमानहेतुत्वाद्दाधिदैविकापरि
च्छिन्नाभिमाने ध्वंसो युज्यते। दृश्यते हि चंडालभंडवर्त्तिनो जलस्य गंगाद्यविशेष
प्ताऽपवित्रापेयत्वनिवृत्तिरस्पृश्यमपि पयः प्राप्य गंगां याति पवित्रतामिति न्यायादि
त्यर्थः। यन्नैसर्गिकाज्ञानं तदागंतुकप्रमाणज्ञानेन निवर्त्तते यथा रज्जुसर्प्पादिज्ञानं नै
सर्गिकाज्ञानं तदागंतुकप्रमाणज्ञानेन निवर्त्तते यथा रज्जुसर्प्पादिज्ञानं नैसर्गिकाज्ञान
ञ्चायं पाप्मा तेन प्रामाणिकप्रमाणज्ञानेन तद्ध्वस्तिरित्याह स्वाभाविकेति। नत्वि

95

स·आ·२

मानयोर्विरोधाविशेषाद्बाध्यबाधकत्वव्यवस्थायोगात् द्वयोरपि मिथो बाधः स्यात्तत्राह त्वा
स्त्रजतितो हीति उक्तमेव पापध्वंसरूपं विद्याफलं प्रपंचयितुमुत्तरवाक्यमित्याह तद्देतदिति।
मृत्युमपहत्यत्यासां दिशामंतस्तद्गमयांचकारेति संबंधः। कथं पाप्मा मृत्युरुच्यते तत्राह स्वा
भाविकेति। अपहत्येत्यत्र सर्वविदन्वयः। प्राणदेवता चेत्पाप्मानं हंति सदैव किं न हन्यादित्या
शंक्याह प्राणस्येति। न तु प्राणो वागादीनां पाप्महंता विदुषस्तु किमायातमित्याह विरोधा
देवेति। अनंतर्दिशादेवैशात्वाद्दिशामंताभावाद्यत्रासामित्याद्ययुक्तमिति शंकते नन्विति।
शास्त्रीयज्ञानकर्मसंस्कृतो जनो मध्यदेशः। प्रसिद्धस्यापि तदधिष्ठितत्वेन मध्यदेशत्वात्
तत्राप्यंत्यजाधिष्ठितदेशस्य पापीयस्त्वस्वीकारात्॥ अतस्तं जनं तदधिष्ठितं देशं चावि
धिं कृत्वा तेनैव निमित्तेन दिशां कल्पितत्वादानंत्याभावात्। पूर्वोक्तजनो विशिष्टजनस्तत
दधिष्ठितदेशश्चांतत्वोक्तेर्मध्यदेशात् अन्यो देशो दिशामंतस्तदुक्ते न काचिदनुपपत्तिरिति

५०

परिहरति। उच्यत इति। किमिसंत्यजनेऽपि त्वधिकावायः क्रियते तत्राह इति सामर्थ्यादिति।
देशमात्रेपाप्मावस्थानानुपपत्तेरित्यर्थः। तामिवानुपपत्तिं साधयति। इंद्रियेति। मन
तु यथोक्तोदिशामंतस्तथा च पाप्मासंसंसर्गेस्तु तथापि किमायातमित्याशंक्य तस्य
त्रोदैस्साप्यत्वमित्याह तस्मादिति निषेध्यस्य तात्पर्यमाह जनास्वल्पमपीति प्राणो
पास्ति प्रकरणोनिषेधश्रुतेस्तदुपासकेनायं निषेधो नतु ध्येयो न सर्वैरित्याशंक्याह नेदिसा
दिका। इत्थं श्रुतस्तन्निषेधनं चेदहं कुर्यां ततः पाप्मानमनुगछेयमिति निषेधातिक्रमा
दिति सर्वस्याप्ययं जायते न प्राणोपासकस्यैवातः सर्वोपि पापाशीलो नोप्ययं गच्छेत्त
वाक्यं हि प्रकरणाद्बलवदित्यर्थः। द्विविधमुपास्ति फलं पापहानिर्देवतात्मावश्च तत्र पो
पहानिमुपादिशाता प्रासंगिकः साधारणो निषेधो दर्शितः। संप्रति देवताभावं वक्तुमुत्त
रवाक्यमिति प्रतीकोपादानपूर्वकमाह साधारणेति। अथशब्दावद्योतितमर्थं कथयति

यस्मादिति। पाप्मापहंतृत्वमनघावसिष्ठत्वं व्याचष्टे तस्मात्स एवेति। सामान्योक्तमर्थं
विशेषेण प्रपंचयति स वै वाचामित्यादिना कथं वाचः प्राथम्यं तदाह उप्रथेति। वाचो मृत्यु
मतिक्रांतताया रूपं प्रश्नपूर्वकं प्रदर्शयति तस्मादिति। अनग्नेरग्नित्वं विरोधं धुनाते सा वाग्नि
ति। सर्वमपि वाचोऽग्नित्वेनोपासनाल्लभ्यं तदग्नित्वमित्याशंक्याह रतावानिति। उक्तं विरो
धं विशदयति प्रागिति। वागादीनामग्न्यादिदेवतात्वमास्ता वप्युपासकस्य किमायातं
न हितदेवतस्य फलमित्याशंक्याह यथेति। देवतात्वप्रतिबंधकान्पाप्मानः स वैनियो
ह्योतं कर्मणा वागादीनामुपासकोपाधिकृतामग्न्यादिदेवताख्यैव सोपि सदा प्राणात्म
त्वेन ध्यायन्भावनाबलादेव राजपदं पूर्वयजमानवदाप्नोतीति भावः। कस्येदं फल
मित्याकांक्षायामुपासकं विशिनष्टि यो वागादीति। उक्तोपासनस्य प्रागुक्तं फलमनु
रुपमित्यत्र मानमाह॥ तं यथेति। उपास्यस्य प्राणस्य कार्यकरणसंघातस्याविधारकत्वं

नामगुणांतरं वक्तुमुत्तरवाक्यं तदायव्याकरोति अथेत्यादिना। कथमुक्तान्तु विक्रीतस्य फल
संबंधस्तत्राह कर्तुरिति। अत्रागानमार्त्विज्यमित्यत्र प्रश्नपूर्वकं वाक्यशेषमनुकूलयति।
कथमित्यादिना। तमेव हेतुमाह यस्मादिति। प्राणेनैव तदर्थं इति संबंधः। यस्मादित्यस्य त
स्मादित्यादिप्राप्येणान्वयः। अनितेर्धातोरनञ्छब्दः प्राणपर्यायस्तर्हि कथं त्राकटेत
छद्प्रयोगस्तत्राहानः शब्द इति। रतस्य प्राणस्य स्वार्थमन्नागानं युक्तमित्याह किंचेति। आ
येन वागादिवदात्मार्थमन्नमागीतं चेत्तर्हि तस्यापि पाप्मवेधः स्यादित्याशंक्याह। यदपीति।
इहान्येदेहाकारपरिणते प्राणस्तिष्ठतीति तदनुसारिणश्च वागादयः स्थितिभाजोतः स्थित्यर्थं
प्राणस्यान्नमितिन पाप्मवेधस्तस्मिन्नस्तीत्यर्थः। त्सर्जाश्रेष्ठः पुरोगतेत्यादि गुणविधाना
र्थं वाक्यांतरमादत्ते ते देवा इति। तस्य विवक्षितमर्थं वक्तुमादावाक्षिपति नन्विति। अयु
क्तत्वे हेतुमाह वागादीनामिति। अवधारणानुपपत्तिं दूषयति नैष दोष इति। यथा प्राणस्यो

बृ·आ·३

पकारोऽन्नकृतो न वागादिद्वारकस्तथा तेषामपि नासौ प्राणद्वारको विशेषाभावात् इति
शंकते कथमिति। वाक्येन परिहरति। एतमर्थमिति। आह विशेषमिति शेषः। तेषां देवत्वं
साधयति स्वविषये इति तत्र प्रसिद्धिं प्रमाणयितुं वैशब्द इत्याह। वै इति स्मरणार्थ इति त
त्प्रसिद्धस्यार्थस्येति शेषः। वाक्यार्थमाह इदं तदिति। एतावत्वमेव व्याचष्टे एतत्सर्वमिति। वि
शिष्टं प्राणार्थमन्नागानं नाम तदाह। आगानेति। का पुनरेतावता क्षतिर्भवतां तत्राह वयं चे
ति। अन्नमंतरेण ममापि स्थातुमशक्तेर्मदर्थं तदागातमिति चेत्तत्राह। अत इति। आभ
जस्वेति श्रूयमाणे कथमन्नप्याप्याप्यायते तत्राह तेन च इति। तवैवान्नस्वामित्वम
स्माकमपि तत्र प्रवेशमात्रं स्थित्यर्थमपेक्षितमिति वाक्यार्थमाह। स्मानिति। वेशाद्येयद
र्थे प्रयुक्तः प्राणं परिवेश्य तदनुज्ञया वागादीनामन्नार्थिनामवस्थानं च तेषामपि प्रा ५२
णवदन्नसंबंधः स्यादित्याशंक्याह तथेति। स एव प्राणस्यान्नबलाद्वागादीनां स्थितिरनु

गा २

पलब्धिरित्यर्थः। वागादीनामन्नःजन्योपकारस्य प्राणाधारत्वे सिद्धे फलितमाह तस्मादिति।
तेषामन्नकृतोपकारस्य प्राणाधारकत्वे वाक्यशेषं संवादयति तदेवेति। विद्याफलं दर्शय
न् गुणजातमुपदिशति। वागादीति। वेदनमेव व्याचष्टे वागादयश्चेति। स च प्राणोऽहमस्मी
ति वेदेति चकारार्थः। अनामयावी व्याधिरहितो दीप्ताग्निरिति यावत् संप्रति प्राणविद्यां स्तौ
तुं तद्विद्विषां बाधावधि द्वेषिणो दोषमाह किंचेति। इदानीं प्राणविदं प्रति अनुरागे लाभं दर्शय
ति। अथेत्यादिना। ति देवा अब्रुवन्निति। सोऽगुणविधिर्विवक्षितो न विशिष्टविधिर्गुणफल
स्यैवात्र श्रवणादित्याह सर्वमतेदिति। उत्तरग्रंथस्य व्यवहितेन संबंधं वक्तुं व्यवहितम
नुवदति। कार्यकरणानामिति। अनंतरं ग्रंथमवतारयति अस्मादिति। क्रमितांगिर्
सत्त्वसाधको हेतुः साधनीयस्तत्राह तद्धेति। संप्रति अव्यवहितसंबंधं दर्शयति
अनंतरं चेति। प्रकारांतरमुक्तस्य मानमिति सूचयितुं न्यायः। तर्हि यदुपपादनीयं तदुच्य

KKSU LIBRARY
RAMTEK
441 106
M-1495
Dist Nagpur

तांकिमित्युक्तस्य पुनरुक्तिरित्याशंक्याहुरुत्तरार्थमिति प्रतिज्ञातुवादो वक्ष्यमाणहतोरु
पयोगीत्यर्थः॥ यथोपन्यस्तमेवेत्यादिप्रपंचयति प्राणो वा इति। उक्तार्थनिर्णयहेतुं प्र
च्छति कथमिति। प्रतिज्ञातुवादो वक्ष्यमाणहतोरुपयोगीत्यर्थः॥ यथोपन्यस्तमेवेसा
दिप्रपंचयति प्राणो वा इति। उक्तार्थनिर्णयहेतुं पृच्छति कथमिति। तत्र प्रसिद्धिं हेतुं कुर्व
न्परिहरति प्राणो हीति। प्रसिद्धिमेव प्रकटयति प्रसिद्धमिति। स्मारणं प्रसिद्धस्यांगिर
सत्वस्येति शेषः। प्रसिद्धिरसिद्धेति शंकते कथमिति। तामन्वयव्यतिरेकाभ्यां साधयति
अत आहेति। पादार्थमुक्त्वा वाक्यार्थमाह॥ यस्मात्कस्मादिति। उक्तेन व्यतिरेकेणानुक्त
मन्वयं समुच्चेतुं चशब्दः। तस्माच्छब्दस्योपरिष्टावेन संबंधमुक्तं स्फुटयति तस्मादिति॥
अन्वयव्यतिरेकाभ्यामंगरसत्वे प्राणस्य सिद्धे फलितमाह अत इति। उक्तन्यायादंग
रसत्वे सिद्धेपि कथमात्मत्वं सिद्ध्येदित्याशंक्याहात्मेति। अस्तु प्राणः संघातस्यात्मा तथापि।

किंस्यात्तदाह तस्मादिति। एवं तु प्राणाधीनं संघातस्य जीवनं तथापि कथं तस्यैवोपास्य
त्वमित्याशंक्याह तस्मादपास्येति। बृहस्पत्यादिधर्मकं प्राणोपासनं वक्तुं वाक्यांतरमव
तारयति एष इति। तस्य विधांतरेण तात्पर्यमाह न केवलमिति। कार्यं स्थूलं शरीरं प्रत्यक्ष
तो रूप्यमाणं रूपात्मकं करणं च ज्ञानक्रियाशक्तिमत् तत्कर्मफलं तं तयोरात्मा प्राणर्स्कह्नाना
मराज्ञीरथितथेति। वक्तुं कंडिकाचतुष्टयमित्यर्थः। किमिति प्राणस्यात्मत्वेन सर्वात्मत्वोक्ता
स्तुतिरित्याशंक्याह॥ उपास्यत्वायेति। उत्तरशब्देऽप्यर्थो बृहस्पतिशब्दादुपरि संबध्य
ते। बृहस्पतिर्देवतानां पुरोहित आसीदिति श्रुतेर्देवपुरोहितो बृहस्पतिरुच्यते तत्क
थं प्राणस्य बृहस्पतित्वमिति शंकते कथमिति। देवपुरोहितं व्यावर्तयितुमुत्तरवाक्ये
नोत्तरमाह उच्यत इति। प्रसिद्धवचनं कथमित्याशंक्याह बृहतीति छंद इति। सप्त हि
गायत्र्यादीनि प्रधानानि छंदांसि तेषां मध्यमं छंदो बृहती षट्त्रिंशदक्षरं प्रसिद्धेत्यर्थः।

103

ऐ·आ·२ सा च तु यथोक्ता बृहतीच्छं तत्राहानुष्टुप् चेति। द्वात्रिंशदक्षरत्वादनुष्टुबु २ ष्टा सा चास्यै
श्चतुर्भिः पादैः षट्त्रिंशदक्षरायां बृहत्यामंतर्भवत्यंतरसंख्यायामहासंख्यायामं
तर्भावादित्याह सा चेति॥ वागनुष्टुप्स्तोरनुष्टुप् बृहत्योऽभ्यो रूमे कचमुपजीव्य फलितमा
हात्तइति सा च तु वागात्मिका बृहती तथापि तत्पतित्वेन प्राणस्य कथमृक्पतित्वमित्या
शंक्याह बृहत्यां चेति। सर्वात्मकप्राणरूपेण बृहत्याः स्तुतत्वात्तत्र सर्वासामृचामंतर्भा
वः संभवति। तस्मात्प्राणस्य बृहस्पतित्वे सिद्धं ऋक्पतित्वमित्यर्थः। प्राणरूपेण स्तुता
बृहतीत्यत्र प्रमाणमाह प्राणो बृहतीति तथापि प्राणस्य निनष्टितमृगात्मत्वं कथं सि
ध्यतीत्याशंक्याह प्राण इति तस्य तदात्मत्वे हेतुं तत्र माह। वागात्मत्वादिति। तासां तदात्म ५४
त्वेऽपि कथं प्राणेऽन्तर्भावो न हि घटो मठात्मा पटेऽन्तर्भवतीति शंकते तत्कथमिति। प्राण
स्य वाग्निष्पादकत्वात्तत्कृतानामृचां प्राणे कारणे युक्तोऽन्तर्भाव इत्याह देहेत्यादिना। प्रा

गस्य तान्निर्वर्तकत्वेपि न तस्मिन्वाचोंतर्भावो न हि घटस्य कुलालेंऽतर्भाव इत्याशंक्याह को
ष्ठ्येति। कोष्ठ्येति निष्ठेनाग्निनाप्रेरितस्ततो वायुरूर्ध्वं गच्छन्कंठादिष्वभिहन्यमानो
वर्णतया व्यज्यते तदात्मिका वाच्वाक्षिण इता देवताधिकरणे ऋऽक वागात्मिको रूतयुक्तं
तस्याः प्राणेंऽतर्भूतत्वमित्यर्थः। ऋगात्मत्वं प्राणस्य प्रकारांतरेण साधयति पालनाद्वेति।
सत्ताप्रदत्वे सति स्थापकत्वं तदात्मव्याप्तमिति त्वं सभिप्रेत्योपसंहरति तस्मादिति। यजु
षामात्मेति सर्वे पासं बंधः। नियतपादाक्षराणामृचां प्राणत्वे कुतस्तद्विपरीतानां यजु
षांतत्वमितिन्नांक्तिता परिहरति रूपमिति। तथापि कथं प्राणो यजुषामात्मेत्याशंक्या
ह वाग्वै ब्रह्मेति निवर्तकत्वं पालयितृत्वं चात्रापि तुल्यमित्याह सर्वमिति रूढिमा
श्रित्यनांकृते कथं पुनरिति। वाक्सनोरविरोधान्नात्र रूढिः संभवतीति परिहरति उच्यत
इति। वाचांतेसामेत्यंते वाचः साम सामानाधिकरण्येन निर्देशाद्वेदाधिकरोयमिति योज

105

ना। तथापि कथमृक्त्वं यजुष्ट्वं वा बृहतीब्रह्मणोरिति तत्राह। तस्या चेति परिशेषमेव दर्शयति साम्नीति। एतस्य वाक्समानाधिकृतयोर्बृहतीब्रह्मणोः ऋग्यजुष्ट्वमेष्टव्यमित्याह वाग्विशेषत्वाच्चेति। तत्रैव हेत्वंतरमाह विशेषेति। प्रसंगमेव व्यतिरेकमुखेन विवृणोति सामेति। द्वितीयश्चकारोवधारणार्थः। किंच वाग्वै बृहती वाग्वै ब्रह्मेति वाक्याभ्यां बृहतीब्रह्मणोर्वागात्मत्वं

कय सिद्धं न च तयोर्वाङ्मात्रत्वं वाग्द्वयेपि वाग्वै वागिति पौनरुक्त्यप्रसंगात् तस्मा बृहतीब्रह्मणोरेष्टव्यमृग्यजुष्ट्वमित्याह॥ वाङ्मात्रत्वे चेति। तत्रैव स्थानमाश्रित्य हेत्वंतरमाह ऋगिति। ऋग्यजुष्ट्वं प्राणस्य प्रतिपाद्यत्वेन सामत्वं साधयति। एवरत्वादिना तदेव स्पष्टयति सर्वेति। साशब्दो हि सर्वनाम तथा च यः स्त्रीलिंगः सर्वशब्दस्तेनाभिधेयं वस्तु वागित्यर्थः। अमः प्राण इत्युपपादयति सर्वपुंशब्देति पुल्लिंगेन सर्वेण शब्देनाभिधेयं वस्तु प्राण ५५

इत्यर्थः॥ श्रुत्यंतरं प्रमाणयति॥ केनेति। आचार्यस्य शिष्यं प्रति एतत्तत्त्वं कथं स्यादि प्रश्नो वा

चकाभित तथापि कस्य सामशब्दवाच्यत्वमित्याशंक्य फलितमाह वागिति वागुपसर्जनः प्राणः
सामशब्दाभिधेय एकवचननिर्देशादित्यर्थः। ननु गीतिषु समाख्येति न्यायाद्गीतिरेव का
चिदृग्गीतिः साम्येत्युच्यते तत्कुतो वागुपसर्जनस्य सामत्वमत आह तथेति। प्राणस्य सामत्वे स
तीति मा वत्। भवतीति मंत्रवाक्ये सामशब्दस्य दृष्टेरिष्टत्वात्। अस्ति प्राणादिव्यतिरेकेण सा
मेत्याशंक्याह स्वरेति। आदिपदेन पदवाक्यादिग्रहः। वागुपसर्जनप्राणो मुख्यः सामशब्दः त
स्माद्वादादितरत्र गौणो मंत्रादिशब्दवदित्यर्थः। उक्तेऽर्थे तत्साम्नः सामत्वमिति वाक्ययोजय
ति यस्मादिति। इदं साम इदं सामेति यद्व्यवह्रियते तद्वाक्प्राणात्मकमेवोच्यते। सा चामश्चे
ति व्युत्पत्तेर्यस्मादेवं तस्मात्प्रसिद्धस्य साम्नो यत्सामत्वं तन्मुख्यसामनिर्वर्त्यत्वाज्जोपमे
व सद्ध्येत व्यवहारे प्रसिद्धमिति योजना। प्रकारान्तरेण प्राणस्य सामत्वमुपासनार्थमु
पन्यस्यति यद्वेत्यादिना। प्रकारान्तरयोर्वाक्शब्दो नम्रयतरत्वान्न क्याह वाशब्द इति नि म्नि

107

बृ.आ.३ त्वांतरमेव प्रश्नपूर्वकं प्रकटयति केनेत्यादिना ननु प्राणस्य तच्छरीरपरिमाणत्वे परिच्छिन्नत्वादा-
नंत्यानुपपत्तिस्तत्रूपमस्य द्विरूढेषु शरीरेषु समत्वमित्याशंक्याह पुत्रिकादीति। समश-
ब्दस्य यथाश्रुतार्थत्वं किंन स्यादित्याशंक्याह न पुनरिति। आधिदैविकेन रूपेणामूर्तत्वं स-
र्वगतत्वं च इष्टम्। ननु प्रदीपो घटस्थः कुंचति प्रासादे च विकसतीति तथा प्राणोपि मशकादि
शरीरेषु संकोचमिभादिदेहेषु विकासं चापद्यतामिति समत्वासिद्धिरित्याशंक्याह नचे-
ति प्राणस्य सर्वगतत्वे समत्वश्रुतिविरोधमाशंक्याह सर्वगतस्येति। एवं उादिषु गोत्वव-
त् शरीरेषु सर्वत्र स्थितस्य प्राणस्य तच्छरीरपरिमाणतया वृत्तेर्लाभः संभवति सर्वग-
तस्यैव नभसस्तत्र तत्र कूपकुंभादावच्छैवंदोपलंभादित्यर्थः। फलश्रुतिमवतारयन्व्या-
करोति एवमिति। फलविकल्पे हेतुमाह भावनेति। वेदनं व्याकरोति। आप्नोतीति। इदं च ५८
फलं मध्यमप्रदीपन्यायेनोपयतः संगच्छमवधेयं। प्रस्तावादिना ब्रह्मव उक्तोपरा ब्रह्मस्याविभक्ति

108

विशेषे रूढत्वात्। उद्गीथेनास्ययामेतस्त्वत्र चोद्गात्रे कर्मणि प्रयुक्तत्वात् कथमुद्गीथः प्राण इत्याशं
क्याह। उद्गीथेनामेति। ननूपदस्यैषयतः संबंधः सामर्थ्याद्धि तस्य प्राणस्य प्रकृतत्वादिति
हेतुमात्तसामाधिकारादिति। न तावदुद्गीथशब्दस्य प्राणे रूढिस्तस्य तस्मिन्नदृप्रयोगादर्शि
नात्। नापि योगो नयनवृत्तेरदृष्टेरिति शंकते कथमिति। योगवृत्तिमुपेत्य परिहरति प्राणर
ति। उच्छब्दो नास्यार्थस्य वाचको निपातत्वादित्याशंक्याह उत्तिष्ठेति। तथा कथं प्राणो वाउ
न्दि स्फुत्कं तत्राह प्राणेति। वायुर्वै गौतम तत्सूत्रमित्यादिश्रुतेरित्यर्थः। उद्गीथपक्षेः शब्द
विशेषत्वेऽपि गीथा वागिति कथमुच्यते तत्राह। गायतेरिति। अवधारणं साधयति। नहो
ति॥ तथापि कथं प्राणस्योद्गीथत्वमित्याशंक्य वागीथत्वमित्याशंक्य वागुपसर्जनस्य तस्य
तथात्वं कथयति। उच्चेति। तच्चापीत्यादिवाक्यस्य प्रकृतानुपयोगमाशंक्याह उक्तार्थेति।
उद्गीथदेवता प्राणो नकारादिरित्यर्थः। जीवति तु वं रूपे युवेति स्मरणात् पित्रा देवं रूपे जीवति

109

पुनप्रस्तौति यदपसंतद्युवसंज्ञिकमिति द्रष्टव्यं क्रियापद्धति व्यक्तिप्रकारं सूचयति तोरिति।तु
प्रत्ययस्यायमाशिषि तातङादेशः।तुह्योस्तातङाशिष्यन्यतरस्यामिति स्मरणादित्यर्थः।
मृद्ध्यात प्रापकत्वं दर्शयति यदीति।अनन्तवादित्वस्य प्रापकत्वावादप्राप्तिरिति नं कृते कथं
पुनरिति उद्गानस्य बुद्ध्यादिसंनिधानान्न देवताप्रज्ञापकत्वादित्वसूचनात्किं तस्मिन् देवता किं
वा वर्णस्वरादिसान्निधानान्न देवते वतान्न देवतेति विप्रतिपत्तेरनन्तवादित्वेन्नं कृते न्नसद
त्तः स्वापथेन निर्णयं च कारेत्याह उच्चमरति। प्राणवाक्संयुक्तादन्येनायास्योयदुद्गा
यदिति संबंधः। तन्वायास्यांगिरसशब्दो वाच्यो मुख्यप्राणो देवत्वात्। लोकज्ञाता सवितु
मुत्सहते तत्राहि मुख्येति। उक्तार्थदार्ढ्याय फलमुपसंहरति इति विज्ञानरति। उक्तरीत्या ५७
ज्ञायथक्रियया प्राणस्वोऽध्यदेवते त्यस्मिन्विज्ञाने प्रत्ययो विश्वासस्तस्य यद्दार्ढ्यं तस्य
कर्तव्यतामाख्यायिकया दर्शयति श्रुतेरिति यावत्। आख्यायिकार्थस्यैव वाच्येत्यादिनोक्तेः

पौनरुक्त्यमित्याशंक्याह तमिति। तस्य पथस्य स्वातंत्र्येणाप्रामाण्ये विश्रुतिमत्त्वात्तथा प्रामाण्यं
सिध्यतीति भावः। उद्गीथदेवताप्राण एवेति निर्धार्य स्वस्तुगुणभाति खागुणविधानार्थ
मुत्तरकण्डिकात्रयमवतारयति तस्येत्यादिना किमित्यादौ फलमाप्तिलभ्यते तत्राह।
फलेनेति सौवस्वर्यं साम्नो लक्षणमित्यत्रानुभवं प्रत्यनुकूलयति। तेन हीति कथं तर्हि ईद
गतं माधुर्यं संपादनीयमित्याशंक्याह यस्मादिति। आगोहं ममेव गीतिभावमापन्नस्य
सौस्वर्यं धनमिति प्रकृते प्राणविज्ञाने गुणविधिर्विवक्षितश्चेत् किमित्यक्षानुरस्य कर्तव्य
मुपदिश्यत इत्याशंक्याह दृष्टफलतयेत्याह ररंतीति। अथेच्छायां कर्तव्यत्वेन विहितायां
तावन्मात्रेण सिद्धेऽपि कथं सौस्वर्यं सिद्धेत्। न हि स्वर्गकामनामात्रेण स्वर्गः सिध्यत्यत आ
हुस्सम्पन्न इति तस्य स्वरसत्वेन तच्छिद्रितस्य प्राणस्योपासकात्मकस्य स्वरवत्वप्रत्यये
कार्ये सति विहितेच्छामात्रेण साम्नः सौस्वर्यं न भवतीत्यस्मात्सामर्थ्यादितधावनादि कर्तव्य

111

बृ॰अ॰२ मित्येतदत्र विधित्सितमिति योजना। सौस्वर्यस्य सामरूपत्वे गमकमाह तस्मादिति। दृष्टां
तमनंतरवाक्यावष्टंभेन स्पष्टयति प्रसिद्धं हीति भवति हास्य स्वमिति प्रागेवोक्तत्वादन
र्थिक्या पुनरुक्तिरित्याशंक्याह सिद्धस्येति। साम्नो गुणांतरयति अथेति। तर्हि पुनरु
क्तिः स्यादत आह एतावानिति। लाक्षणिकं वंशोऽयं वयोर्दंत्योष्ठमिति लक्षणसागनहृत्कं
सुपुरवर्णोच्चारणं ममैवसाम न्याक्ति प्राणाख्यतस्य धनमिति यावत्॥ लाक्षणिकसौस्वर्य
गुणवत्प्राणविज्ञानवलो यथोक्तफलप्राप्तिहेतुमाह य एवेति। वाक्यार्थमाह लौकिक
मेवेति। फलेन प्रलोभ्याभिमुखीकृतस्य किं तत्सुवर्णमिति शुश्रूषवे ब्रूते तस्येति। गुण
विज्ञानफलमुपसंहरति। भवतीति। साम्नस्तच्छब्दवाच्यस्य प्राणस्य स्वरूपभूतस्ये ५८
ति यावत्। उपास्यस्य प्रतिष्ठागुणत्वे विवक्ष्यमुपासकस्य तद्गुणत्वं तत्राह तं यथेति।
आदिपदादुरश्शिरः कंठदंतोष्ठनासिकाताल्विति गृह्यंते किमिति सप्तोस्थानानि वागिंद्रियस्ये

तत्राह वाचिहीति। पक्षांतरमाहान्न इति। अन्नशब्देन तत्परिणामो देहो गृह्यते। एकीयपक्षे यु
क्तिमाह रहेति। कथं तर्हि प्रतिष्ठागुणस्य प्राणस्य विज्ञानं कर्त्तव्यमत आह अनिंदितत्वा
दिति। अथातः पवमानानामित्यादिवाक्यमवतारयति एवमिति। तत्राथशब्दं व्याचष्टे
यद्विज्ञानवतरेति। अतः शब्दार्थमाह यः स्मान्वेति। इ हेति प्रापाविदुक्तिः। कदा तर्हि जपक
र्मकर्त्तव्यं तत्राह तस्येति। उद्गीथेतास्य यामत्वं न उद्गायेति च प्रकरणात् उद्गीथेन संबं
धाज्जपस्य सर्वत्रोद्गानकाले प्राप्तौ पवमानानामेवेति वचनात्कालनियमासिद्धिरि
त्यर्थः स वै खल्वित्यादिवाक्यतात्पर्यमाह पवमानेष्विति। ननु कर्त्तव्यत्वेनाभ्यारोहः
श्रूयते जपकर्मविधित्सितमिति चोच्यते किं केन संगतमित्याशंक्याहास्य चेति। अ
भ्यारोहशब्दस्य न तत्र रूढिरेव प्रयोगाभावादित्याशंक्याह एतानीति। यद्यप्या [illegible] उप
मंत्रास्तर्हि मंत्रेणास्वरेण वैभाषिकत्वं यथोक्तेन भाव्यमित्याशंक्याह। द्वितीयेति। यत्रस्व

113

रोचिविवक्षितस्तत्र तृतीयानिर्देशोदुपपते। उच्चैर्ऋचा क्रियते उच्चैः साम्नोऽपांशु यजुषेति।
प्रकृते तु द्वितीयानिर्देशाज्जपकर्ममात्रं प्रतीयते मांत्रस्तु स्वशेन प्रतिभातीत्यर्थः। केन
तर्हि स्वरेणाप्रयोगो मंत्राणामिति चेत्तत्राह ब्राह्मणेतिम वतुन्नानपथेन स्वरेण मंत्रा
णां प्रयोगस्तथापि किमार्त्विज्यं किं यो वा यजमानमुपकर्मेति विवक्षायामाह याजमा
नमिति। व्याचिख्यासितं यजुषां स्वरूपं दर्शयति एतानीति। मंत्रार्थशब्देन पदार्थो वा
क्यार्थस्तत्फलं चेति त्रयमुच्यते। लौकिकं तमौ व्यावर्त्तयति सर्वहाति। पूर्वोक्तरूपदेन व्या
ख्यातं तमोगृह्यते विपरीतहेतुमाह प्रकाशात्मकत्वादिति। ज्ञानं तेन साध्यमिति यावत्॥
पदार्थोक्तिसमाप्ताविति शब्दः। उत्तरवाक्याभ्यां वाक्यार्थस्तत्फलं चेति द्वयं क्रमेणोच्यत ५९
इत्याह। सर्वविदिति। फलवाक्यमादाय सर्वस्मादिति शेषं दर्शयति। अमृतमिति। प्रथमाद्वि
तीयमंत्रयोरर्थैक्येदाप्रतीतेः पुनरुक्तिमाशंक्यावांतरभेदमाह सर्वमिंत्वरतीति तथापि तत्ती

यमंत्रे पुनरुक्तिरुच इव स्थेत्याशंक्याह मर्त्योरिति। इत्थं मन्त्रयोरुत्तरवाक्यमवतार्य व्याचष्टे
याजमानमिति। यथा प्राणास्त्रिषु पवमानेषु साधारणमागानं कृत्वा शिष्टेषु स्तोत्रेषु स्वा
र्थमागानमकरोत्तथेत्याह प्राणवदिति। तद्विदोपि तद्वदागाने योग्यमाह प्राणक्तत इति।
हेतुवाक्यमादौ योजयति यस्मादिति। प्रस्तावाकं व्याचष्टे तस्मादिति। किमितिम्पसास्ते
न वाक्यद्वयव्याख्यानमित्याशंक्यार्थसिद्धेति न्यायेन पाठक्रमनादृत्य परिहरति यस्मादि
त्यादिति। स एष एवं विदुद्गातात्मने वा यजमानाय वा यं यं कामं कामयते तमागानेन
साधयति यस्मादिति हेतुग्रंथस्तस्मादिति प्रतिज्ञाग्रंथात्प्रागेव संबध्यत इति योज
ना। इत्थं कीर्त्तयति। एवंतावदिति। तत्र कर्मसमुच्चिते ज्ञाने देवतात्मोऽशंकासंप्तबोस्तीति मि
थः सहकृतयोर्ज्ञानकर्मणोस्तदाप्तिहेतुत्वादित्याह तत्रेति समनंतरं वाक्यमवतारय
ति। अतिरति समुच्चयात्फलप्राप्तिहेतुत्वादिति यावत्। तद्धेत्यादिना पदानि छिंदन् वाक्यमा

बृ·आ·३ दायत्याकरोतिअग्लोकावर्तितायेतितद्देवस्फुटयतिनहीति।तत्रदृष्टांतमाहानहीति।दह्यमान
मानुशंसनं तर्हि कस्मिन्विषये स्यादित्याशंक्याहासंनिकृष्टेति।प्राणात्मनाव्यवस्थितस्य
विदुषस्तदात्मभावं कदाचिदहं न प्रतिपद्येयमित्याशंसनं नास्तीति निगमयति तस्मादिति
।कर्मसमुच्चितादुपासनात्केवलाच्च प्राणात्मत्वं फलमुक्तं तत्र समुच्चितादुक्तात्तु यजमानस्य
फलं केवलाच्चोपासनात्तयोरन्यतरस्यान्यस्य वा कस्यचिदिति जिज्ञासमानः शंकते क
स्येति।ज्ञानकर्मणोरुक्तयत्रसमप्रभावादुभयोरपि वचनात्फलसिद्धिः।आश्रमांतरविष
यं तु केवलज्ञानस्य लोकजयहेतुत्वमिलषिमित्याह य एवमिति एवं शब्दस्य प्रकृतपरा
मर्शित्वात्तद्वेत्तिकं सर्वविशेषं स्वरूपं संक्षिपति अहमस्मीत्यादिना।तस्य वागादिभ्यो वि
शेषं दर्शयति इंद्रियेति।किमिदानीं प्राणस्यैवोपास्यतया वागादिपंचकमुपेक्षितमि
ति नेत्याह वागादीति तस्य प्राणाश्रयत्वेपि कुतो देवतात्मासंगपाप्मविरुद्धत्वादित्यर्थः

६०

कथा हस्वाभाविकेति। अन्नकृतोपकारं प्राणद्वारा वागादेः स्मारयति सर्वेति। रूपात्मके
जगति प्राणस्य स्वरूपमनुसंधत्ते आत्मा चेति। नामात्मके जगति प्राणस्यात्मत्वमुक्तं
स्मारयति। ऋगिति। सति सामत्वे गीतिभावावस्थायां प्राणस्योक्तं बाह्यमांतरं च सौस्व-
र्यं सौवर्ण्यमिति। गुणद्वयमनुवदति ममेति। तस्यैव वैकल्पिकीं प्रतिष्ठामुक्तामनुस्मा-
रयति गीताविति। यद्वैवेत्यादिनोक्तं परामृशति। गुणो हमिति। इत्येवमभिमानाभिव्यक्ति-
पर्यंतं यो ध्यायति तस्येदं फलमित्युपसंहरति इतीति॥ ॥इति तृतीयस्य तृतीयं ब्राह्मणं॥
ब्राह्मणांतरमवतार्य संबंधं वक्तुं प्रतीकं कीर्तयति। आत्मैवेत्यादिना॥ केवलप्राणदर्शि-
नेन च प्रजापतित्वप्राप्तिर्व्याख्यातेति संबंधः। इदानीमात्मेत्यादेस्तद्धेदमित्यतः प्राक्तन-
ग्रंथस्यापाततस्तात्पर्यमाह प्रजापतेरिति। आदिपदेन सर्वात्मत्वादि गृह्यते। फलोक्ति-
शेषपर्यन्तं कुत्रोपयुज्यते तत्राह। तेन चेति। कर्मकांडपदेन पूर्वग्रंथोपि संगृहीतः॥ फलगति

ज्ञायो हेत्वतिज्ञायापेक्षोऽन्यथा कस्मिन्कलापातादतो ह्यानन्तकर्मफलमतस्तत्र विमतिरुच्य
मानात्तान कर्मणो मर्हदर्शयतीत्याह सामर्थ्यादिति। अपातिकं तात्पर्यमुक्त्वा परमता
त्पर्यमाह विवक्षितं त्विति किंच विमतं संसारान्तर्गतं कार्यकारणात्मत्वात्। अस्मा
दादिकार्यकरणवदित्याह कार्येति। प्राजापत्यपदस्य संसारान्तर्गतत्वे हेतुंतरमाह
स्थूलेति। स्थूलत्वं साधयति व्यक्तेति। अनित्यत्वाद्रूपत्वाच्च प्रजापतित्वं संसारांतर्ग
तमित्याहानित्येति। इतिशब्दो विवक्षितार्थसमाप्त्यर्थः। किमित्येतद्विवक्षितमुपवर्ण्य
तेतत्राह ब्रह्मविद्याया इति। तच्चेदं विवक्षितार्थवचनमेकाकिन्या विद्यायावस्मा
पायामुक्तिहेतुत्वमित्युत्तरार्थमिति २४ वां॥ यदा हि कर्मज्ञानफलं प्रजापतित्वं संसार ६९
इत्युच्यते तदात्मानं तावत्पर्यंतात्सर्वस्मात्तस्माद्विरक्तस्यैव ह्यस्मापाविद्यायामधि
कारः सेत्स्यतीत्यर्थः॥ अथ यस्यैकस्यचिद्दर्शितामात्रेण तत्राधिकारसंपत्तौ वैराग्यं

नम्रग्यमित्याशंक्याह। नहीति। उभयत्रापि विषयःशब्दः सर्वेण समानाधिकरण्यात्॥ विवक्षि
तमर्थमुपसंहरति तस्मादिति वैराग्यमंतरेण ज्ञानानधिकारात् ज्ञानादिफलस्य प्रजापाति
त्वस्योत्कर्षवतः संसारत्ववचनं ततो विरक्तस्य वक्ष्यमाणविद्यायामधिकारार्थं विरक्तस्य
विद्याधिकारे मोक्षादपि वैराग्यस्यादित्याशंक्याह। तथाचेति। ननु मोक्षार्थं विद्यायां प्रवर्त्तित
व्यं मोक्षस्यापुरुषार्थत्वान्न प्रेक्षावता प्रार्थ्यते तत्राह। तदेतदिति। अपातिकमनापातिकं च
तात्पर्यमुक्त्वा प्रतीकमादाय अक्षराणि व्याकरोति। आत्मैवेति। तस्याश्वमेधाधिकारे प्रकृतत्वं सू
चयति अंडज इति। पूर्वस्मिन्नपि ब्राह्मणे तस्य प्रस्तुतत्वमस्तीत्याह वैदिकेति। स एवासीदि
ति संबंधः स्थित्यवस्थायामपि प्रजापतिरेव समष्टिदेहस्तद्यस्यात्मनानिष्ठतोऽति विशे
षासिद्धिरित्याशंक्याह तेनेति। आत्मशब्देन परस्यापि ग्रहणसंभवे किमिति विराडु
वोपादीयत इत्याशंक्य वाक्यशेषादित्याह स चेति। वक्ष्यमाणमीक्षणमन्वालोचनादि विरा

बृ·आ·३

आत्मकर्तृकर्मेवेत्याह स एवेति। स्वरूधर्मविषयौ द्वौ विमर्शौ नान्यदिति वाक्यमादायास्वराणि
व्यचष्टे वस्त्वंतरमिति। दर्शनशक्त्यभावादेव वस्त्वंतरं प्रजापतिर्न दृष्टवानित्याशंक्याह के
वलं चेति। सोऽहमित्यादि व्याचष्टे तथेति। यथा सर्वात्मा पतिरहमिति सर्वस्मिन् जन्मनि
श्रौतेन ज्ञानेन संस्कृतो निरूढ आत्मा तथेदानीमपि फलावस्थः सोऽहं प्रजापतिरस्मीति
प्रथमं व्याहृतवानिति योजना। व्याहरणफलमाह तत इति। किमिति प्रजापतेरहमिति
नामोच्यते साधारणं हीदं सर्वेषामित्याशंक्योपासनार्थमित्याह तस्येति। अध्यात्मि
कस्य चाक्षुषस्य पुरुषस्याहमिति रहस्यं नामेति यतो न स्यात्ततः श्रुतिसिद्धमेवैत
ना न्नामास्य धर्न्यौपाख्यमिहोक्तमित्यर्थः। प्रजापतेरहनामत्वे लोकप्रसिद्धिं प्रमाणयितु
मुत्तरं वाक्यमित्याह। तस्मादिति। उपासनार्थं प्रजापतेरहंनामोक्त्वा पुरुषनाम निर्व
चनं करोति स चेत्यादिना। सर्वस्मिन् जन्मनि साधकावस्थायां कर्माद्यनुष्ठानेनाहमहमिक ६२

याप्रजापतित्वप्रसक्तानांमध्ये सर्वैर्यः सम्यक्कर्माद्यनुष्ठानैः सर्वप्रतिबंधकं यस्माद् दहन्त
स्मात्सप्रजापतिः पुरुष इति योजना। उक्तमेव स्फुटयति प्रथमः सन्निति। सर्वस्मात्प्रजा
पतित्वप्रतिपित्सुसमुदायात्प्रथमः सन्नौषदिति संबंधः। आकांक्षापूर्वकं दाह्यं दर्शयति।
द्धिमित्यादिना। सर्वप्रजापतित्वप्रतिबंधकपाप्मध्वंसित्वे सिद्धमर्थमाह॥ यस्मादिति। पुरुष
गुणोपासकस्य फलमाह। य एवेति। अयंप्रजापतिरिति प्रविष्य कृत्वा साधकोक्तिः॥ पु
रुषः प्रजापतिरिति फलावस्थः स उच्यते। कोसावोषतीत्यपेक्षायामाह तं दर्शयती
ति। पुरुषगुणः प्रजापतिरहमस्मीति यो विद्यात्सोऽन्यानोषतीत्यर्थः। विद्यासाम्ये कथ
मेषाव्यवस्थेत्यांशंक्याह सामर्थ्यादिति। हेतुसाम्ये दाहकत्वानुपपत्तेस्तत्प्रकर्षवानि
तरान्दहतीत्यर्थः। प्रसिद्धदाहमा[illegible]यचोदयति। नन्विति। तथा च तत्त्वेश्याः योगान्तरुपा
स्यासिद्धिरित्यर्थः। विवक्षितं दाहं दर्शयन्नुत्तरमाह नेति। तदेव स्पष्टयति। उत्कर्षेति

121

प्राप्नुवन्प्नवतीति शेषः। औपचारिकं दाहं दृष्टान्तेन साधयति। यथेति। आजिर्मर्यादा तां
सरंति धावंतीसाजिसृत्सेयमिति यावत्। ज्ञानं कर्मफलं सोऽत्र पदमुक्त्वा एत्वान्मुक्तिस्तद
न्यमुक्तत्वप्राचान्त हेतुसम्यग्धीसिद्धये प्रवृत्तिरनर्थिकेत्याशंक्य सो विशेषस्य तात्पर्य
माह यदिदमिति। उच्छ्रितं स्तोतुमप्यप्रेतमिति यावत्। आह विनश्चितार्थस्थित्यर्थं
हेतुमप्यपमान्त्यमिति शेषः॥ ज्ञानं कर्मफलं त्रैलोक्योत्स्नकस्तत्रत्वमुत्कृष्टमपि संसारं
तत्कृतमेव न कैवल्यमिति चतुर्भुत्तरं वाक्यमित्यर्थः। अहमेकाकी कोपिमां हनिष्यतीत्या
त्मन्याशाविषयविपरीतज्ञानवत्वात्तत्प्रजापतिपतित्वानि स्यन्न किं प्रमाणमित्याशंक्यका
र्यगतेन मयलिंगेन कारणे प्रजापतौ तदनुमेयमित्याह भयस्मादिति। तस्मात्तत्सामा
न्यादेकाकित्वाविशेषादितियावत्॥ प्रजापतेः संसारान्तःपातित्वे हेतुत्वं तरमाह। किंचेति।
यथा अस्मदादिशरीरजुगुप्सावाद्दौसप्रभुरुषादिप्रमजनितभयनिवृत्तये विचारेण

तत्त्वज्ञानं संपद्यते तथा प्रजापतिरपि भयस्य तद्धेतोश्चाविपरीतधीयो ध्वस्तिहेतुं तत्त्वज्ञानं वि
चार्य संपादितवानित्यर्थः। परमार्थदर्शनमेव प्रश्नपूर्वकं विशदयति। कथमित्यादिना॥
तस्मिन्नित्यत्र तस्मादित्यादौ पठितमोंशब्दोपलक्षितं प्रत्यक्चैतन्यमद्वितीयब्रह्मस्वरूपे
ण ज्ञात्वा सहेतुं प्राप्तिं प्रजापतिराक्षिपति। तत्स्वक्तौ इदानीं तत्त्वज्ञानफलमाहेति तरतीति। कस्मा
दित्यादेरुत्तरस्य सर्वपापौघनिरूक्त्य मित्याशंक्य विदुषो हेतु मायात्मभय मित्युक्तस्य मर्थ
नार्थत्वादुत्तरस्यैनैव मित्याह। तस्येत्यादिना॥ अनुपपन्नो हेतुमाह। यस्मादिति। परमा
र्थदर्शनेऽपि वस्तुत्वं तत्त्वात्किमिति भयं न भवतीत्याशंक्याह द्वितीयं चेति। अन्वयव्यतिरेका
भ्यां द्वैतस्याविद्याप्रत्युपस्थापितत्वेऽपि कुतस्तदुस द्वैतदर्शनं भयकारणं न भवतीत्याशंक्याह। शंका
नहीति। तत्त्वज्ञानेऽस्य ज्ञानायोगात्तदुप द्वैतं तद्दर्शनं चायुक्तमित्यतो हेत्वर्था वाक्य
याऽनुत्पत्तिरित्यर्थः। अद्वैतज्ञानेन भयनिवृत्तिरित्यत्र मंत्रं संवादयति। तत्रेति विराडे

123

क्व दर्शनेनैव प्रजापतेर्वचमपनीतं तां छेत दर्शनेते स्वस्मिन्नर्थे विपर्ययदर्शनश्चासौ स्यादि
त्याकं व्याख्यातुमित्याशंक्यांगीकुर्वन्नाह यद्येति। तदेव प्रश्नद्वारा प्रकटयति। कस्मादि
त्यादिना। प्रथमव्याख्यानानुसारेण चोद्यमुत्थापयति। अन्येति। प्रजापतेर्ब्रह्मात्मैकु
ज्ञानाज्ञाति ध्वस्तिरुक्ता न च तस्य तज्ज्ञानं युक्तं हेत्वभावादित्याह। कुत इति। यस्मास्मिन्
मेकधीस्तस्मादेव तस्यापि स्यादित्याशंक्याह कोवेति। न हि तस्य शास्त्रश्रवणं आचा
र्याभावात् नापि संन्यासस्तस्य त्रैवर्णिकविषयत्वात्। नापि ग्रामाद्यैश्वर्यासक्तत्वात्।।
अतोऽस्मात्सु प्रसिद्धश्रवणादिविद्याहेत्वभावात् न प्रजापतेरेकत्वधीर्युक्तेत्यर्थः। उ
पदेशानपेक्षमेव प्रजापतेरैकत्वज्ञानं प्रादुर्भूतमिति शंकते अथेति। अतिप्रसक्त्या प्रत्या
हास्मदादेरिति। प्रजापतेर्यजमानावस्थायामाचार्यस्य सकाशाच्छ्रवणादुत्पन्नैकत्वज्ञानो ६४
दयात्तत्संस्कारोऽस्त्यं तथाविधधर्मेण तज्ज्ञानं कल्पावस्थायामपि स्यादिति चोदयति अथेति।

तत्र गमकमाह यत इति। दार्ष्टांतिकमाह एवमिति। नन्वस्मिन्नेव जन्मनि प्रजापतेरैक्य
धीरन्यपेक्षा जायते ज्ञानमप्रतिपद्यंयस्येति स्मृतेर्न च तदुत्पत्त्यनंतरमेव स हेतुं बंधं
निकृपादिप्रियारत्नादि फलेन प्रारब्धकर्मणा प्रतिबंधात्। अतो मरणकाली नं तदज्ञा
नध्वंसीति शंकते अंत्यमेवेति। प्रवृत्तफलस्य कर्मणः स्वोपपादककुज्ञानलेशात् वि
ज्ञानशक्तिप्रतिबंधकत्वेपि जन्मांतरादि सर्वसंसारहेत्वज्ञानध्वंसिज्ञानसामर्थ्यप्रति
बंधकत्वे मानाभावात् मध्ये जातं ज्ञानमनिवर्तकमित्याशंक्यं वक्तुमंत्यस्य च ज्ञान
स्यानिवर्तकत्वेनांत्यत्वं हेतुः यजमानांतरस्यांत्यज्ञानेतरध्वंसित्वादृष्टेरंत्यत्वस्या
ज्ञानध्वंसित्वेनानियमात्॥ न च यजमानांतरे प्रजापतौ चांत्यज्ञानं ज्ञानत्वात् अज्ञा
नध्वंसि सर्वज्ञानेषु बंधहेत्वज्ञानध्वंसित्वादृष्टेर्ज्ञानत्वहेतोरनैकांत्यात्र चांत्यकर्मे
ज्ञानमेकमज्ञानत्वात् अज्ञानध्वंसीति युक्तं। उपासतादृग्ज्ञानवैदृश्यपितरयोगादुपा

स्वहेतोरनैकांतत्वादित्यभिप्रेत्य दूषयति नेत्यादिना॥ मूलकारणाभावात्तदंतरेणाचो
त्पत्त्यावतिप्रसंगात्। संस्काराधीनत्वे च विच्छेदाभावात्। अंसस्य च ज्ञानस्य वा
ज्ञानध्वंसित्वासिद्धेरयुक्तं प्रजापतेरेकत्वदर्शनमित्युपसंहरति। तस्मादिति। प्रजाप
तेः सुप्तप्रतिबुद्धवत्प्रकृष्टादृष्टोत्थकार्यकार्यकारणवत्वात्सर्वकल्पीयपदपदार्थ
वाक्यस्मरणवतः स्मृतिविपरिवर्तिनो वाक्याद्विचार्यमाणाददृष्टसहकृतात्तत्त
ज्ञानं स्यात्। लोके विशिष्टादृष्टोत्थकार्यकरणानां प्रज्ञाद्यतिशयदर्शनात्। तेन च ज्ञा
नेन जन्मांतरे हेतुविद्यास्वपि प्रारब्धं कर्म तज्जं च फलमारत्वाद्य विद्यालेशालोप्स
विष्यतीति परिहरति नैष दोष इति। संगृहीतमर्थं संसमर्थयते अथेत्योऽद्विचतुष्टयाद्विप
रीतमधर्मादिचतुष्टयं तत्र हेतोः सर्वस्य पाप्मनो ज्ञानाद्यतिशयेन नाशादिति यावत्। ६५
उत्कृष्टत्वं प्रकृष्टज्ञानादिशालित्वं। उत्कृष्टजन्मफलमाहतदुद्भवं चेति। तस्य ज्ञानादिवैरा

दिना। धर्मो ३

रा॰घे पौराणिकीं स्मृतिमुदाहरति तथा चेति। अप्रतिघमप्रतिबंधं निरंकुशमित्येतत्प्र
सिद्धं संबध्यते। यस्यैतच्चतुष्टयं सहसिद्धं निर्वर्ततेति संबंधः। सहसिद्धत्वस्मृतेः सोवि
धेदिति श्रुतिविरुद्धत्वादप्रामाण्यमिति विरोधाधिकरणस्थन्यायेन शंकते। सहसिद्धत्वरति।
ससैव सहजे ज्ञाने स्वहेतोरूर्ध्वमपि स्यादिति चेन्नेत्याह नहीति। अन्येनाचार्येणानुपदि
ष्टमेव प्रज्ञापतेर्गनमुदीतीत्येवमर्थपरत्वात् सहसिद्धवाक्यस्य तत्स्थात्स्याक्रस्यप्र
यविरुद्धमर्थं वा साम्नलेशात् अतो न विरोधः॥ श्रुतिस्मृत्योरिति सम्माधत्ते नेत्यादि
ना। ज्ञानोत्पत्तेरुचा यद्यनपेक्षत्वे श्रद्धादिविधानानर्थक्यादनेकश्रुतिस्मृतिवि
रोधः स्यादिति शंकते श्रद्धेति। आदिपदेन शमादिग्रहः। अस्मदादिषु तेषां हेतु
त्वमिति चेन्नेत्याह प्रजापतेरिवेति चोदितं निरोधं निकारोतिनेत्यादिना॥ निमित्तानां
संविकल्पः समुच्चयो वा पायत्वमगुणावत्वमित्यनेन प्रकारेणाकार्येत्यतो विरोधसं

हृ·आ·२ प्रवान्तसुखादिविज्ञानकामित्यर्थः। संग्रहवाक्यं विवृणोति लोकेहीति। तद्धि सर्वं विकल्पा
दियथात्रातुरक्तं तथैव कस्मिन्नेव च। नैमित्तिके रूपज्ञानारम्भकार्थे दिरयिया मीलाहतघ
चेति। तत्र विकल्पमुदाहरति। तमसीत्यादिना। समुच्चयं दर्शयति। अस्माकं त्विति।
विकल्पितानां समुच्चितानां गुणावदगुणावत्वप्रयुक्तं भेदं कथयति। तथेति। आलो
कविरोधस्य गुणावत्वं बहुकुलत्वं अगुणात्वं मंदप्रभत्वं चक्षुरादेर्गुणावत्वं निर्मल
त्वादिति मिरोपहतत्वादिवाऽगुणावत्वमिति भेदः। दृष्टांतं प्रतिपादयति कर्माह
रवमिति। तथान्यस्यापि प्रजापतितुल्यस्य वामदेवादेर्जन्मांतरीयसाधनवशा
दीश्वरानुग्रहादस्मिन् जन्मनि श्रुतवाक्यादेर्ज्ञानमुदेतीति शेषः। स्वगुरुस्त ९६
तुल्यो नाधिकारी क्वचिदित्युच्यते। तयोऽन्वयव्यतिरेकारम्भमालोचनं स्येत केतु
प्रकृतिषु ज्ञाननिमित्तानां समुच्चयं दर्शयति। क्वचिदित्यादिना। एकांतं नियतमाव

128

म्यक ज्ञानोदयलग्नेपि निभिन्नत्वमिति भाव ल्। अथ प्रणिपातादिव्यतिरेकेण न प्रजापतेरपि ज्ञा
नं संपन्नवृत्तिसामग्र्यभावादत आह धर्मादीति। प्रणिपातादेर्ज्ञानोदयप्रतिबंधकनिवर्त्त
कत्वात्प्रजापतेश्च तन्निवृत्तेर्जन्मांतरीयसाधनायत्तत्वादाधुनिकप्रणिपातादिना विना
स्मृतवाक्यादेवैकपधाः संपन्नवृत्तीत्यर्थः। तर्हि श्रवणादिव्यतिरेकेणापि प्रजापतेर्ज्ञानं स्या
दित्याशंक्याह वेदांतेति। न तैर्विना ज्ञानं कस्यचिदपि स्यात्प्रजापतेस्तु जन्मांतरीयश्रवणान
न्तरमिदानीं मनुस्मृतवाक्यात्तदुत्पत्तिरिति दोषः। तर्हि श्रवणादिकमपि प्रतिबंधकनिवर्त्तकत्वे
न प्रजापतेरादरणीयं तन्निवृत्तिमंतरेण ज्ञानोत्पत्त्यनुपपत्तेरित्याशंक्याह पापादीति। आ
त्मनोमनसोर्मिथः संयुक्तयोः संबंधि यत्पापं तत्कार्यं चि रागादि तेन ज्ञानोत्पत्तौ प्रतिबंध
स्य पूर्वोक्तेन न्यायेन क्षये सति प्रजापतेरीश्वरानुग्रहात्स्मृतवाक्यस्य परमार्थज्ञानोत्पत्तौ
केवलस्य निमित्तत्वात्तस्याधुनिकश्रवणाद्यतिरेकेण ज्ञानोदयेपि न तद्विधिवैयर्थ्यं। अस्मा

129

कंतद्वारा दैवतदुत्पत्ते र्वाक्यतात्पर्यादिज्ञानं संभवेपि ज्ञानसाधनमाचार्यादिषु न विकल्प
समुच्चया वित्यर्थः ॥ अधिकारिभेदेन ज्ञानहेतुषु विकल्पेपि तेषामस्मासु समुच्चयात्र श्रुति
स्मृतिविरोधो स्तीत्युपसंहरति तस्मादितीति। प्रजापतेर्भयाविष्टत्वेन संसारांतर्भूतत्वमुक्तमु
दानीं तत्रैव हेत्वंतरमाह इतश्चेति। अरत्याविष्टत्वे प्रजापतेरेकाकित्वं हेतूकरोति। यत इति।
कार्यसातिकारणस्थाया अरतेर्लिंगमित्यनुमानं सूचयति। इदानीमपीति। आदिपदेन भया
विष्टत्वादिग्रहः॥ अरतिं प्रतियोगिनिरुक्तिद्वारा निर्वक्ति। रतिर्नामेति कथं तर्हि यथोक्ता
इति निरसनमित्याशंक्य सद्वितीयमैच्छदित्येतद्याचष्टे स्मैतस्या इति। सहेत्यस्य वाक्यस्य
पातनिकां करोति तस्येति। तेन भावेनेतियावत्। रूपमभिमानमात्रेण यथोक्तरूपपरिमा
णत्वं तत्राह तस्येति। निपातोच्चारणे तस्यैव पुनरनुवादो न्वयार्थः। परिमाणमेव प्रश्न ६
पूर्वकं विवृणोति किमित्यादिना। संप्रतिस्त्रीपुंसयोरुपपत्तिमाह। सतयेति। ननु द्वेधाभावे

विराजो वा संसक्तस्त्रीपुमानस्य पिंडस्य वा। नार्थः सत्त्वाशब्देन विराड्रूहायोग्यात् तस्य कर्मत्वाद्वि
तीये सात्मशब्दानुपपत्तिस्तत्राह इममिति। तथा च सत्त्वाशब्देन कर्त्तृत्वे या विराड्रूहणम वि
रुद्धमित्यर्थः॥ तदेव स्फुटयति। नेत्यादिना। कस्य तर्हि द्विधाकरणमित्याशंक्याह किंतर्हि इ
ति। तच्च द्विधाकरणं कर्मेति। कथं तर्हि तत्रात्मशब्दः संभवतीत्याशंक्याह। स एव चेति। तथा
भूतात्संसक्तमायात्तं परिमाण्यो। भूतादिति यावत्॥ न केवलं मनुः शतरूपेत्यनयोरेव पदं वचनं
किंतु लोकप्रसिद्धयोः सर्वयोरेव तयोरेतद्दृष्टव्यं। सर्वत्रास्य संभवादित्याह। लौकिकयोरि
ति। उक्तेर्निर्वचने लोकानुभवमनुकूलयति तस्मादिति। प्रागिति। सहधर्मचारिणीसंबंधा
त्पूर्वमित्यर्थः। आकांक्षाद्वारा षष्ठीमादायानुभवमनकंव्यमाचष्टे कस्येत्यादिना। अनु
भवसिद्धेऽर्थे प्रामाणिकसंमतिमाह एवमिति। वल्कशब्दो विकारार्थः। द्वैधापातने ससेक्तौ
भागः पुरुषोऽपरस्तु स्त्री तत्रैव हेत्वंतरमाह यस्मादिति। उद्वहनात्प्रागवस्थायामाकारः पु

हः अ॰ २

रूपार्द्धः स्पर्शस्तयोर्यस्मात् संस्पर्शने विवर्जितेति तस्मादुद्वहनेन प्राप्तस्पर्शेन पुनरितरो भागः स्पृश्यते यथा निदलार्द्धौ संस्पर्शः संपुटीकरणेन पुनः संस्पर्शी क्रियेते तद्वदिति योजना। पूर्वमपि स्वाभाविकयोग्यतावशेन संसर्गोच्छेदनादिना संसारस्येति सूचयितुं पुनरिस्कन्नं। पुरुषार्द्धस्येतरार्द्धस्य च मिथः संबन्धान्मनुष्यादिसृष्टिरित्याह तामित्यादिना। स्मार्त्तप्रतिषेधमिति न सगोत्रां समानप्रवरां भार्यां विन्देतेत्यादिकमितियावत्। अकृत्यं हीदं यत् दुहितृगमनं मातृतस्मात्पंचमात्पुरुषात् पितृतस्मात् सप्तमादिति स्मृतेरितिमत्वाह। कथमिति। तयोरुत्पत्तिं तद्गमनं कथमित्याशंक्याह यद्यपीति। ह्रातरूपायां गोभावमापन्नायाम्रृषभादिभावो मनोरपि न तु तावता यथोक्तदोषपरिहारस्तयोर्वडवादिभावे तु न कारणमस्तीत्याशंक्याह। उत्तमाचयति त तत्तस्यां गोभावादनन्तरमितियावत्॥ ९८

गवांजन्मार्थं मिथः संभवनं ततः शब्दार्थः तत्रैतेषामुत्पत्तौ सत्त्वामितियावत्। वाकस्य

वीप्सा विवक्षितेत्याह। तमिति। तामि नास्ति नयति। तामजामिति। तां वडवां तां गर्दभीं चेत्यपि
द्रष्टव्यं। ततो मिथः संप्रवदनाद्यथोक्तादिति यावत्। विन्दी व्याप्यमानं स्यात्तत्र स्येकमुपरे
त्रा संप्रवं मन्वानः संक्षिप्योपसंहरति एवमेवेति। तद्विभजते इदं मिथुनमिति पमुकर्म
त्रयोगोपन्यायः। यद्यपि मन्वादिस्मृतिरेकोक्ता तथापि सर्वास्मृतिरूक्तैवेति इसि द्ववत्॥
ल्लत्याह। सप्तर्षितिरिति। अवगतिं प्रश्नस्तवे कं विशदयति कथमिसाहीना। कथंस्पष्टिरस्मीत्य
जा प ५ वधार्यते कर्त्ता क्रिययोरेकत्वायोगादित्याशंक्याह स्पष्टतरमिति। पदार्थमुक्त्वा वाक्यार्थमा
ह। यन्मयेति। जगच्छब्दादुपरितच्छब्दमध्याहृत्याहमेव तदस्मीति संबंधः। तत्र हेतुमा
ह मदंशेदित्यादिति। एवकारार्थमाहनेति। मदंशेदादिस्फक्रमाक्षिप्य समाधत्ते। कुतर
त्यादिना। नहि स्पष्टः स्रष्टुरर्थांतरं तस्यैव तेन तेन मायाविनद्वस्थानादि सर्गः। ततः
स्पष्टिरित्यादिन्याचष्टे। यस्मादिति। किमर्थं स्रष्टुरेषा विपत्तिरूपदिष्टेत्याशंक्याह स्वस्यामिति।

जगति भवतीति संबंधः। वाक्यार्थमाह। प्रजापतिवदिति। ननु सर्वा सृष्टिरुक्ता। उक्तं च प्रजापतेरुत्पत्तिसंकीर्त्तनफलं किमवशिष्यते यदर्थमुत्तरं वाक्यमित्याशंक्याह। एवमिति। आदावप्यमंथदिति संबंधः। अभिनयप्रदर्शनमेव विशदयति। अनेनेति। मुखादेरग्निप्रतियोगित्वे गमकमाह यस्मादिति। प्रत्यक्षविरोधं शंकित्वा दूषयति। किमित्यादिना। हस्तयोर्मुखेन च योनित्वाबहुप्रयोगे निमित्तमाह। अस्तीति। प्रजापतेर्मुखादिसमग्निः सृष्टोपि रूपं ब्राह्मणमनुगृह्णातीति तत्राह तथेति। उक्तेऽर्थे श्रुतिस्मृतिसंवादं दर्शयति तस्मादिति। आग्नेयो वै ब्राह्मण इत्याद्या श्रुतिस्तदनुसारिणी च स्मृतिर्द्रष्टव्या। अग्निमसृजतेत्येतदुपलक्षणार्थमित्यभिप्रेत्य सत्वांतरमाह तथेति। बलभिदिंद्रः। आदिशब्देन वरुणादिर्गृह्यते। क्षत्रियौ चासृजतेति सर्वत्रा ईहास्त्रया दूरतो जातत्वं वस्वादेर्ज्यैष्ठत्वं च तच्छब्दार्थः। यस्मांस्रष्टो अजायते सा ध्रा श्रुतिस्तथाविधा च स्मृतिरनुसर्त्तव्या। अग्निसर्गस्य वक्ष्यमाणेंद्रसर्गोपलक्षणत्वे सति स

ष्टि सा कल्पादेष्वउएव सर्वे देवा इत्युपसंहार सिद्धिरिति फलितमाह तत्रेति उक्तेन वक्ष्यमाणे
पलक्ष्यं सगच्छिवदः स्तत्र यतीतिभावः किंच सृष्टिरत्र विवक्षिता किंतु येन प्रकारेण सृष्टिस्तु
ष्टिः स्थिता तेन प्रकारेण देवतादि सर्वं प्रजापतिरेवेति विवक्षितमित्याह यथेति। तत्र हेतुमा
ह स्रष्टुरिति। तथापि कथं देवतादि सर्वं प्रजापतिमात्रमित्याशंक्याह प्रजापतिरेवेति। तद्य
दिदमित्यादिकाक्यस्य तात्पर्यमाह। अथेति। स्रष्टा प्रजापतिरेव सृष्टं सर्वं कार्यमिति प्रकरणा
र्थे सर्वोक्तप्रकारेणाव्यवस्थिते सत्यनंतरं तस्यैव स्तुति विवक्षयाह यदिदमित्याद्यविद्
न्मतांतरस्य निंदार्थं वचनमित्यर्थः। मतांतरे निंदापि कथं प्रकरणार्थः स्तुतोपपत्तीत्याशं
क्याह अन्येति। एकैकं देवमित्यस्य तात्पर्यमाह नामेति। काठकं कालापकमिति वन्ना
मभेदात् ऋतुपुत्रादि देवतास्तुतिभेदात् घटन्त्राकटादिवदर्थक्रियाभेदाच्च प्रत्येकं दे
वानां भिन्नत्वात्कर्मिणामेतद्वचनमित्यर्थः। आदित्याद्येन रूपादिभेदात्तद्भेदात्तद्वत्वं

बृ·आ·३ गृह्णाति। नन्वत्र कर्मिणां निंदा न प्रतिभाति तन्मतोपन्यासस्यैव प्रतीतेरित्याशंक्याह तन्मे
ति। एकस्यैव प्राणस्य अनेकविधो देवताप्रभेदः शाकल्यब्राह्मणेन वक्ष्यत इति विवक्षित्वा
विविनक्ति प्राण इति। आग्न्यादयो देवाः सर्वे प्रजापतिरेवेत्युक्तं संप्रति तत्स्वरूपं निर्दि
धारयिषया तत्र विप्रतिपत्तिं दर्शयति। अत्रेति।। हिरण्यगर्भस्य परत्वमाद्ये द्वितीये
कल्पे संसारित्वं विधेयमिति विभागः। तत्र सर्वं पक्षं गृह्णाति पर एवेति। नन्वेकस्या
नेकात्मकत्वं मंत्रेणैवाधिगम्यते न तु परमात्मत्वं प्रजापतेरित्याशंक्य ब्राह्मणवाक्य
मुदाहरति एष इति। ब्रह्मप्रजापती सूत्रविराजौ एषशब्दः परमात्मविषयः स्मृतेश्च
पर एव हिरण्यगर्भ इति संबंधात्। तच्चैकवाक्यांतरं पठति। योसाविति। कर्मेंद्रियाविषयत्व
तींद्रियत्वं। अग्राह्यत्वं ज्ञानेंद्रियाविषयत्वं। तत्र हेतुमाह सूक्ष्मोऽव्यक्त इति। न च तस्या
सत्त्वं। प्रमात्रादिप्रमाणाभावसाक्षित्वेन सदा सत्त्वादित्याह सनातन इति। इतश्चतस्य नास ७०

136

त्वं सर्वेषामात्मत्वादित्याह सर्वेति। अंतःकरणाविषयत्वमाहाचिंत्य इति। योसौ परमात्मा
यथोक्तविराडात्मना परिणतवानित्याह स एवेति। मंत्रब्राह्मणस्मृतिषु परस्य सर्वदेवतात्म
त्वदृष्टेरत्र च सूत्रस्य तत्वातीतेस्तस्य परत्वमित्युक्तमिदानीं सर्वपदस्यांतरमाह संसार्ये
वेति। सर्वपाप्मदाहश्रवणमात्रेण कथं प्रजापतेः संसारित्वं तत्राह न हीति। अंतस्तु
र्मेपि देवतादिस्तत्र पुरस्यापि सर्वपाप्मोदयांगीकारात्तेदं संसारित्वे लिंगमित्याशंक्या
ह भयेति। असृजेति तेंच श्रवणादिति चेत्संबंधः न केवलमरतिश्रुतेरेव संसारित्वं
किंतु जन्मश्रुतेश्चेत्याह हिरण्यगर्भमिति यथोक्तहेतूनां संसार्येव स्यादिति प्रतिद
यान्वयं कर्मफलदर्शनाधिकारेब्रलेत्याचार्याः स्मृतेश्च तत्फलभूतस्य प्रजापतेस्सं
सारित्वमेवेत्याह स्मृतेश्चेति। विराडुत्कलेत्युच्यते। विश्वसृजो मन्वादयो धर्मस्तदभि
मानिनी देवता यमः। महान्प्रकृतेराद्यो विकारः सूत्रं। अव्यक्तं प्रकृतिरिति भेदः। अस्तु त

137

तर्हि द्विविधवाक्यवशात्प्रजापतेः संसारित्वमसंसारित्वं चेत्याशंक्याह अथेति। तत्द्विधवा
क्यश्रवणानंतर्यमपश्याद्धार्यः। एवंश्राद्धः संसारित्वासंसारित्वप्रकारपरामर्शार्थः वि
रोधः कृतमप्रमाण्यं निराकारोतिनिस्पादिना॥ स्वतः संसारित्वं कल्पनया च संसारि
त्वमिति कल्पनांतरसंभवद्विविधश्रुतीनामविरोधात्प्रामाण्यसिद्धिरित्यर्थः। कल्प
नयासंसारित्वमित्येतद्विशदयति। उपाधीति। औपाधिकीपरस्य विशेषकल्पने सत्र
प्रमाणमाह॥ आसीन इति। स्वारस्येन कूटस्थोप्यात्मा मनसः शीघ्रं दूरगमनदर्शनात्तदु
पाधिको दूरं व्रजति यथास्वप्ने शयानोपि मनसो गतिभ्रांत्या सर्वत्र यातीव भाति त
था जागरेपीत्यर्थः। कल्पितेन हर्षादिविकारेण स्वाभाविकेन तदभावेन च युक्तमात्मा
नं न कश्चिदपि निश्चेतुं शक्नोतीत्याह। कस्तमिति। आदिपदेन ध्यायतीवेत्यादिश्रुतयो ७१
गृह्यंते। उदाहृतश्रुतीनां तात्पर्यमाह। उपाधीति। किं तर्हि पारमार्थिकं तदाह स्वत इतिस

र्वेण संबंधः हिरण्यगर्भस्य वास्तवमवास्तवं न रूपं निरूपितमुपसंहरति एवमिति। तस्या
प्यस्मदादिवन्न स्वतो ब्रह्मत्वं किंतु संसारित्वमेव स्वाभाविकमित्याशंक्य दृष्टांतस्यासा
ध्यविकलतामाह। तथेति। तेषां स्वतो ब्रह्मत्वे प्रमाणमाह तत्वमिति। कस्तर्हि हिरण्यगर्भे
विशेषो येनासावस्मदादिभिरुपास्यते तत्राह हिरण्यगर्भेत्विति। ननु श्रुतिस्मृतिवादे
षु क्वचित्तस्य संसारित्वमपि प्रदर्श्यते सत्यं तत्तु कल्पितमित्यभिप्रेत्याह संसारित्वं त्वि
ति। अस्मदादिषु तुल्यमेतदित्याशंक्याह। जीवानां त्विति। कथं तर्हि तत्वमसि ह्येक्यसंचा
प्यमां विरुद्धीत्यादिश्रुतिस्मृतिवादाः संगच्छंते तत्राह। व्यावृत्तेति। स्वमतेन तत्वनिश्चयमु
क्त्वा परमुक्तेष्वैते तदभावमाह। तार्किकैस्त्विति। नन्वेकजीववादेऽपि सर्वव्यवहारस्यानुप
पत्तेस्तत्वनिश्चयहेतोर्बलं तुल्यमिति चेन्नेत्याह। येत्विति। स्वप्नवत्प्रबोधात्प्रागशे
षव्यवस्थासंभवादूर्ध्वं च तदभावस्येष्टत्वादेकमेवचप्रलोनाद्यविद्यायत्तादेवव्यवहा
प्रे

बृ॰ आ-२

नाश्च दर्शितिपक्षेन कार्चुनेदोष कालेति भावः। सर्वदेवतात्मकस्य प्रजापतेः संसारित्वं
कल्पनया वैपरीत्यमिति स्थितेस्तत्पक्षेतायुत्तरग्रंथस्य तात्पर्यमाह। तत्रेति। विवक्षि
तस्तत्स्वरग्रंथप्रवृत्तिरिति शेषः। तस्याविषयं परिच्छिनत्ति तत्राग्निरिति। अत्राद्ययो
र्निर्धारणार्थसप्तमी। संप्रति प्रतीकमादायाक्षराणि व्याकरोति। अथेति। अन्नसर्गानं
तरमथवान्नाद्यार्थः। रेतसः सकाशाद्देवसर्गेपि सोमनाम्नो द्विजमायातमित्यान्नं कथाह द्रवा
त्मकत्वेति। अस्यान्नस्याहुतेः सोमोत्पत्तिश्रवणात्तत्रैतत्सोपलक्षणमिति भावः। सोमस्य
द्रवात्मकत्वे फलितमाह। तस्मादिति। अग्नीषोमयोरन्नाद्ययोः सृष्टावपि जगति स्र
ष्टव्यांतरमवशिष्टमस्तीत्याशंक्याह एतावदिति। आप्यायकः सोमो द्रवात्मकत्वा
दन्नं चाप्यायकं प्रसिद्धं तस्मादुपपन्नं सोमस्यान्नत्वमित्याह द्रवात्मकत्वादिति। सो
म एवान्नमग्निरन्नाद इत्यवधारणस्य विवक्षितमर्थमाह तेनेति। यथोक्तं वाक्यं सतम्यर्थः।

७२

यथाश्रुतमवधारणमवधार्य कुतो विधांतरेणात्र व्याख्यानमित्याशंक्याह। अथवेत्या-
दीति। अन्नादस्य संहर्तृत्वादग्नित्वमन्नस्य च संहरणीयतया सोमत्वमवधारयितुं यु-
क्तमित्यर्थः। नन्वस्य सोमत्वेन न नियमोऽग्नेरपि जलादिना संहारान्नाचान्तुरग्नित्वेन न-
नियमसोमस्यापि कदाचिद्दह्यमानत्वेनान्नत्वात्तत्कुतोर्थबलमित्याशंक्याह अग्नेर-
पीति। सोपि संहार्यश्चेत्सोम एव स च स च संहर्ता चेदग्निरेवेत्यवधारणासिद्धिरित्यर्थः।
प्रजापतेः सर्वात्मत्वमुपक्रम्य जगतो द्वेधा विभक्तत्वाभिधानं कुत्रोपयुक्तमित्याशंक्या-
तस्य सत्रे पर्यवसानात्तस्मिन्नात्मबुध्योपासकस्य सर्वहितोपराहितं फलमत्र विवक्षितमित्या-
ह। एवमिति। अनुग्राहकदेवसृष्टिसिद्ध्या तदुपासकस्य फलं। तदर्थमादौ देवसृष्टिं स्तो-
ति सेषेति। अग्निमर्त्येत्यादिश्रुतेरुपादयोस्यावयवास्तत्कथं तत्सृष्टिरुच्यतेऽतिशायवती-
त्याशंकते। कथमिति। प्रजापतेर्यजमानावस्थापेक्षया देवसृष्टेरुत्कृष्टत्ववचनमवि-

विरुद्धमिति परिहरति। अत आहेति। देवस्य ऐरति स्तोतृत्वाभावशंकानुवादार्थोयमारब्धः
स्तानस्येकपत्ल सर्णं कर्मणोपीति द्रष्टव्यं। अतिसृष्टिरित्यादि व्याचष्टे। तस्मादिति। देव
तादिस्रष्टातदात्मा प्रजापतिरहमेवेत्युपासितुस्तद्भावापत्यात तत्स्वरूपत्वं फलतीत्यर्थः।
पूर्वोत्तरग्रंथयोः संबंधं वक्तुं प्रतीकमादाय द्वैतं कीर्तयति तद्धेत्यादिना॥ तस्यादेयता
र्थं वैदिकमित्युक्तं। साधनमित्येकमुक्तिसाधनं पुरःस्फुरति तन्निरस्यति। ज्ञानेति।
एकरूपस्य मोक्षस्यानेकरूपं न साधनं भवतीति भावः। मुक्तिसाधनं ज्ञानं वस्तुतं
त्रं तत्वतानमिदं तु कारकसाध्यमतोपि न तद्धेतुरित्याह। कर्मादीति। किंचेदं प्रजाप
तित्वफलावसानं मृत्युरस्यात्मा भवति श्रुतेः नचतदेवत्वं केवलं भया इत्यादि। अवणा
दतोपि न मुक्तिहेतुरित्याह साध्यमिति। किंच मुक्तिर्व्याकृतादर्थांतरमन्यदेव तद्विदि
तादित्यादिश्रुतेरिदं तु नामरूपव्याकृतमतोपि न तद्धेतुरित्याह एतावदेवेति। संप्रत्या

हृतकंडिकामवतारयन्प्रवक्तृवाक्यात्माकूतस्य तच्छेदमित्यादेर्वाक्यस्य तात्पर्यमाह। अथे
ति। ज्ञानकर्मफलोक्त्यानंतर्यमिथ्यत्राब्दार्थः। बीजावस्थासामासप्रत्यगविघातस्यानिर्दे
शमिदत्वमेवनसाक्षान्निर्देश्यत्वमनिर्वाच्यत्वादिति वक्तुं निर्दिशति स्फुटं। वृक्षस्य
बीजावस्थांलोके निर्दिशतीतिसंबंधः। यज्ज्ञाने पुमर्थासिस्तदेव वाच्यं किमितिप्रत्यग
विषोच्यते तत्राह कर्मेति। उद्धर्त्तव्य इति तन्मूलत्वेनलनिरूपणमर्थवदिति शेषः। अथपुरु
षार्थमर्थ्यमानस्य तदुद्धारोपि क्वोपयुज्यते तत्राह। तदुद्धरणे हीति। ननु संसारस्य मू
लमेव नास्ति स्वभाववादात्प्रधानादेर्वा तन्मूलं नारातं ज्ञालेत्याशंक्य श्रुतिस्मृतिभ्यां
परिहरति। तथाचेति। ऊर्ध्वमूलत्वं कारणं कार्यापेक्षयापरमव्याकृतं मूलमस्यैवेत्यू
र्ध्वमूलो हिरण्यगर्भादियो मूलापेक्षयावाङ्‌ःशाखाइ सवाङ्‌ःशाख एवमूर्ध्वमूलमधः
शाखमित्यादिगीतापिनेतत्या। अस्ति हि संसारस्य मूलं नेदममूलं भविष्यतीति श्रुतेः।

हृ॰आ॰ २

तच्चाज्ञातं ब्रह्मैवेति श्रुतिस्मृतिप्रसिद्धिसिद्धमिति भावः। संप्रति प्रतीकमादाय पदानि व्या
चष्टे तदित्यादिना। प्रत्यक्षाभिधानेन तदिति सर्वनाम्ना बीजावस्थं जगदभिधीयते
परोक्षत्वादिति संबंधः। कथं जगतो बीजावस्थत्वमित्याशंक्य तदित्यस्यार्थमाह।
प्रागिति। कथं तस्य परोक्षत्वं तत्राह क्षतेति। निपातार्थमाह सुखेति। हे शब्दमभि
नयति किलेति। मित्यर्थत्वेन संसारत्वोक्तिः। पदद्वयसामानाधिकरण्यलब्धमर्थ
माह सुखेति। हे शब्दमभिनयति किलेति। यथावर्णितमित्यनर्थत्वेन संसारत्वोक्तिः। पद
द्वयसामाधिनोकरण्यलब्धमर्थमाह तदिदमिति। एकत्वमभिनयेनोदाहरति तदेवेति। ए
कत्वावगतिफलं रूपयत्यपेति। सामानाधिकरण्यवशादेकत्वे न निश्चिते सत्यनंतरं ७४
नासतो विद्यते भावो नाभावो विद्यते सत इति स्मृतिरनुसृता भवतीति भावः। अस्तातं
ओल जगतो मूलमित्युक्तात्तद्विवर्तो जगदिति निरूपयति। तदेवं प्रकृतमिति। ततीयामिसं भावा

र्थत्वेन व्याचष्टे नाम्नेति। क्रियापदप्रयोगाभिप्रायं तदनुवादपूर्वकमाह व्याक्रियतेति। तत्र प
दच्छेदपूर्वकं तद्वाच्यमर्थमाह। व्याक्रियतेत्यादिना। स्वयमेवेति कुतो विशेष्यते कारणमंतरे
णकार्योत्पत्तिरयुक्तेत्याह तत्कथमाह सामर्थ्यादिति। निर्हेतुकार्यसिद्ध्यनुपपत्त्याक्षिप्तोऽतियं
ताजनयिता कर्त्ता चोत्पत्तौ साधनक्रियाकारणव्यापारस्तान्निमित्तं तदपेक्षा व्यक्तिभाव
मापद्यत इति योजना। नामसामान्यं देवदत्तादिनाविशेषनाम्ना संयोज्य सामान्यविशेष
वानर्थो नाम व्याकरणवाक्ये विवक्षित इत्याह असावित्यादिना। असौन्नादःश्रुतौ व्ययत्वे
न नयोरूपसामान्यं स्तु कृ हत्यादिना विशेषेण संयोज्योच्यते रूपव्याकरणा लौकिकेनेत्याह। वा
तथेत्यादिना। अव्याकृतमिव व्याकृतात्मना व्यक्तमित्येतत्सुप्तबुद्धदृष्टांतेन स्पष्टयति। त
दिदमिति। तद्वैतत्त्रमस्तत्कारणमुक्त्वा तन्नामरूपाभ्यामित्यादिना तत्कार्यमुक्तं। इदानींप्र
वेशवाक्यस्य सशब्दापेक्षितमर्थमाहायदर्थ इति। कांडद्वयात्मनो वेदस्यारंभो यस्य फलस्य

अन्यथाख्याति। आत्मख्यातिः अख्यातिः। असत्ख्यातिः।

प्रतिपत्त्यर्थो विज्ञायते। कर्मकांडं हि स्वार्थानुष्ठानाहितचित्तशुद्धिद्वारा तत्त्वज्ञानोपयोगीष्य
ते। ज्ञानकांडं तु साक्षादेव तत्रोपयुज्यते सर्वे वेदा यत्पदमामनंतीति श्रूयते। स परोऽत्र
प्रविष्टो देहादाविति योजना। सर्वस्याम्नायस्य ब्रह्मणि समन्वयमुक्त्वा तत्र विरोध
समाधानार्थमाह यस्मिन्निति। अध्यासस्य चतुर्विधख्यातीनामन्यतमत्वं वारयति।
अविद्ययेति तस्या मिथ्याज्ञानत्वेन सादित्वादनाद्यध्यासहेतुत्वासिद्धिरित्याशंक्याह
स्वाभाविकेति। विद्याप्रागभावत्वमविद्याया व्यावर्त्तयति। कर्त्रिति। न हि तदुपादानत्व
मभावत्वे संभवति न चोपादानांतरमस्तीति भावः। अन्वयस्तु सर्वत्र यच्छब्दस्य सर्ववृ ७५
त्त्यः॥ आत्मनि कर्तृत्वाद्यध्यासस्याविद्याकृतत्वोक्त्या समन्वये विरोधः समाहितः। सं
प्रत्यध्यासकारणस्यान्तत्वेपि निमित्तोपादानभेदं सांख्यवादमाशंक्यैकमेव कारणं
तद्भेदनिराकरणार्थं कथयति। यः कारणमिति। श्रुतिस्मृतिवादेषु परस्य तत्कारणत्वं प्रसि

द्धमिति भावः। नामरूपात्मकस्य द्वैतस्य विद्याविद्यमानदेहत्वात् विद्यापनोद्यत्वं सिध्यतीत्या
हृयदात्मके इति। व्याकर्तुरात्मनः स्वभावतः शुद्धत्वे दृष्टांतमाह सलिलादिवदिति। व्याक्रियमा
णयोर्नामरूपयोः स्वतोऽशुद्धत्वे दृष्टांतमाह मलमिवेति। यथा फेनादिना जलोस्यं तन्मा
त्रमेव तथाज्ञातब्रह्मोस्यं जगत् ब्रह्ममात्रं तद्ज्ञानबाध्यं चेति भावः। नित्यशुद्धत्वादिलक्ष
णमपि वस्तु न स्वतोऽज्ञानविवर्तकं केवले स्पृतत्साधकत्वात् वाक्योत्थबुद्धिवृत्त्यारू
ढं तु तथेति मन्वानोक्ते। यस्येति। आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्र
ह्मेति श्रुतिमाश्रित्याह तात्पर्यमिति। नामरूपात्मकद्वैतासंस्पर्शित्वादेव नित्यशुद्धत्वं। अ
शुद्धेर्द्वैतसंबंधाधीनत्वात् तत्राविद्याप्रयोजिकेत्यभिप्रेत्य तत्संबंधं निषेधति बुद्धे
ति। तस्मादेव दुःखाद्यनर्थासंस्पर्शित्वमाह मुक्तेति विद्यादशायां शुद्ध्यादिसत्त्वे
पि संबंधावस्थायां नैवमिति चेत् नेत्याह स्वभाव इति। अव्याकृतवाक्योक्तमसंगतं परमा

147

त्मानं परामृशति स इति। तमेव कार्यस्थं प्रत्यंचं निर्दिशति एष इति। आत्मा हि स्वतो नित्यशुद्ध
त्वादिरूपोऽपि स्वाविद्यावष्टंभान्नामरूपे व्याकरोतीति तत्सर्जनस्याविद्यामयत्वं विवक्षित्वा
ह अव्याकृतेति। तयोरात्मनाव्याकृतत्वेत इतिरेकेणाप्तावःकॢप्तीतिमत्वा विशिनष्टि आ
त्मेति। जनिमन्मात्रमिह शब्दार्थं कथयति ब्रह्मादीति। तत्रैव दुःखादिसंबंधो नात्मन इतिम
न्वानो विशिनष्टि कर्मेति। ब्रह्मात्मैकत्वे पदद्वयसामानाधिकरण्याधिगते हेतुमाह प्रविष्ट
इति। परमात्मा स स्रष्टा स सृष्टे प्रविष्टो जगतीत्यादिष्टमाक्षिपति ननु इति। पूर्वापरविरोधं स
माधत्ते नेत्यादिना। व्याक्रियतेति कर्मकर्तृप्रयोगाज्जगत्कर्तुरविवक्षितत्वमुक्तमित्याह
क्षितेति। मुच्यते वत्सः स्वयमेवेतिवत्कर्मकर्तरि लकारो व्याकरणसौकर्यविवक्षया सत्ये
व कर्तरि निर्वहतीति भावः। अव्याकृतशब्दस्य नियंत्रादियुक्तजगद्वाचित्वे हेत्वंतरमा ७६
हेदंशब्देति। कथमुक्तसामानाधिकरण्यमात्रादव्याकृतस्य जगतो नियंत्रादियुक्तत्वं त

न्नाह यथेति। नियंत्रादीत्यादिशब्देन कर्तृकरणादिग्रहणं। निमित्तादीत्यादिशब्देनोपादा
नमुच्यते विमतं नियंत्रादिसापेक्षं कार्यत्वात्संमतवदित्यर्थः। कस्तर्हि प्रागवस्थैः संप्र
तितने च जगति विशेषस्तत्राहाव्याकृतेति। कथं पुनरव्याकृते न जगदाचिख्यापरोक्षस्ते
एकस्य शब्दस्यानेकार्थत्वायोगादत आह हरश्चेति। उक्तमेव स्पष्टयति कदाचिदिति।
उभयविवक्षयाग्रामशब्दप्रयोगस्य दार्ष्टान्तिकमाह तद्वदिति। इहेत्यव्याकृतवाको
क्तिः। निवाससमात्रविवक्षयाग्रामशब्दप्रयोगस्य दार्ष्टान्तिकमाह तथेति। निवासि
जनविवक्षया तत्प्रयोगस्यापि दृष्टान्तित्वं कथयति। तथा महानिति। अव्याकृतवा
क्ये परस्य प्रकृतत्वात्तस्य प्रवेशवाक्ये सच्छब्देन परामृष्टस्य सृष्टिकार्येऽप्रवेशाउ
क्तस्तां च प्रकारांतरेण। क्षिपति। नन्विति। कथमिति सूचितामनुपपत्तिमेव स्प
ष्टयति। अप्रविष्टो हीति। दृष्टांतावष्टंभेन प्रवेशवादीनां शंकते। पाषाणेति। तदेव

निरूपोति। अथापीत्यादिना। परस्य परिच्छिन्नस्य क्वचित्प्रवेशाभावेपीतियावत्। तच्छब्दः सृ
ष्टकार्यविषयः। अथ मंतिरं जीवाख्यं दृष्टं तं व्याचष्टे येति। पाषाणाद्युलः सर्पादि
रत्र प्रविष्टरति शंकापोहार्थं सहजविशेषणं। सर्पादिरज्ज्वादिरूपेणास्थितत्त्वत पंच
करणाभावात्तत्र सहजत्वं। पाषाणादीयामभिव्यक्तानि तेषां परिणामः सर्पादिस्त
द्रूपेण तत्रस्थितानां अनुप्रवेशादपरिच्छिन्नस्यापि परस्य जीवाकारेण बुद्ध्यादौ प्रवेश
।सिद्धिरित्यर्थः। आसेत्याकृतेति। तदेवस्पष्टयति। यः स्रष्टेति। ननु तत्स्रष्टा निर्मिते
वेश्मनि ततोन्यस्यापि प्रवेशो दृश्यते तथा परेण सृष्टे जगत्यन्यस्य प्रवेशो भविष्य
ति नेत्याह यथेति। पाषाणसर्पन्यायेन कार्यस्यैव परस्य जीवाख्ये परिणामे तत्स्रष्टृ
त्वादिश्रवणमनुपपन्नमिति व्यतिरेकमिति व्यतिरेकं दर्शयति। नन्विति। अस्तु तर्हि ७७
परस्य मार्जारादिवत्स्वावस्थानत्यागेनावस्थानांतरसंयोगात्मा प्रवेशोसाह न चेति।

निरवयवोऽपरिच्छिन्नश्चात्मा तस्य स्थानांतरेण वियोगमप्राप्य स्थानांतरेण सहसं
योगलक्षणो यः प्रवेशः स सावयवे परिच्छिन्ने च कौमार्जारादौ दृष्टप्रवेशसदृशो न
भवतीति योजना। वियुज्येतित्याहेतुस्फुटैव योजना। प्रवेशश्रुत्या निरवयवत्वा
सिद्धिं शंकते सावयवइति। प्रवेशश्रुतेरन्यथोपपत्तेर्वक्ष्यमाणत्वाच्चैवमिति परिह
रति नेत्यादिना॥ अमूर्तत्वं निरवयवत्वं पुरुषत्वं पूर्णत्वं प्रकारांतरेण प्रवेशोपपत्तिं
शंकते प्रतिबिंबेति। ~~आदित्या~~ आदित्यादौ जलादिना सन्निकर्षादिसंभवान्न यथोक्त
प्रवेशासिद्धिरित्याह नवस्त्वंतरेणेति। प्रकारांतरेण प्रवेशं चोदयति प्रव्यइति। परस्या
पि कार्ये प्रवेशोऽस्तीति शेषः। गुणापेक्षया परस्य वैलक्षण्यं दर्शयन्परिहरति नेत्यादि
ना॥ स्वातंत्र्यश्रवणमेव सर्वेश्वर इत्यादि पनसादिफले बीजस्य प्रवेशवत्कार्ये
परस्य प्रवेशः स्यादिशंकित्वा दूषयति फलइत्यादिना। विनाशादीत्यादिशब्देनानात्म

151

सू॰ अ॰ २ त्वानीश्वरत्वादिगत्यतेप्रसंगस्येष्टत्वमाशंक्य निराचष्टे नचेति। जन्मादीनां धर्माणां ध
र्मिणोभिन्नाभिन्नत्वासंभवादिन्यायः। बीजफलयोरवयवावयवित्वात्पाषाणसर्पयो
राधाराधेयतेसपुनरुक्तिः। परस्यसर्वप्रकारप्रवेशासंभवेश्रुतेरालंबनंवाच्यमित्या
शंक्यपूर्वपक्षमुपसंहरति। अन्यएवेति। अगतोहि परःस्रष्टेति वेदांतमर्यादा स्रष्टैव
चप्रवेशःप्रविश्य व्याकरवाणीति प्रवेशव्याकरणयोरेककर्तृत्वश्रुतेः। तस्मात्परस्मा
दन्यस्य प्रवेशो नयुक्तिमानिति सिद्धांतयति नेत्यादिना। तत्रैवतैत्तरीयश्रुतिं संवाद
यति तथेति। ऐतरेयश्रुतिरपि। यथोक्तमर्थमुपोद्बलयतीत्याह स एतमेवेति। श्री
नारायणस्यमंत्रमपि अनुकूलयति सर्वाणीति। वाक्यांतरमुदाहरति त्वंकुमारर ७८
ति। अत्रैववाक्यशेषस्यानुगुण्यंदर्शयति पुर इति। उदाहृतश्रुतीनां तात्पर्यमाह।
नपरादिति। परस्यप्रवेशेनप्रविष्टानांमिथोभेदात्तद्भिन्नस्य तस्यापिनानात्वप्रस

क्रिरितिचां कृते प्रविष्टानामिति तान परस्यानेकत्वं श्रुतिविरोधादिति परिहरति नेदृत्वादीना।
चैविचारेति यावत्। परस्य प्रवेशेनानात्वप्रसंगं प्रत्याख्याय दोषांतरं चोदयति प्रवेशार्
ति। तेषां संसारित्वेपि परस्य किमायातं तदाहातदनन्यत्वादिति। स्थुलवद्धं मेन दूष
यतीनेति। अनुष्तवमनुससत्त्रां कृतेसु खित्वेदुःखित्वेति नासंसारित्वमिति शेषः। गर
णाप्तिसंधि कृत्तरमाह नेति। आगमो हि परस्यासंसारित्वेमानं तयोच्यते स चाध्यक्षवि
रुद्धेन स्वार्थेमानं। न चैवं परीतांज्येष्ठत्वेन बलवत्वादिति शंकते प्रत्यक्षादीति। शंकिते
ऽर्थवादी निरस्याशय माविप्लुतवति सिद्धांती स्वाप्तिसंधिमाह। नोपाधीति। उपाधिरं
तःकरणं तदध्यस्य त्वेनजनितो विशेषस्तदाभाससत्कृत दुःखादिविषयत्वात्प्रत्यक्षा
देराभासत्वान्नेनात्मन्यसंसारित्वागमस्य न। विरोधोस्तीत्यर्थः। किंच प्रत्यक्षादीना
मनात्मविषयत्वादात्मविषयच्चागमस्य भिन्नविषयानानयोर्मिथो विरोधोस्तीत्याप्तिने

ग १

सात्मनोध्यक्षादिविषयत्वे श्रुतीरुदाहरति न दृष्टेरिति। सुखमहमित्यादिप्रतिभासस्य तर्हि
का गतिरित्याशंक्य तत्पूर्वोक्तमेव स्मारयति। किं तर्हीति। बुद्ध्यादिरुपाधिस्तत्रात्मप्रतिच्छाया
तत्प्रतिबिंबस्तद्विषयमेव सुखमहमित्यादिविज्ञानमिति योजना। आत्मनो दुःखित्वा
भावे हेत्वंतरमाहायामिति। अयं देहोहमिति दृश्येन द्रष्टुस्तादात्म्याध्यासदर्शनात् दृश्य
विशिष्टस्यैव प्रत्यक्षाविषयत्वान्न केवलस्यात्मनो दुःखादिसंसारोस्तीत्यर्थः। किंचा
स्थूलादिविशेषणमस्पर्शं प्रक्रम्य तस्यैव प्रत्यगात्मत्वं दर्शयंती श्रुतिरात्मनः संसारित्वं
वारयतीत्याह नान्यदिति। किंच पादयोर्दुःखं शिरसि दुःखमिति देहावयवावच्छिन्नत्वे
न तत्प्रतीतेस्तद्धर्मत्वेनिश्चयान्नात्मनि संसारित्वं प्रामाणिकमित्याह। देहेति श्रुति ७०
वचनादात्मनः संसारित्वं शंकते। आत्मनास्त्विति सुखं तावदात्माश्रयमात्मनस्तु का
मायेति सुखसाधनस्यात्मार्थत्वश्रुतेरतस्तद्विनाशकृतं दुःखमपि तन्नेसात्मन्यसंसारि

त्वमयुक्तमित्यर्थः। आविद्यसंसारित्वानुवादेनात्मनोनतिशयानंदत्वप्रतिपादकानामनस्तु
कामाद्येत्यादिवाक्यमितिमत्वाह नेतीति। तदाविद्यसंसारेनुवादीत्यत्र गमकमाह यन्नेति
अनेन हि वाक्येनाविद्यावस्थायामेवात्मार्थत्वं सुखादेरभ्युपगम्यते। तेन तस्यात्म
धर्मत्वमित्यर्थः। आत्मनिसंसारित्वस्याप्रतिपाद्यत्वेपि गमकमाहातत्वेनेति। आत्मनो
संसारित्वे विदद्नुभवमनुकूलयितुं चाशंक्य। तर्कशास्त्रप्रामाण्यादात्मनः संसारि
त्वमिति शंकते तार्किकेति। बुद्ध्यादिचतुर्दशगुणवानात्मेति तार्किकसमयस्तेन विरोधा
तस्य संसारित्वमयुक्तं। तर्कविरुद्धो हि सिद्धांतो भवतीत्यर्थः। सर्वतर्काविरोधी वा कति
पयतर्काविरोधी वा सिद्धांतो नाद्यः। तार्किकादिसिद्धांतस्यापि मिथो वैदिकतर्कैश्च विरो
धादसिद्धिप्रसंगात्। द्वितीये तु श्रौततर्काविरोधादात्मसंसारित्वसिद्धांतोपि सिद्ध्येदि
त्यभिसंधायाह नयुक्तमपीति। किंच दुःखादिरात्मधर्मो न भवति वेद्यत्वाद्रूपादिवदि

बृ·आ·३

त्याह। नहीति। प्रत्यक्षाविषयत्वेऽप्यात्मप्रतीचस्तादृशविषयदुःखविशेष्यत्वमयुक्तं प्रत्यक्षाप्रत्यक्ष
योः शब्दाकाशयोरिव दुःखात्मनोरपि गुणगुणित्वसंभवादिति शंकते आकाशस्ये
ति। यत्र धर्मधर्मिभावस्तत्रैकज्ञानगम्यत्वं दृष्टं यथा शुक्लो घट इति। तद्व्यापकं व्यावर्त्त
मानं दुःखात्मनोर्धर्मधर्मित्वं व्यावर्त्तयति। शब्दाकाशयोरपि गुणगुणिभावो नास्माकं
संमतः शब्दतन्मात्रमाकाशमिति स्थितेरित्याशयेनाह नैकेति। कथं तदनुपपत्तिस्तत्राह
नहीति। नित्यानुमेयस्येति जरत्तार्किकमतानुसारेण सांख्यसमयानुसारेण चोक्तं।
आधुनिकतार्किकं प्रत्याह तस्य चेति। सुखादिवदात्मनोपि प्रत्यक्षेण विषयीकारे स
त्येकस्मिन् देहे तदेकसंमतेरात्मांतरस्य तत्रायोगादेकत्र भोक्तृद्वयानिष्टेः पुरु
षांतरस्यान्यप्रत्यक्षत्वादृष्टाभावादात्मद्वैरूप्यत्वासिद्धिरित्यर्थः। दीपस्य स्वव्यव
हारहेतुत्वेन विषयविषयित्ववदेकस्यैवात्मनो दृष्टदृश्यत्वसिद्धेर्दृष्टाभावो नास्तीति

८०

शंकते एकस्येति। आत्मनो विषयविषयित्वं कार्त्स्न्येनांशाभ्यां वा। आद्येपि युगपत् क्रमेण वा
नाद्य इत्याह। न युगपदिति। क्रियायां गुणत्वं कर्तृत्वं तत्र प्राधान्यं कर्मत्वं। अतो युगपदेक
क्रियां प्रत्येकस्य साकल्येन गुणप्रधानतायोगान्नैवमित्यर्थः। न द्वितीयः। एकस्यावयवा
भावादिति मत्वा कल्पांतरं प्रत्याह। आत्मनीति। एतेन प्रदीपदृष्टांतोपि प्रतिनीतः। तस्यांशा
स्यांतद्भावे प्रकृतामनुकूलत्वात्। ननु विज्ञानवादिनो युगपदेकस्य विज्ञानस्य साकल्ये
न ग्राह्यग्राहकत्वमुपयंति तथा तद्वदात्मनोपि स्यात् तत्राह। एतेनेति। एकस्याभयथा
त्वनिरासेनेत्यर्थः। मा क्षत्मस्य क्षमागमिकं पारिभाषिकं वात्मनः संसारित्वं आनु
मानिकं तु भविष्यति। दुःखादिकं क्वचिदाश्रितं गुणत्वाद्रूपादिवदित्याश्रये सिद्धे प
रिशेषादात्मनस्तदाश्रयत्वादित्याशंक्याह प्रसक्तेति। न हि मिथो विरुद्धयोर्गुण
गुणित्वमनुमेयं। दुःखादेश्च साभासबुद्धिस्थत्वात्पारिशेष्यासिद्धिरित्यर्थः। साभासं

157

तःकरणानिष्ठदुःखादीस्तत्रप्रमाणाभावात्कथंसिद्धसाधनत्वमित्याशंक्यदुःख्यह
मित्यादिप्रत्यक्षस्यतत्रप्रमाणत्वादुक्तानुमानस्यासिद्धसाध्यतयापरिशेषात्सिद्धि
रित्याह। दुःखस्येति। यत्रदुःखादिरूपादिमतिदेहेदाहछेदादिदृष्टंतत्रैवतस्तत
दुःखाद्युपलंभान्नात्मनस्तद्वत्त्वमितिहेत्वंतरमाहरूपादीति। येत्वात्ममनःसंयोगादात्म
निबुध्यादयोनचवैशेषिकगुणाःप्रवर्ततीतिदूषयतिमनःसंयोगेति। दुःखस्यात्मनिमनः
संयोगजत्वेप्युपगतेपिमनोवदात्ममनःसंयोगित्वात्सावयवत्वादिप्रसंगादात्मत्वमेव
नस्यादित्यर्थः। तत्रसंयोगित्वेनसक्रियत्वंसाधयति। नहीति। संप्रतिसक्रियत्वेनसाव
यवत्वंवेप्रतिपादयतिनचेति। यद्दुःखाद्यात्मनोविक्रियेतिकैश्चिदिष्टत्वात्तस्यसक्रि ८१
यत्वमविरुद्धत्वमित्याशंक्याहनचेति। आत्मानपरिणामीनिरवयवत्वान्नभोवदितिभा
वः। किंचात्मानगुणीनित्यत्वात्सामान्यवदित्याहानित्येति। नित्यंपरमाणवइतिशेषः। [illegible] दो १

नयनुकरणार्थः। आकाशे व्यभिचारमाशंक्याह न चेति। आकाशस्यापि सत्त्वं चेदात्मन आ
काशसंभूत इत्यादिश्रुतिविरोधः स्यादिति सूचयितुमागमवादिभिरित्युक्तं। परमाण्वा
दौ व्यभिचारमाशंक्याह न चाप्य इति। न तावदणोदेवः सांतित्वमुक्तेतरसत्त्वे मानाभावा
त्। दिशश्चाकाशेंतर्भावंति। कालस्तु सर्वेनिमेषाजज्ञिरे इत्यादिश्रुतेरुत्पत्तिमान्।
मनोप्युत्पन्नमयं श्रुतिप्रसिद्धं अतो न कश्चिद्व्यभिचार इति भावः। यस्मिन्विक्रियमाणेपि ते
देवमिति बुद्धिर्न विहन्यते तदपि नित्यमिति न्यायेन परिणामवादी शंकते विक्रिय
माणमिति। तत्प्रत्ययस्तदेवेदमिति प्रत्ययः। विक्रियावत्तौ दृश्यस्यावयववत्त्वमथा
त्वं वाच्यं तदेव तस्यानित्यत्वम् अत्यंताभावस्य प्रामाणिकत्वं दुर्वचत्वादिति परिह
रति। चिद्रूपस्येति। आत्मनः सक्रियत्वं सावयवत्वं वा अस्तु तथापि नानित्यत्व
मिति स्याद्वादी शंकते। सावयवत्वेपीति। यत्सावयवं तदवयवसंयोगकृतं यथा

दृ आ-३

पटादितथासतिसंयोगस्य वियोगावसानत्वादवयवविभागेऽप्यनाशो वनुपंपन्ना।वीति
दूषयति न सावयवस्येति।यत्सावयवं तदवयवसंयोगपूर्वकमिति न व्याप्तिः सावयवे
ष्वपि वज्रादिषु अवयवसंयोगपूर्वकत्वे प्रमाणाभावादिति शंकते वज्रादिष्विति।विमतं
अवयवसंयोगपूर्वकं सावयवत्वात्पटवदित्यनुमानेन परिहरति।नानुमेयत्वादिति।
आत्मनो मनःसंयोगजन्यदुःखादिगुणवत्वे सावयवत्वसक्रियत्वानित्यत्वादिप्रसंगं
प्रतिपाद्य पक्षमुपसंहरति तस्मादिति।आत्मनोऽनर्थध्वंसार्थशास्त्रारंभान्यथा
नुपपत्त्यासंसारित्वस्य थार्थित्वाशंकते परस्येति अविद्याविद्यमानमात्मस्थमनर्थ
भ्रमं निराकर्तुं तदारंभः संभवतीत्यन्यथोपपत्त्या समाधत्ते नाविद्येति।परस्येनाविद्या
कृतसंसारित्वभ्रांतिध्वंसार्थं शास्त्रमित्येतद्दृष्टांतेन स्पष्टयति।आत्मनीति।यत्तु प
रस्य दुःखित्वमन्यस्य दुःखिनो सत्त्वं तत्राहकल्पितेति।न तावत्परस्मादन्यो दुःखी नान्योति

८२

सिद्धत्वेत्याश्रुतेः । स पुनरनाद्यनिर्वाच्याज्ञानसंबंधात्तज्जन्यैर्बुद्ध्यादिभिरैक्याध्यासमाप
न्नः संसरति । तथा च कल्पिताकाद्वारेण दुःखिनः परस्यात्मनोऽंगीकारान्नार्थापिभेरूत्था
नमित्यर्थः । परस्य प्रवेशो भामांदे यपरंपशं पराकृत्य तत्प्रवेशस्वरूपं निरूपयति जले
ति । यथा जले सूर्यादेः प्रतिबिंबलक्षणः प्रवेशो दृश्यते तथात्मनोपि सृष्टे कार्ये कल्प
निकप्रवेश इत्यर्थः । अनवच्छिन्नाद्वयचिद्रूपतोऽवस्थांतरेण संनिकर्षासंभवान्न प्रति
बिंबाख्यप्रवेशः संभवतीत्याशंक्यावस्थांतरकल्पनयाकल्पितं सन्निकर्षे केद्याश्रय
प्रतिबिंबप्रवेशं साधयति आत्मेति । तदेव प्रपंचयति । आप्तुतेरित्यादिना । स्वाभिप्रेतं
प्रवेशं प्रतिपाद्य परेष्टं परच्छेनतितिति । कुतश्चिद्दिग्देशकालाद्यपक्रमे न दिगं
तरे देशांतरे कालांतरे च प्राप्तिलक्षण इति यावत् । यत्तु परस्मादन्यस्य प्रवेष्टृत्वमिति
तन्नाह न चेति अथेदं प्रवेशनादि वस्तुतोऽविद्यमानमस्तु किमित्याविर्यं कल्प्यते तत्राह

उपलब्धाति। आत्मज्ञानार्थत्वेन प्रवेशादीनां कल्पितत्वात्तद्व्याख्यानानां न स्वार्थे पर्यवसान
मित्यर्थः। फलवत्संनिधावफलं तदंगमिति न्यायमाश्रित्योक्तमेव प्रपंचयति। उ
पलब्धेरित्यादिना। ततः शब्दोपक्रियोगपरामर्शः। तदित्यात्मज्ञानमुच्यते तस्याग्र
त्वं साधयति प्राप्यते हीति। सृष्ट्यादिवाक्यानामेकज्ञानार्थत्वे हेत्वंतरमाह भेदेति। कल्पि
तं प्रवेशं प्रतिपादितमुपसंहरति तस्मादिति। का पुनरस्य प्रवेशस्य मर्यादेत्याशंक्याहा
नखाग्रेभ्य इति। संभवति मर्यादांतरे किमिति प्रवेशस्येयमेव मर्यादेत्याशंक्याह न
खाग्रेति। दृष्टांतद्वयमाकांक्षापूर्वकमुत्थापयति तत्रेति। प्रवेशाधारो देहादिः समस्य
र्थः। प्रथमोदाहरणप्रतीकोपादानं यथेति तद्व्याचष्टे लोक इति। तस्य तत्कर्तृत्वं महा
प्रकृतत्वाज्ज्ञानुरत्वाद्वा द्रष्टव्यं॥ काष्ठादावग्नेरवहितत्वे युक्तिमाह तत्रेति। दृष्टांतद्वये ८३
विवक्षितमंशमनूद्य दार्ष्टांतिकमाह यथेत्यादिना। आत्मनो जाग्रत्स्वप्नयोर्देहद्वयीवृत्तिः।

स्वापे तु सामान्यवृत्तिरेवेत्यवांतरविभागमाह तत्रेहीति अवस्थाद्वयं सप्तम्यर्थः। न केव
लं विशेषवृत्तिरेव तदोपलभ्या किंतु सामान्यवृत्तिश्चेति चकारार्थः। अवस्थांतरे सौ वेत सै २
पितस्यैवार्थः। वाक्यांतरमवतारयितुं प्रश्नमाह तस्मादिति। यस्मादुक्तया वृत्तिरात्मनः
शरीरे दृश्यते तस्मात्त्रैवजल्लस्त्रयं च विदेहया प्रविष्टेयमिति योजना। व्याहृताज्जगतः
सकारणादात्मानं पृथक्कर्तुं न पश्यंतीति वाक्यं तद्व्याचष्टे तमात्मानमिति। विशिष्टं प
श्यंतोपि केवलमात्मानं न पश्यंतीति यावत्। चाक्षुषत्वनिषेधस्येष्टत्वमाशंक्य व्या
चष्टे नोपलभ्यत इति। उक्तनिषेधमाक्षिपति नन्विति। प्रतिषेधस्य प्राप्तिं दर्शय
न्परिहरति नेत्रादिना तन्नामरूपाभ्यां स एष रसादिवाक्यानां ज्ञानार्थत्वे मानमाह
रूपमिति। विशिष्टस्य दर्शनेपि स्वरूपस्यादर्शने हेतूक्तिरनंतरं वाक्यमित्याह तत्रे
ति प्रतिज्ञावाक्यार्थे स्थिते सतीति यावत्। तस्मात्तद्दर्शनेपि स्वरूपस्यादर्शनमिति शेषः

र्ज

विशिष्टस्यापि सर्वैत्वमात्मत्वादन्यथा प्राणनादिकर्तृत्वायोगादिति चें कृते कुत इति प्राणना
दिक्रियाकर्त्ता प्राणादिभिः संहतत्वात्तत्कर्त्तेन स्यवतीत्फत्तचा क्येनोत्तरमाहेच्यतर
ति। आत्मनि प्राणनाद्यप्रवृत्तिमुपपादयति। प्राणन्नेति प्राणनक्रियाकर्तृत्वादात्मा
प्राण उच्यते प्राणितीति व्युत्पत्तेरिति योजना। अस्य दृष्टांतमेवकारार्थमाह नान्या
मिति। एवकारार्थमनूद्य हेत्वर्थमुपहरति तस्मादिति। स्वापावस्थायां समस्तकर
णोपसंहारेऽपि प्राणस्य व्यापारदर्शनात्प्राधान्यावगमात्प्राणन्क्लिसादिवाक्यमा
द्रौ व्यारणीयक्रियाशक्तितेन प्राणसादृश्याद्वाचो वदन्नित्येतत्सर्वकमुक्तवाक्या
नि व्याचष्टे तथेत्यादिना। प्राणनवदनाभ्यामनुक्तकर्मेन्द्रियव्यापारमुपलक्षयन्वा
क्यद्वयतात्पर्यमाह द्वयं प्राणन्नेवेति। प्राणवागाद्युपाधिद्वारेणात्मनीति शेषः
दृष्टिश्रुतिभ्यामनुक्तानेन्द्रियव्यापारोपलक्षणं कृत्वानंतरवाक्ययोस्तात्पर्यमाह

प्राणन्नेवेति। प्राणा वागाद्युपाधिद्वारेणात्मनीति शेषः दृष्टिश्रुतिभ्यामनुक्तज्ञानेंद्रियव्यापारोपलक्षणं कृत्वानंतरवाक्ययोस्तात्पर्यमाह पश्यन्निति। चक्षुराद्युपाधिद्वारात्मनीति पूर्ववत्। उक्तबुद्धींद्रियव्यापाराभ्यामनुक्तव्यापारमुपलक्ष्यात्मनः स्रष्टृत्वादिपरिच्छेदो न सिध्यति संबंधं विनोपलक्षणायोगादित्याशंक्याह नामरूपेत्यादिना प्रकाश्यप्रकाशकातिरिक्तस्याभावात्तदुपलंभे चक्षुःश्रोत्रयोरिव त्वगादेरपि करणत्वादेकार्थत्वरूपसंबंधात् उपलक्षणासंभवादात्मनः स्रष्टृत्वादिसिद्धिरित्यर्थः। तथाप्युक्तकर्मेंद्रियव्यापारेणानुक्तव्यापारेणानुक्तव्यापारोपलक्षणादात्मनो न गंतृत्वादिपरिच्छेदः संगच्छते विना संबंधमुपलक्षणासिद्धेरित्याशंक्याह। क्रियाचेत्यादिना। सर्वक्रियानामरूपत्वं ग्याप्राणाश्रया च तत्र प्राणाश्रयनामविषये चारणक्रियाव्यंजकत्वं वाचो हस्तादीनां तदाश्रयादादानादिव्यंजकत्वात्तस्मादेवा

अथ क्रियाव्यंजकत्वात्प्राणाद्युपलक्षणां संभवादात्मनोगंतृत्वादिसिद्धिरित्यर्थः।शक्ति
द्वयोरुचोक्त्वासमस्तानां सारस्य प्रतीच्यध्यासोऽत्र विवक्षित इत्याहैतदेवेति।उक्तं शा
क्तिद्वयमेतच्छब्दार्थः।उक्तेऽर्थे वाक्यशेषमनुकूलयति न्यायमिति।आत्मामन्वानः सन्मनेत्य
त्युच्यते मनुत इति व्युत्पत्तेरिति।वाक्यांतरं व्याचष्टे मन्वान इति। करणे प्रसिद्धस्य मनःश
ब्दस्य कथमात्मनि वृत्तिरित्याशंक्य व्युत्पत्तिभेदमाह स्रौलानन्वाक्षीत्यादिना।आत्मादि
शब्देभ्यो।विशेषमाह तानीति।कृत्स्नवस्त्ववद्योतकानि न भवंतीत्येतदेव स्फुटय
त्येवं हीति। प्राणादीनां कर्मनामत्वे सतीति यावत्।अवद्योतमानोपि न कृत्स्नो द
ष्टः स्यादिति शेषः॥अकृत्स्नदर्शिनोप्यात्मदर्शित्वमाशंक्याह स यदिति। आत्मन उपा
सितुरात्मदर्शनात्सत्त्वमयुक्तमिति शंकित्वा परिहरति।कस्मादित्यादिना।तस्माद्वि
शिष्टात्मदर्शनेनात्मत्वदर्शितेति शेषः।उपास्तिर्ज्ञानमुपास्त इति जानातीति न स्वभाव

प

उपासनमित्युक्त्वा तद्याच्च आनन्त्यमानातीति व्याहरतीरित्याशंक्याह यावदितीति । एवंवेदे
ऽतदेव विविच्यते यरूपामीत्यादिना । आकांक्षापूर्वकं विद्यास्तु तमभवतारयति कथमिति ।
तत्रमारव्येयं पदमादत्ते आत्मेतीति । तद्यानुपे प्राणादीनीति । तास्मिन्नहमेवस्वर्वोक्तिदोष
शहितत्वं दर्शयति स तथेति । ताद्विरेषण्यादेहितद्वारेणेति यावत्कथंतद्वितोबोपसंहा
रीति नते नात्मनातिष्ठन्नुरुत्कृत्नःस्यान्तत्राह वस्तुमात्रेति स्वतोऽस्यप्राणनादिसंबंधेसं
भवति किमित्युपाधिसंबंधेनेत्याशंक्याह तथेति । आत्मनि सर्वोपसंहारवति दृष्टे
सर्वोक्ति दोषाभावान्तं पश्यन्नेवात्मदर्शी रूपसंहरति तस्मादिति । अथोक्तात्मोपासने
सर्वोक्ति दोषाभावे प्रागुक्तमेव हेतुं स्मारयति जमिति तत्स्यार्थं स्फोरयति स्वेनेति ।
वासनासातीतेनाकार्यकारणेन प्रत्यक्कृत्तेने तिपावत् । आकांक्षापूर्वकमुत्तरवाक्यं
सेतात्मनेमिवतार्थव्याकरोतितस्मादित्यादिना । नाघयोक्तमात्मानमेनोपासीतेतिरोषः ।

बृ॰आ॰३

अस्यैव द्योतकोऽद्वितीयो हि शब्दः। विद्यासूत्रं विधिस्पर्शं विनापि वक्ष्यति तेऽर्थे व्याख्यायापूर्ववि
धिरयमिति पक्षं प्रत्याहात्मेवैस्येति अत्यन्ताप्राप्तेऽर्थे हि तत्र विधिः यथा स्वर्गकामोऽग्नि
होत्रं जुहुयादिति नायं तथा पक्षे प्राप्तत्वादात्मोपासनस्य। तस्य प्राप्तिश्च पुरुषविशे
षापेक्षया विकारावस्थानेऽप्युपपत्स्यतीत्याह। इदानीमात्मज्ञानस्याविधेयत्वव्या
ख्यापनार्थं वस्तुस्वभावेनैवालोचनयात्मिस्वप्राप्तिमाह यत्साक्षादिति। उत्पाद्यतामुक्त
श्रुति। षिरात्मविज्ञानं किं तावते स्यत आह तत्रेति। कारकादीत्यादिपदं तदवान्तरसैद
विषयं। नन्वविद्यायामपनीतायामपि रागद्वेषादिसद्भावाद्वैधी प्रवृत्तिः स्यान्नहि वि
द्वदविदुषोर्व्यवहारे कश्चिद्विशेषः पश्वादिभिश्चाविशेषादितिस्यायादत आह तस्या
मिति। बाधितानुवृत्तिमात्रत्वाद्वैधी प्रवृत्तिरबाधिताऽपि मानमन्तरेण न तदभावो गादि ८८
तिभावः विदुषः सुषुप्ततुल्यत्वं व्यावर्त्तयति। पारिवोप्यादिति। श्रोतत्वानां स्पूर्वमपि स्वर्वासां

चित्तवृत्तीनां जन्म नैवात्मचैतन्यव्यंजकत्वात्मातमात्मज्ञानं श्रौते तु ज्ञाने नास्त्यनात्मेति
स्फुरणमात्मज्ञानमेवेति नित्यप्राप्तिमभिप्रेत्याह तस्मादिति। अस्मिन्पक्ष इति नित्य
प्राप्तपक्षोक्तिः। अपूर्वविधिवादी शंकते नेति। स्तुतानुदिति। सर्वेषां स्वभावतो विषयप्र
वणानींद्रियाणीति नात्मज्ञानवार्तामपि विमृष्यते तेन तदत्यंताप्राप्तत्वात् ह्यात्मज्ञाने भवत्य
पूर्वविधिरिति भावः। विशिष्टस्याधिकारिणः शाब्दं ज्ञानं शाब्दं वेदसिद्धमिति कथमप्रा
न्व प्तिरित्याशंक्याह ज्ञानेति। न खल्वत्र शाब्दं ज्ञानं विवक्षितं किंतूपासनं नाममात्रसंक
र्मतदेवज्ञानावृत्तिरूपत्वात् ज्ञानमित्येकत्वे सति। अप्राप्तत्वाद्विधेयमित्यर्थः। तयो
रेकत्वं विवृणोति नेत्यादिना। अनेन हीसारे वेदशब्दस्यार्थांतरविषयत्ववन्नासवे
दत्वमपि किं न स्यादित्याशंक्याह नेति नेति॥ उक्तश्रुतिपर्यायद्विज्ञानं श्रुते तदुपासनमे
वेति योऽन्यो नास्त्ययोतराकैकमुपास्त इत्युपक्रमादात्मेत्येवोपासीतेत्युपसंहाराच्च नस

169.

वेदेत्यत्र तावद्वेदशब्दस्योपासनार्थत्वमेष्टव्यमन्यथोपक्रमोपसंहारविरोधान्नव्याचार्य
वैशसासंपत्तादुपासनमेव सर्वत्र वेदनं तच्च सर्वथैनाप्राप्तमिति तस्मिन्सर्वविधिः
स्यादिति भावः। इतरस्त्वत्तस्मिन्नेष्टव्यो विधिरित्याह नचेति। अतः प्रवर्त्तको विधिरूपेयत इ
ति शेषः। सत्त्वात्संताप्राप्तविषयत्वान्नियमादिरूपो न प्रवर्तीत्याह। तस्मादिति। अप्राप्तो
नास्ति विधेये सत्त्वे हेतं तरमाह कर्मविधीति। कर्मात्मज्ञानविध्योः शब्दानुसारेण। विशे
षमभिदधाति यथेत्यादिना। संप्रत्यर्थतोऽप्यविशेषमाह मानसेतीति तदेव दृष्टान्तेन स्पष्ट
यति यथेति। यदि क्रिया विधीयते कथं ज्ञानात्मिकेति विशेष्यते तत्राह नचेति। इतस्त्वा
त्मोपासने विधिरस्तीत्याह प्रानेनेति। वेदान्तेषु भावनापेक्षितां तत्रान्वयोपपत्तिं विशद
यितुं दृष्टान्तमाह यथेति। भावनायां विधीयमानत्वे सतीति शेषः। प्रेरणाधर्मकः शा ८७
ब्दव्यापारः स ज्ञानकरणकः स्तुसादिशाने कर्तृत्मताकः पुरुषप्रयत्नभाव्यनिष्ठः शाब्दभाव

ञोच्यते। स्वर्गं यागेन प्रयाजादिभिरुपकृत्य साधयेदिति पुरुषप्रवृत्तिरर्थभावनेति विभा
गः। दृष्टांतस्थमर्थं दार्ष्टांतिके योजयति। तथेत्यादिना। त्यागो निषिद्धकाम्यवर्जनमु
परमो नित्यनैमित्तिकत्वां त्यागस्तितिक्षादीत्यादिपरिसमाधानादिसंग्रहार्थमित्यंत्रा
त्रयमिति संबंधः। शास्त्रं त्वागंतो दांतइत्यादिउक्तप्रकारमंत्रात्रयमन्यदपिसुत्रफामि
ति वक्ष्यमाणादिपदं। विधियुक्तानां वेदांतानां कार्यपरत्वेपि तद्धीनानां तेषां वस्तुपरते
त्यां शंकामाहयथा चेति। विष्णुदेवात्वेन तच्छेषत्वेनेति यावत्। अस्थूलादिनामारोपित
द्वैषनिषेधेन ध्येयं वस्तु समर्पयतां कथमुपास्तिविधिशेषत्वमित्याशंक्याह नेतीत्यादि
ना। ब्रह्मवेद ब्रह्मैव भवतीति तरति शोकमात्मविदित्यादीनां फलार्थकत्वेनोपास्तिविध्यु
पयोगमाशंक्य प्रेत्याह फलं चेति। मोक्षो ब्रह्मणः प्राप्तिः आत्मोपासनं विधेयमिति पक्षमु
क्त्वा पक्षांतरमाह परइति। तस्यानुपयोगमाशंक्याहतेनेति। शाब्दज्ञानेस्यासंस्पर्शापरो

स्ट·आ·२

ष्टात्वविषयताभावमिति शङ्केन हेतुं करोतीत्यानंतरं वेदांतेषु विधेयमित्यत्र मानमाहै
तास्मिन्निति। पक्षद्वये प्राप्ते प्रथमपक्षं प्रत्याह नर्थांतराभावादिति। तत्र न यत्र यत्स्व
यमेव व्याचष्टे न चेति। शाब्दज्ञानवतो विषयाभावेन विधिः संभवति अविघातत्का
र्यनिर्वर्त्तो स्वयं फलावस्थत्वाच्चेत्यर्थः। हेतुभागप्रश्नपूर्वकं विवृणोति कस्मादित्या
दिना। आत्मोपदेशो नामात्मविशेष द्वारा वाक्योत्थज्ञानातिरेकेणेति यावत्। कर्त्तव्यां
तराभावेऽपि नाक्यजन्यविज्ञानमेव विधेयं स्यादित्याशंक्याह तत्रत्वेति। दृष्टांतेऽपि वा
क्योत्थज्ञानातिरेकेणापुरुषप्रवृत्तिरस्तिचेत्याशंक्याह नत्वेति। तदनुष्ठानं तर्हि
वाक्यार्थज्ञानाधीनमिति व्यर्थो विधिस्तत्राह तत्त्वेति। अधिकारो विधिपुरुषव्यापार
संभवाद्विधिसाफल्यमित्याशंक्याह। नन्विति। अथ विमतं प्रवर्त्तकं वैदिकज्ञान
त्वाद्विधिवाक्योत्थज्ञानवदित्याशंक्य प्रवर्त्तकविषयत्वमुपाधिरित्याह न हीति। मि

८८

थ्याज्ञानानिवर्त्तकत्वमुपाध्यंतरमाह ब्रह्मेति। वाक्ये।त्यज्ञानस्य तन्निवर्त्तकत्वे विप्रवर्त्तकत्वं
द्धिं न स्यादित्याशंक्याह न चेति। द्वितीयोपाधेः साधनव्याप्तिं शंकते वाक्येति। ब्रह्मात्मैकधी
परवाक्योत्थविज्ञानस्याज्ञानतत्कार्यध्वंसित्वं धीत्वान्न साधनव्याप्तिरित्याह नेत्यादि
नातद्धादित्वाद्वस्तुपरत्वादिति यावत्। उक्तानां वाक्यानां विध्यपेक्षितार्थकत्वेन तच्छे
षत्वं शंकितमनुभाषते इष्टमेति। सिद्धांतोपक्रमे समाहितमेतदित्याह नेति। तदेवस्य
ष्टयत्यात्मेति पदोक्तमुक्तं वयत्यात्मस्वरूपेति कुत्र तर्हि विधिरात्मसाने वाक्यश्रवणे वा
क्यैतदर्थज्ञानस्मृतिसंताने वा चित्तवृत्तिनिरोधे वानाद्य इत्याह नात्मवादीति द्वितीयं
शंकते। तच्छ्रवणेपीति। अनिष्पार्थवादिवाक्यस्यासत्वादिलक्षणस्य विधिं विना श्रव
णावत्तत्वमस्यादेरपि तस्मादृते श्रवणमविरुद्धमित्यभिसंधाय दोषांतरमाह।
नेत्यादिना॥ तत्त्वमस्यादिश्रवणप्रयोजको विधिरात्मनोपि प्रयुंक्ते श्रवणमिति चेन्नै

वं स स्वल्वध्ययनविधिरन्यो वा। आघते घदपेक्षया श्रुतस्य तत्त्वमस्यादेः स्वार्थबोधित्वं कर्म
वाक्यवदिति स्वार्थनिष्ठत्वाविशेषो हित। एतस्याप्रमाणत्वात्तदीयस्वपरनिवहिकत्वं
दूषयति नेति। अर्थप्राप्तिं विवृणोति यदैवेति। अनात्मस्मृतिहेत्वज्ञाननिवृत्तौ तत्कार्यस्म
त्यनुत्पत्तेः स्वभावबलप्राप्तैवात्मस्मृतिरित्युक्तमिदानीमनात्मस्मृतेरनर्थत्वस्यान्व
यव्यतिरेकासिद्धत्वाच्चात्मस्मृतिः स्वभावप्राप्तेत्याहानर्थत्वेति। अनात्मनोऽनर्थत्व
निश्चयाच्च तदीयस्मृत्यनुपपत्तावितरस्मृतिरर्थप्राप्तेत्याहात्मावगताविति। आत्म
नश्च परत्वेष्टत्वावगमादर्थप्राप्ता तदीयस्मृतिरित्याहात्मवस्तुनश्चेति। अर्थप्राप्ता
विधेयत्वाभावमुपसंहरति तस्मादिति। अनात्मास्मृतिहेत्वज्ञानाभावादिस्त छब्दा
र्थेर्थित च्चिदेकरसात्मस्वभावबलादिति यावत्। दृष्टफलत्वात्त्वात्मस्मृतिर्न विधे ८१
येत्याह शोकेति। मिथ्याज्ञानमेव सा निवर्त्तयति न शोकादीत्याशंक्याह विपरीतेति। आत्म

स्मृतेः शोकादिनिवर्त्तकत्वे मानमाह तथा चेति विरुद्धमुत्थापयति। निरोधस्तर्हीति। यदि
वाक्योत्थज्ञानादेरविधेयत्वं तर्हि चित्तवृत्तिनिरोधो मुक्तिसाधनत्वेन विधीयतां तस्योक्त
ज्ञानादेरर्थान्तरत्वादित्यर्थः चोद्यमेव विवृणोति। अथापीति। अर्थान्तरत्वात्तस्य विधेयते
ति शेषः। तस्य मुक्तिहेतुत्वेन विधेयत्वे न विधेयत्वे विधीयतां तस्योक्तज्ञानादेरर्थान्तरत्वा
दित्याह। सर्वथेति। योगशास्त्रं संवादयति तन्त्रान्तरेष्विति। अथ योगानुशासनमिति। निःश्रेय
सहेतुः समाधिः सूत्रितस्तस्य च लक्षणमुक्तं। योगश्चित्तवृत्तिनिरोध इति। तन्निरोधाव
स्थायां चात्मनः स्वरूपप्रतिष्ठत्वं कैवल्यमाख्यातं। तदा द्रष्टुः स्वरूपेऽवस्थानमिति। एव
योगशास्त्रे मुक्तिहेतुत्वेनैषो निरोधविधिरित्यर्थः। योगशास्त्रादपि बलवतां श्रुतिमा
श्रुत्योत्तरमाह नेत्यादिना।। चित्तवृत्तिनिरोधस्य मुक्तिहेतुत्वेपि न निरोधत्वं विधिं विना त प२
त्सिद्धिरिति। अनन्येति। न तावद्यथाकथंचिन्निरोधो विधेयः सर्वस्यापि तत्संभवाद्विधिवै

वृ.आ. २ यथ्यन्तापि सर्वात्मना तन्निरोधो विधेयो ज्ञानादेव तत्सत्सिद्धेर्विध्यानर्थक्यादित्यर्थः। नान्यः
६ पंथा विद्यतेऽयनायेत्यादिशास्त्रमनुसरन्नुपेत्यवादेऽत्र सत्स्वप्युपगम्येति नि-
रोधस्य मुक्तिहेतुत्वमिदमापरामृष्टं योगशास्त्रमपि श्रुतिस्मृतिविरोधेन प्रमाणमेतेन
योगः प्रस्फुरतीन्यायादिति भावः। वेदांतेषु विधेयाभावोक्त्या विधिर्निरस्तः संप्रसंज्ञा-
त्रयवती भावना तेष्वस्तीत्युक्तं दूषयत्याकांक्षेति। तदेव स्फुटयितुमुक्तमनुवदति। यदुक्त-
मिति। आगमावष्टंभेन निराचष्टे तदसदिति। विधिमंतरेण वाक्यार्थज्ञाने प्रवृत्त्ययोगाद्वै-
धमेव तावन्नं सर्वाक्यांशानिवर्तकमित्याशंक्याह न चेति। यथा कर्मकांडेऽपि स्यादित्यर्थः।
तत्रापि वेदः कृत्स्नोऽधिगंतव्य इति विध्यंतरप्रयुक्तमेव वाक्यार्थज्ञानमित्याशंक्याह विध्यं-
तरेति। श्रुतहान्यश्रुतकल्पनाप्रसंगाच्च न विधिशेषत्वं वेदांतानामित्याह न चेति। वे- १०
दांताः स्वार्थे न मानं सिद्धार्थवाक्यत्वात्सोरोदीदित्यादिवदित्यनुमानात्तेषां विधिशेषत्वं प्रामा-

व्यार्थमेष्टव्यमिति त्वं कृते वस्तुस्वरूपेति। तदेवानुमानं प्रपंचयति तथापीति। विधेयस्तुतत्वेपी
ति यावत्फलवत्त्वेनिश्चितज्ञानाजनकत्वमुपाधिरिति मन्वानः समाधत्ते न विशेषादिति।
नन्वर्थं स्पष्टयति न वाक्यस्येति विशेषं। व्याचष्टे किं तर्हीति। तस्य प्रामाण्यप्रयोजकमन्व
यव्यतिरेकाभ्यां दर्शयति तथत्वेति सामान्यस्यायं प्रकृते योजयन्पृच्छति किंचेति। किं ते
पुवादकृतानमुत्पद्यते न वेति प्रश्नार्थः। द्वितीयेऽनुभवविरोधः स्यादिति मत्वा पक्षांतर
मनूद्य प्रत्याहान्येति प्रामाण्याहेतुसत्त्वान्नाप्रामाण्यमित्यर्थः। निश्चितज्ञानजनकेनेत्वे
विफलत्वविशेषणमसिद्धमित्याशंक्याह किंचेति। विद्वदनुभवफलश्रुतिसिद्धं वि
शेषणमिति भावः। दृष्टांतं विघटयितुं प्रश्नांतरं प्रस्तौति एवमिति। वेदांतेष्विवेति याव
त्किं वा नेति शेषः। आद्ये साध्यवैकल्यं मत्वा द्वितीयं दूषयति न चेदिति। तर्हि तद्दृष्टांतेन व
तत्त्वेमस्यादेरपि स्यादप्रामाण्यमित्याशंक्याह तदप्रामाण्यपरेति। विमतं स्वार्थमानं यथो

९१

क्तज्ञानजनकत्वाद्दृष्टादिवाक्यवदिति भावः। विपक्षे दोषमाह तदप्रामाण्ये चेति। प्रवर्त्तक
ज्ञानजनकत्वमुपाधिरिति शंकते नन्विति। साधनव्याप्तिं धुनीत आत्मेति। प्रवर्त्तक
धीजनकत्वं धर्मिणि नास्तीत्यंगीकरोति सत्यमिति। तर्हि यथोक्तोपाधिसद्भावादनुमा
नानुत्थानमित्याशंक्याह नैष दोष इति। न हि प्रवर्त्तकधीजनकत्वं प्रामाण्यकारणमिति
येन वा क्वचिदप्रामाण्यप्रसंगान्नच निवर्त्तकधीजनकत्वमपि तथा प्रसेकमुपायका
रणस्याभावेनाप्रामाण्यादिति भावः। वेदान्तेषु प्रवर्त्तकधीजनकत्वाभावो न केवलं
दोषः किंतु गुण इत्याह। अलंकारश्चेति। आत्मानं चेदित्यादिश्रुतेरेतद्बुध्वेत्यादिश्रुतै
स्तेश्चात्मज्ञानं कृतकृत्यतानिदानं न च ज्ञानस्य प्रवर्त्तकत्वे तदुक्तं प्रवृत्तीनां कुत्रास्ने
पकत्वादतो यथोक्तज्ञानजनकत्वं वाक्यानांगत्तपपामेवेत्यर्थः। शाब्दोत्थं ज्ञानं निजेय ९१
मिति पक्षं प्रतिसिष्पपक्षे वैलक्षिण्यहांतरमनुवदति यत्तत्क्रमिति। उपासनार्थत्वमित्यात्मे

पासनेन तत्साक्षात्कारं भावयेदित्येवमर्थत्वमित्यर्थः। अभ्युपगमवादेन परिहरति स
त्यमिति। यथोक्तेषु वाक्येषु आत्मोपासनं तत्साक्षात्कारमुद्दिश्य विधीयते चेत् प्रकृते
ऽपि वाक्ये तत्संभवान्नापूर्वविधिरिति प्रक्रमो भज्यते इत्याशंक्याह किं त्विति। कथं तर्हि वि
ध्यंगीकारवाचो युक्तिरित्याशंक्याह पक्षे इति। यथा पक्षे प्राप्तस्यावघातस्य व्रीहीन्नव
हन्तीति नियमरूपो विधिरंगीकृतस्तथात्मोपासनस्यापि पक्षे प्राप्तस्य तदेव कर्तव्यं
नानात्मोपासनमिति नियमस्तदर्थता प्रकृतवाक्यस्येति न प्रक्रमविरोधोऽस्तीत्य
र्थः। पाक्षिकं प्राप्तिमुक्त्वाक्षिपति। कथमिति। का पुनरत्रानुपपत्तिरित्याशंक्याह या
वतेति। आत्मविनाकार्यविताने सत्यनात्मस्मृतिहेतूनां मिथ्याज्ञानादीनामपनीतत्वा
द्धेत्वभावे फलाभावन्यायेन तासामसंभवादात्मस्मृतिसंततिरेव पुंसः सदा स्यात्का
र्यांतरायोगादिति सिद्धांतिनोऽकृतत्वान्नात्मोपासनस्य पक्षे प्राप्तिरिति। सर्वःतस्य नित्यप्राप्तिमु

179

तृ·आ·२

ष्ठामंगीकरोति। तर्हि नियमविधिवाचोयुक्तीरिक्तेत्याशंक्याह। यद्यपीति। आत्मनि निसा
पन्नोऽस्य संविदेकताने स्मरणं विस्मरणं वा यद्यपि नोपपद्येते तथापि तयोस्तस्मिन्नतु
भवसिद्धत्वान्नियमविधेः सावकाशत्वाल्लभित्साश्रयेनाह शरीरेति। अथारब्धफलस्यापि कर्मणः
सम्यक्कृतानान्निवृत्तेर्न विदुषो भोगादीनां प्रवृत्तिरत आह लब्धेति। यथा मुक्तस्येषु
षाषाणोदेरप्रतिबन्धे यावद्वेगं प्रवृत्तिरवश्यंभाविनी तथा प्रवृत्तफलस्य कर्मणो ज्ञाने
नोपजीव्यतया ततो बलवत्त्वान्न तद्वशादिदुषोपि यावद्भोगं वागादिप्रवृत्तिध्रौव्यमित्य
र्थः। आरब्धकर्मप्राबल्ये फलितमाह। तेनेति। आरब्धस्य कर्मणो यथोक्तेन न्यायेन
न प्राबल्ये तद्वशात् क्षुधादिदोषोदयो भवति तदा तानि विस्मरणादिसंभवात् ज्ञान
प्रातिभासिकत्वादवश्यंभाविकर्मापेक्षया तद्दौर्बल्यं स्यादित्यर्थः। तथापि नियम ९२
विध्यंगीकारस्य किमायातं तत्राह तस्मादिति। ज्ञानस्य पक्षे प्राप्तत्वं तत्र वैयर्थ्यः। आक्षिप

दंब्रलं च यशोमद्मादिसंग्रहार्थं विज्ञायेत्यादिनोक्तानां नियमविधित्वमुपसंहरति
तस्मादिति। आदिपदेन प्रकृतमपि वाक्यं संगृह्यते। तच्छब्दार्थमेव स्पष्टयत्यन्वयेति।
शाब्दज्ञानादेव पुमर्थसिद्धेस्तस्य तदावृत्तेस्तृतीयज्ञानस्य वा विधेयत्वात्तावादे
दांताः श्रुद्वेर्थमानस्मिन्मित्युक्तममिदानीमिति शाब्दमुपयुक्तं चोद्यमुत्थापयसन्नात्मे
ति। आत्मशब्दाद्दर्शमिति शब्दप्रयोगादात्मशब्दस्योर्थ्यपास्यत्वेनाविवक्षितत्वा
दात्मगुणकस्यानात्मनो व्याप्तत्वाच्छि तस्य प्रधानस्योपासनमस्मिन्वाक्ये वि
विक्षितमित्यर्थः। उक्तमेवार्थं दृष्टान्तेन स्पष्टयति यथेत्यादिना। अनात्मोपास
नमेवात्र विधित्सितमित्यत्र हेत्वंतरमाहात्मेति तदेव प्रपंचयति परेणेति। ततो वैल
लक्षण्यांतरमाहेति परस्येति। वैलक्षण्यफलमाहांतरेति। नात्रानात्मोपासनं वि
वक्षितमिति परिहरति। नेत्यादिना। हेत्वर्थं स्पष्टयति लक्ष्ये वेति। आत्मनश्चेदुपास्यत्वं

तदापक्रमविरोधः स्यादितिशंकते प्रविष्टस्येति। आत्मनो दर्शनप्रतिषेधं प्रकटयतिय
स्येति। तस्यैवेति नियमे हेतुमाह प्रकृतेति। तच्छब्दस्य तत्परामर्शित्वात्प्रविष्टस्य च प्र
कृतत्वात्तस्यैतनोपादानादिति हेत्वर्थः। सर्वपक्षं निगमयति तस्मादिति। प्राणनादि
विष्टस्य परिच्छिन्नत्वात्तस्य दृष्टत्वेपि सर्वस्य न दृष्टेति तं निषेधश्रुतिपर्यसावेनात्मो
पक्रमविरोधोस्तीति परिहरति वेत्यादिना तदेव विशदयति दर्नेति। कथमयमभिप्रा
य इदं श्रुतेरवगतं त्यतेत्यत आह प्राणनादीति। प्राणन्नेवेत्यादिना क्रियाविशेष
विशिष्टत्वेनात्मनो विशेषणात्तस्य दृष्टत्वेपि नासौ परिपूर्णो दृष्टः स्यादिति श्रु
तेराशयो लक्ष्यते केवलस्य तु तस्योपास्यत्वमपि संहितमकृत्स्नत्वाभावादेपा
भावादित्यर्थः। उक्तमर्थं व्यतिरेकमुखेन साधयति। आत्मनश्चेदिति। तस्यानु
पास्यत्वार्थं तद्वचनमर्थवदित्याशंक्य तदुपास्यतनिषेधस्यात्मोपास्यत्वे पर्यवसा

नमा। पि प्रेत्याहातो नेकैकेति। उपक्रमोपसंहाराभ्यामुपास्यत्वमात्मनोदर्शितमिदानीमिति
शाब्दप्रयोगादात्मोपासनमिदमित्युक्तं प्रसाहयास्त्विति। प्रयोगशब्द उपरिष्टादात्म
शब्दे इत्यत्र इति शब्दस्य यथोक्तार्थत्वाभावे दोषमाहान्यथेति। न चात्मनः स्यातं
त्रैणानुपास्यत्वार्थमिति शब्दोर्थवान्स्त्वपि रजाकव विरोधादिति दृष्टव्यमिति शाब्द
मंतरेण वाक्यप्रयोगे दोषमाह तथेति। तस्य शब्दप्रत्ययविषयत्वमिष्टमेवेति चेत्त
त्राह तच्चेति। आत्मोपास्यवाक्ये लक्षण्या इमात्मोपासनमेतदित्युक्तं तदूषयति
यत्तु इति। आत्मैवतात त्यो नानात्मेति प्रतिज्ञाया मत्रहीत्यादिनाहेतुरुक्तः संभाति त
देतत्पदनीयमित्यादिना वाक्यापोढं चोद्यमुत्थापयत्यनिर्ज्ञातत्वेति। उत्तरमात्मनेवेति।
नि दर्शनमेव स्फोरयत्यस्मिन्निति। नाप्युदित्युक्तत्वादनात्मनो विज्ञातत्वाभावश्चे
दनेनहीत्यादिशेषविरोधः स्यादिति शंकते किंनेति। तस्याज्ञेयत्वं निषेधति नेति। त

ब्र॰आ॰३

स्यापि ज्ञातत्वेनाभ्युदितिवचनमनवकाशमित्याह किं तर्हीति। तस्य सावकाशत्वं दर्शय
ति। ज्ञातव्यत्वेपीति। आत्मनः सकाशादनात्मनोऽर्थांतरत्वात्तस्यात्मज्ञानात् ज्ञातव्य
त्वायोगात् ज्ञातव्यत्वे ज्ञानांतरमपेक्षितव्यमेवेति शंकते कस्मादिति। उत्तरवाक्येनो
त्तरमाह ज्ञानेनेति। आत्मस्वनात्मज्ञानस्य कल्पितत्वात्तस्य तदतिरिक्तस्य स्वरूपाभा
वात्तद्ज्ञानेनैव ज्ञातत्वसिद्धेर्नास्ति ज्ञानांतरापेक्षेत्यर्थः। लोकदृष्टिमाश्रित्य ज्ञानेनेत्या
दिवाक्यमाक्षिपति पे अस्येति। समन्वयप्रस्तावादात्मतत्त्वस्य पदनीयत्वासिद्धिरिति शंकते
कथमिति। अससस्यापि मुसाचायदिरर्थक्रियाकारित्वसंभवादात्मतत्त्वस्य पद
नीयत्वोपपत्तिरित्याह उच्यत इति। लिखितं लक्ष्यमिष्टं अन्वेषणोपायत्वं दर्शयितुं
पदेनेति पुनरुक्तिः अनेनेत्यत्र वेदेति ज्ञानोपक्रम्यानुविन्देदिति लाभमुक्त्वा कीर्ति २४
मित्यादिश्रुतौ पुनर्दर्शनार्थेन विन्दिनानुपसंहारविरोधः स्यादिति शंकते। नान्वितेति। सं

कितं वितं विरोधं निराकरोति नेति। कथं तयोरैकार्थ्यं ग्रामादावेकत्वाप्रसिद्धेरित्याहान्यत्रेति
ग्रामादावसाले प्राप्तिरेव लाभो न ज्ञानमात्रं तथात्रापि किं न स्यादित्याशंक्याह नेत्यादि
ना। ज्ञानलाभयोः शब्दयोरर्थभेदस्तर्हि कुत इत्याशंक्याह। यत्रेति। अनात्मविलक्ष
ल्लब्धुमयोज्ञानज्ञेयोग्यसे देक्रियाप्तेरात्फलभेदसिद्धिरित्यर्थः। अनन्वात्मनो लाभोपि ज्ञा
नाद्भिद्यते लाभत्वादनात्मलाभवदित्याशंक्याह ज्ञानहेतुमात्रेण धीवैनत्वमुपाधिरि
त्याह सचेति। अप्राप्तत्वं च कीकरोरुत्पाद्येति। तच्च विधानमेव साधयति कारकेति।
किं चात्मलाभो विद्याकल्पितः कदाचित्कत्वात्संभतवदित्याह सत्त्विति। किं चासाव
विद्याकल्पितो प्रामाणिकत्वात्संप्रतिपन्नवदित्याह मिथ्येति। प्रकृते विरोधं दर्शय
त्ययं त्विति। वैपरीत्यमेव स्फोरयत्यात्मत्वादिति। अनात्मनस्तर्हि नित्यलब्धत्वान्न
तत्रालब्धत्वबुद्धिः स्यादित्याशंक्याह नित्येति। आत्मन्यलाभो ज्ञानं लाभस्तु तामिसेत

185

दृष्टांतेन स्पष्टयति यथेत्यादिना। शुक्तिकायाः स्वरूपेण गृह्यमाणाया अपीति योजना। आ
त्मलाभोऽविद्यानिवृत्तिरेवेत्युक्तं वक्ष्यमाणं च गमकं दर्शयति तस्मादिति। अवि
शेषमुपसंहरति तस्मादित्यादिना। तयोरेकार्थत्वेऽपि कथमनुविंदेदिति मध्ये प्रश्नमुत्थाप्यते
तत्राह विंदतेरिति। आदिमध्यावसानानामविरोधमुक्त्वा कीर्तिमित्यादिवाक्यमव
तार्य व्याकरोति गुणेत्यादिना। इतिशब्दादुपरिष्टाद्यथेत्यस्य संबंधः। ज्ञानस्तुतिमुक्त्वात्र
विवक्षितानि नामीदृक्फललाभस्यानविलंबितत्वादिति द्रष्टव्यं। आत्मनः पदनीयत्वे
तस्यैवात्मतत्त्वसंप्राप्तौ हेतुरुक्तोऽधुना तत्रैव हेत्वंतरत्वेनोत्तरवाक्यमवतारयति कु
तश्चेति। अन्यदनात्मेति यावत्। चिररूपस्य पुत्रे प्रीतिभावात्कथमात्मनस्तस्मात्प्रिय
तरत्वमित्याशंक्याह पुत्रो हीति प्रियतरमात्मतत्त्वमिति शेषः। लोकदृष्टिमेवावष्टभ्या
ह तथेति वित्तपदेन मानुष्यवित्तं दैवमपि वित्तं गृह्यते। विशेषणानामनात्मत्वेकं प्र

दर्शनमशक्यमित्याशयेनाह। तथान्यस्मादिति। पुत्रादौ प्रीतिव्यभिचारेपि प्राणादौ तदव्यभिचारादात्मनो न प्रियतमत्वमिति शंकते तत्कस्मादिति। पदांतरमादाय व्याकुर्वन्परिहरत्युच्यत इत्यादिना। अंतरतरत्वे प्रियतमत्वसाधने हेतुरात्मत्वमित्यभिप्रेत्य विशेष्यं व्यपदिशति यदयमिति। आत्मनो निरतिशयप्रेमास्पदत्वे कुतस्तस्यैव पदनीयत्वमित्याशंक्य वाक्यार्थमाह योहीत्यादिना। पुत्रादीलाभे दारादीनां कर्तव्यत्वेन प्राप्तप्रयत्नविरोधादात्मलाभे प्रयत्नः सुकरो न भवतीत्याशंक्याह कर्तव्यतेति। आत्मनो निरतिशयप्रेमास्पदत्वे युक्तिं पृच्छति कस्मादिति। आत्मप्रियस्योपादानमनुसंधानमितरस्यानात्मप्रियस्य हानमननुसंधानं विपर्यतीयो नात्मतिपुत्रादावपि निवेशनात्मप्रियस्यानुसंधानमिति विभागः। युक्तिलेशं दर्शयितुमनंतरवाक्यमवतारयत्युच्यते इति। यः कश्चिदात्मप्रियवादी स तस्मादन्यं प्रियं ब्रुवाणं प्रति ब्रूयादिति संबंधः।

बृ·आ·३

वक्तव्यं प्रश्नपूर्वकं प्रकटयति किमित्यादिना आत्मप्रियवादिन्येवं वदत्यपि पुत्रादिवाकार्थो
निपतो न सिध्यती साशंकयित्वा परिहरति स कस्मादित्यादिना तुशब्दोवधारणार्थः स
मर्थपदादुपरि संबध्यते तस्मादेवं वक्तीति शेषः उक्तसामर्थ्यमनूद्य फलितमाह य
स्मादिति। अथात्मप्रियवादिनायथोक्तंसामर्थ्यमेव कथं लब्धमित्याशंक्याह यथेति।
अतोन्यदार्त्तमित्यत्रात्मनोविनाशित्वादिना दृश्यस्य दुःखात्मकत्वान्नात्मियत्वस्य भ्रां
तिमात्रत्वादात्मनस्तद्वैपरीत्यान्मुख्याप्रीतिस्तत्रैवानात्मन्यमुख्येति भावः। पक्षांतर
मनूद्य दृढप्रयोगाभावेन दूषयति ईश्वरशब्द इति। तत्फलं कथयति। स य इति। अ
नुवादद्योतको ह शब्दः प्रियमात्मसुखं तस्यापि लौकिकमुख्यवन्नाशः सुखत्वा
दित्याशंकिते तन्नित्यसार्थमनुकारस्मात्रमत्र विवक्षितमित्याह नित्येति। फलश्रुते
र्गत्यंतरमाहात्मप्रियेति। मरुद्धोदं मात्मप्रियग्रहणं यन्निष्ठस्य प्रियं न प्रणास्यतीति तस्माद १६

नुसंधानकर्त्तव्यमिति स्तुत्यर्थफलकीर्त्तनमित्यर्थः। पक्षांतरमाह प्रियगुणेति। यो मंदः। स त्वा
त्मदर्शितस्य प्रियगुणाविक्तिशत्तोपासने प्रियं प्राणादि तन्नाप्नुवतीति फलं विधातुं फलव
चनमित्यर्थः। न त्वात्मानं प्रियमुपासीनस्याप्रियं प्राणादि विद्यासामर्थ्यान्नरूपति तथा च
मंदविज्ञो वर्णमंदमिलानोक्या हा ताछील्येति। ताछील्येर्थे विहितेस्योक्ततृन्प्रत्ययस्य श्रुत्यो
पादानात्स्वभावहानायोगाच्च प्रमरणशीलत्वाभावेपि प्राणादेरासंतिकमप्रमरणम
विवक्षितमित्यर्थः। तदाहुरित्यादेर्गतेन ग्रंथेन संबंधं वक्तुरत्तं कीर्त्तयति सूत्रितेति त
स्यां प्रमापामाह यदर्थेति। तर्हि सूत्रव्याख्यानेनैव सर्वोपनिषदर्थसिद्धेस्तदाहुरि
त्यादि वृथेत्याशंक्याह तस्येति। विद्यासूत्रं व्याख्यातुमिच्छंती स्तुतिः। सूत्रितविद्यावि
वक्षितप्रयोजनाभिधानायोपोद्घातं चिकीर्षति। प्रतिपाद्यमर्थं बुद्धौ संगृह्य तादर्थ्ये
नार्थांतरोपवर्णनस्य तथात्वाच्चितां प्रकृतसिद्ध्यर्थमुपोद्घातं प्रचक्षत इति न्यायादि

सर्वः यद्ब्रह्मयेत्यादिवाक्यप्रकाराणां चोद्यं तच्छेदेनोच्यते प्रकृतसंबंधासंगत्वादित्याह तदि
ति। ब्राह्मणमात्रस्य चोद्यकर्त्तृत्वं व्यावर्त्तयति ब्रह्मेति। उत्रेक्षमा ब्रह्मवेदनेच्छावत्वं
व्यावर्त्तयितुं तदेवं विशेषणं विसृजते जन्मेति। जन्म च जरा च मरणं च तेषां प्रबंधेप्र
वाहे चक्रवदनवरतं भ्रमणेन कृतं यदायासात्मकं दुःखं तदेवोदकं यस्मिन्नपारे
संसाराख्ये महोदधौ तत्र प्लवभूतं तत्तरणसाधनमिति भावत्। तत्तीरं तस्य संसारसा
गरस्य तीरं परं ब्रह्म तल्लब्धं तेषां विविदिषायाः साफल्यापत्तिस्तस्मनीके संसारे वै
राग्यं दर्शयति धर्मेति। निर्वेदस्य निरंकुशत्वं वारयति तद्विलक्षणेति। उत्तरवाक्यम
वतार्य व्याचष्टे किमित्यादिना। अथ परा यया तदक्षरमधिगम्यते इति श्रुत्यंतरमाश्रि त ३
त्याह। तद्वयेति। मनुष्यायन्मन्यंते तत्र विरूढं वस्तु स्मातीति संबंधः। मनुष्यग्रहण १७
स्य कृत्यमाह मनुष्येति। ननु देवादीनामपि विद्याधिकारो देवताधिकरणन्यायेन वक्ष्यते

तत्कुतो मनुष्याणामेवाधिकारज्ञानमित्यत आह। मनुष्या इति विशेषतः। संवादविसंवादे
नेति यावत्। तथापि किमिति तेज्ञानान्मुक्तिं सिद्धवद्ब्रुवंतीत्याशंक्याह यथेति। उभय
त्र कर्मब्रह्मणोरिति यावत्। यदुत्तरवाक्यमुपादत्ते तत्रेति। मनुष्याणां मतं तच्छब्दार्थः वस्तु
शाब्देन ज्ञानात्फलमुच्यते आक्षेपगर्भस्य चोद्यस्य प्रवृत्तौ विशेषप्रतिभासो हेतुरित्यतः
शाब्दार्थः। तद्ब्रह्म परिच्छिन्नमपरिच्छिन्नं वेति कुतो ब्रह्मणि चोद्यते तत्राह यस्येति। प्रश्नां
तरं करोति तत्किमिति। ब्रह्म स्वात्मानमज्ञासीदितिरिक्तं वेति प्रश्नस्य प्रसंगं दर्शयति।
यस्मादिति सर्वस्य व्यतिरेकविषये ज्ञानं प्रसिद्धं ततः किंविचारेणेत्याशंक्याह ब्रह्म
चेति। सर्वं खल्विदं ब्रह्मेत्यादौ ब्रह्मणः सर्वात्मनः श्रवणादतिरिक्तविषयाभावादा
त्मानमवेदिति पक्षस्य सावकाशत्वेत्यर्थः। किंशब्दस्य प्रश्नार्थत्वमुक्त्वाक्षेपार्थत्व
माह तद्यदीति। ब्रह्माह किंचिदज्ञात्वा सर्वमभवत् ज्ञात्वा वा नाद्यो ब्रह्मविद्यानर्थक्या

बृ॰आ॰३ दित्यक्त्वा द्वितीयमनुवदत्यपयेति। स्वरूपमन्यथा ज्ञात्वा ब्रह्मणः सर्वापत्तिरिति विकल्प्योभयत्र साधारणं दूषणमाह विज्ञानेति।। द्वितीये दोषांतरमाहानवस्थेति। बहिरेवाक्षेपं परिहरति। न तावदिति। अज्ञातैव ब्रह्मणः सर्वभावोऽस्मदादेस्तु ज्ञानादिति शास्त्रार्थवैरूप्यं न चास्मदादेरपि तदंतरे पातक्वावः शास्त्रानर्थक्यात् ज्ञानाद्ब्रह्मणः सर्वभावपक्षे स्वोक्तं दोषमाक्षेप्तास्मारयति फलेति। स्वतोऽपरिच्छिन्नं ब्रह्माविद्यातत्कार्यसंबंधात्परिच्छिन्नवत्भाति तन्निवृत्त्यौपाधिकं सर्वभावस्यसाध्यत्वं न चानवस्थादोषांतरानंगीकारात्रापिक्रियाविरोधो विषयत्वमंतरेण वाक्यीयबुद्धिस्फुरणादिति परिहरति। नैकोपीति। एतेन विद्याव्यर्थमपि परिहृतमित्याहार्थेति। यद्यपि ब्रह्मापरिच्छिन्नं नित्यसिद्धं तथापि तत्राविद्यातत्कार्यध्वंसरूपस्यार्थविशेषस्य ज्ञानादुपपत्तेर्न तद्वैयर्थ्यमित्यर्थः। इदानीं प्रश्नमनूद्य तदुत्तरत्वेन ब्रह्मेत्यादि १८

ऋतिमवतारयति। यदीत्यादिना। तत्र वृत्तिकृतांमतानुसारेण ब्रह्मशब्दार्थमाह। ब्रह्मेति। तस्यपरि
छिन्नत्वाज्ञानेन सर्वभावस्य साध्यत्वसंभवादिति हेतुमाह सर्वभावस्येति। सिद्धांते यथो
क्तहेतुत्वानुपपत्तिं दोषमाह। नहीति। सा तर्हि विज्ञानसाध्यामास्त्वित्यत आह विज्ञाने
ति। हिरण्यगर्भस्य नोपदेशाज्जन्मसानाक्रूलप्साबःसहसिद्धं चतुष्टयमिति स्मृतेः स्वाभा
विकत्वानन्तत्वात्तस्मात्तत्सर्वमभवदिति नोपदेशाधीनधीसाध्योसोऽश्रुतौ न चासीदि
त्यतीतकालावच्छेदस्त्रिकाले तस्मिन्नुच्यते समवर्त्ततेति न जन्ममात्रं स्मर्यते कालात्मके
न संबंधस्य स्वाश्रयपराहतत्वान्मनुष्याणां प्रकृतत्वाच्च न परं ब्रह्मेह ब्रह्मशब्दाभिप्र
परितोषाद्वृत्तिकारमतं हित्वा ब्रह्मेति ब्रह्मभाविपुरुषोति। द्विपतरतिभर्तृप्रपंचोक्ति
मा। अस्य तमाह मनुष्येति। तदेवप्रपंचयति सर्वमित्यादिना। द्वैते कृत्वं सर्वजिग्दात्मकम
परं हिरण्यगर्भाख्यं ब्रह्म तस्मिन् विद्या। हिरण्यगर्भोहमित्यहंग्रहोपास्तिस्तयासमुच्चि

193

न२

नयातत्रावमिहैवोपगतो हिरण्यगर्भपिदेय दृशोऽप्यंततोपि दोषदर्शनाद्विरक्तः सर्वकर्मफलत्रासस्यानिवृत्तकामादिनिगडः साध्यांतराभावो वा विद्यामेवार्थयमानस्तादृशो ब्रह्मसाविजीवोऽस्मिन्वाक्ये ब्रह्मशब्दार्थ इति फलितमाहेति कथं ब्रह्मसाविनि जीवे ब्रह्मशब्दस्य प्रवृत्तिरित्याशंक्याह एवं स्वेति। आदिशब्देन गृहस्थः सदृशीं भार्यां विंदेतेत्यादि गृह्यते। ब्रह्मेति। प्रकृतवाक्यकथनं तत्प्रपंचव्याख्यानं दूषयतितन्नेति। ब्रह्मशब्देति परस्मादर्थांतरस्य ग्रहे तस्य सर्वभावापत्तेः साध्यत्वादनित्यत्वापत्तेर्नतन्मतमुचितय थिः साध्यस्यापि मोक्षस्य नित्यत्वमाशंक्य यत्कृतं कृतदनित्यमिति न्यायमाश्रित्याह न हीति सामान्यन्यायं प्रकृते योजयतितत्त्वेति। भवतु सर्वभावापत्तेरनित्यत्वं का हानिस्तत्राह नित्यत्वे चेति किंच जीवस्य ब्रह्मत्वं तत्त्वविद्याकृतं पारमार्थिकं वेति विकल्प्याद्यमनूद्य दूषयत्यविद्याकृतेति। तत्रानुवादभागं विवृणोति। प्राप्तीत्यादिना। ब्रह्मभावि पुरु

९९

षकल्पनाम्यर्थेस्फुटंन्यक्कीकरोति । तद्देति । तस्मिन्पक्षे यद्ब्रह्मणात्सर्वमपि परमार्थतः परंब्रह्मासीत्तदेव प्रकृते वाक्ये ब्रह्मशब्देनोच्यत इति युक्तं वक्तुं तद्धि ब्रह्मशब्दस्य मुख्यमालंबनमिति योजना । गौर्वाहीक इतिवदमुख्यार्थोपि ब्रह्मशब्दो निर्वहतीत्याशंक्याह यथेति । निरतिशयमहत्त्वसंपन्नं वस्तु ब्रह्मशब्देन श्रुतमश्रुतस्तु ब्रह्मलक्षाविपुरुषः । अतोऽश्रुतकल्पनानस्यापवतीतस्मात्कल्पना न युक्तेति व्यावर्त्यमाह । नत्विति । अग्निरधीतेनुवाकमित्यादौ श्रुतहान्याऽश्रुतोपादानं दृष्टमित्याशंक्याह महत्तर इति । तत्राग्निशब्दस्य मुख्यार्थत्वे सत्यन्विताभिधानानुपपत्त्या कार्यासिद्धेस्तद्धानेन प्रयोजनेश्रुतमपि हित्वाऽश्रुतं गृह्यते प्रकृते त्वसति प्रयोजनविशेषे श्रुतहान्यादिर्नयुक्तिमानित्यर्थः । मनुष्याधिकारं निर्वोढुं ब्रह्मलक्षाविपुरुषकल्पनेत्याशंक्य महत्तरविशेषणं । यद्ब्रह्मविद्ययेति परस्यापि तुल्यमधिकृतत्वं तस्य चाऽविद्याकाराधिकारित्वमविरुद्धमित्यग्रे स्फुटीभविष्यती ।

दृ॰ आ॰ २

ष्ठावः। द्वितीयं कल्पमुत्थापयति। अविद्येति। ब्रह्मविद्यावैयर्थ्यप्रसंगान्नैवमिति दूषदूषयति
न तस्येति। अनुपपत्तिमेव साधयति नहीति। साक्षादृरोपमंतरेणेति यावत्। वस्तु धर्मस्य
परमार्थस्य तस्य पदार्थस्येत्यर्थः। विद्यायास्तर्हि कथमर्थवत्त्वमत आह विद्यायास्त्विति। सर्वमु
त्पादीविति यावत्। विमतमविद्यात्मकं विद्यानिवर्त्यत्वाद्रजतादिवदित्यभिप्रेत्य दार्ष्टांतिक
माह तथेति। विमतं न कारकं विद्यात्वात् शुक्तिविद्यावदित्याशयेनाह नवेति। अब्रह्मत्वादेवा
स्तवतो योगादमुक्तो ब्रह्मसावि पुरुषकल्पनेत्यपसंहरति तस्मादिति। ब्रह्मण्य विद्या
निवृत्तिर्विद्याफलमित्यत्र चोदयति ब्रह्मणीति। न हि सर्वज्ञे प्रकाशैकरसे ब्रह्मण्यज्ञान
मादिसे तमोवदुपपन्नमिति भावः। तस्याज्ञातत्वमज्ञत्वं वा क्षिप्यते। तत्राद्य इत्याह न ब्रह्मणो
तेन हि तत्त्वमसीति विद्याविधानं विज्ञाते ब्रह्मणि युक्तं पिष्टपिष्टिप्रसंगादतस्त्वज्ञातत्वमे
ष्टव्यमित्युक्तमर्थं दृष्टांतेन साधयति नहीति। मिथ्याज्ञानस्याज्ञानाव्यतिरेकाद्ब्रह्मण्यवि

१००

घा।ध्यारोपपायांहुक्तो रूप्यारोपणं हृष्टं तिलमिति द्रष्टव्यं। कल्पांतरमालंबते नब्रूम इति। ब्र
ह्मा विद्याकर्त्तृजन्मवती सस्य यथा श्रुतौ वा यस्ति दन्युस्तदाश्रयोस्तीति नात्र त्वाद्यमंगीकरो
ति भवतीति। अनादित्वादविद्यायाः कर्त्रपेक्षा पश्चाद्विनाभ्व द्वारं ब्रह्मणि पक्षां त्वनभ्युपगमाद
त्यर्थः। द्वितीयं प्रत्याह किंचिति। ब्रह्मणोप्यश्चेतनो नास्तीत्यत्र श्रुतिस्मृती उदाहरति नान्योतो
स्तीत्यादिना। ब्रह्मणो न्योचेतनोपि नास्तीत्यत्र मंत्रद्वयं पठति। यस्त्विति। ब्रह्मणो न्यस्यात्स्या
भावे दोषमाशंकते नन्विति। किमिदमानर्थक्यमवगते वा चोद्यते तत्राद्यमंगीकारोति
बाढमिति। द्वितीये नोपदेशानर्थक्यमनवगमार्थत्वादिति द्रष्टव्यं। उपदेशादवगमस्या
पि स्वप्रकाशे वस्तुनि कोपयोगोस्तीति शंकते अवगमेति। अनुभवमनुसृत्य परिहरति।
नानवगमेति। सा वस्तुनो भिन्ना चेद्द्वैतहानिरभिन्ना चेद्तन्नाधीनत्वासिद्धिरिति शंक
ते। तन्निवृत्तेरिति। अनवगमनिवृत्तेर्दृश्यमानतया स्वरूपोपलापायोगात्सकाशांतरासं

१९७

त्रयाश्च पंचप्रकारत्वमेषामिति मत्वाह नुदृष्टेति। दृष्टमपि युक्तिविरोधेत्याज्यमित्याशं
क्याह दृष्टरूपमानमिति। दृष्टविरुद्धमपि कुतो नेष्यते तत्राह नचेति। अनुपपन्नत्वमंगी
कृत्योक्तं तदेव नास्तीत्याह नचेति। युक्तिविरोधे दृष्टिरप्यासौ भवतीत्याशंकते। दृष्टेनेति।
दृष्टिविरोधे युक्तेरेवाभासत्वं स्यादिति परिहरति तत्रापीति। अनुपपन्नत्वं हि सर्वस्य
दृष्टिबलादिष्टं दृष्टस्य त्वनुपपन्नत्वे न किंचिन्निमित्तमस्तीत्यर्थः। ब्रह्मण्यपि पुरुषक
ल्पनां निराकृत्य स्वपक्षे शास्त्रस्यार्थवत्त्वमुक्तं संप्रति प्रकारांतरेण पूर्वपक्षमतिपु
प्यरति। आदिशब्देन योयं विज्ञानमयः प्राणेष्वित्याद्या श्रुतिर्गृह्यते। कुरु कर्मैव तस्मा
त्त्वमित्याद्या स्मृतिर्न्यायो मिथो विरुद्धयोरेकत्वायोगः विलक्षणत्वमन्यत्वे हेतुर्जीव
स्य परस्मादन्यत्वेपि न तस्य ततोन्यत्वमित्याशंक्याह। तद्विलक्षणश्चेति। परस्य तद्वि
लक्षणत्वं स्फुटितो दर्शयित्वा तत्रोपपत्तिमाह। कार्यादेति क्षित्यादिकमुपलब्धिमत्कर्तृकं

कार्यत्वाद्घटादिसाम्योपपत्तिः। तयोर्मिथो भेदे हेत्वंतरमाह संसारेति। जीवस्य स्वगगतदुःख
ध्वंसे दुःखं मे माभूदित्यर्थित्वेन प्रवृत्तिर्दृष्टा नेशस्य सास्ति दुःखाभावादतो भेदस्तयोरि
त्यर्थः। इतश्चेश्वरस्य न प्रवृत्तिहेतुफलयोरभावादित्याहावाकीति। मिथो भेदे श्रौतं लिंगां
तरमाह सोऽन्वेष्टव्य इति। तत्रैव लिंगांतरमाह मुमुक्षोश्चेति। गतिर्देवयानाद्या तस्यामा
गीविरोधोऽर्चिरादिद्वारेण गंतव्यं ब्रह्म तेषामुपदेशास्तेऽर्चिषमभिसंभवंतीत्यादयः त
थापि कथं भेदसिद्धिरत आह असतीति। माभूत्कृतिरित्याशंक्याह तत्स्वभावे चेति। कथं त
र्हि गत्यादिकमुपपद्यते तत्राह [illegible]स्येति। जीवेश्वरयोर्मिथो भेदे हेत्वंतरमाह कर्मे
ति। भेदे सत्युपपन्ना भवंतीति शेषः। तदेव स्फुटयति भिन्नश्चेदिति। तद्भेदप्रामाणिके
पि कथं ब्रह्मभाविपुरुषकल्पनेत्याशंक्योपसंहरति। तस्मादिति। ब्रह्मभाविनो जीवस्य
ब्रह्मत्वाद्वाच्यत्वे ब्रह्मोपदेशस्यानर्थक्यप्रसंगान्नैवमिति दूषयति नेत्यादिना प्रसंग

सू॰ अ॰ ३

मेवप्रकटयति संसारी चेदिति। विधिशेषत्वेन न ब्रह्मोपदेशोऽर्थवानिति चेत्तत्र किं कर्म विधि
शेषत्वेनोपास्ति विधिशेषत्वेन तदर्थवत्त्वमिति विकल्प्याद्यं दूषयति तद्विज्ञानस्येति।
अविनियोगाद्विनियोजकश्रुत्याद्यभावादिति शेषः कल्पांतरमादत्ते संसारिण इति।
उपदेशस्यज्ञानार्थत्वात्तदनपेक्षत्वाच्च संपत्तेस्तस्य कथं तादर्थ्यमित्याशंक्याह। वि
शर्तो हीति। व्यतिरेकमुक्त्वान्वयमाचष्टे। निर्ज्ञातेति। पदयोः सामानाधिकरण्येन जी
वब्रह्मणोरभेदावगमान्न संपत्पक्षः संभवतीति समाधत्ते नेत्यादिना। कथमेकत्वे
गम्यमानेऽपि संपदोऽनुपपत्तिरित्याशंक्याहान्यस्य हीति। एकत्वे हेत्वंतरमाहेदमिति।
एकत्वे फलितमाह तस्मादिति किं च संपत्तिपक्षे तदापत्तिः फलमन्यद्वेति विकल्प्य द्विती
यं प्रत्याह। न चेति। आद्यं दूषयति संपत्तिश्चेदिति। तद्यथा यथेत्यादिवाक्यमाश्रित्य सवरं १०२
कृते नचनादिति। संसंपत्तेरभ्यानतान्तत फलादन्यस्यान्यत्वमित्याहनेति। तस्याः मानत्वे

प्यवंमानस्याकारकत्वान्न च स्तुत्याद्युपासनादप्यस्यौन्वेन्यत्वं स्थितस्य नष्टस्य वाऽनुप
पत्तेः। श्रुतिश्च न प्रवृत्तिसिद्धस्तुत्यादिमात्राभिधायिनीत तत्तादर्थ्यात् तद्वाचोपचारादतो
ब्रह्मत्वभावः स्वतःसिद्धो नु संपादिक इत्याहविनानस्येति। अन्यस्यान्यभावे यथोक्तं वचन
मेव त्रान्त्याध्यायकृमित्यार्त्रां क्याहन वेति। ब्रह्मलोपदेशानर्थक्यप्रसंगान्न ब्रह्मभावविषु
रूपकल्पने त्क्रान्त्का तत्रैव हे-तरमाहस्तन्नेपरति। ब्रह्मलोपदेनास्य संपछेषत्वे दोषांतरमा
हेष्टार्थेति देवविद्ध्वन्निष्टमर्थमाच ष्टेसैंधवेति। यथोक्तं वस्तुतात्पर्यगम्यमस्यामुप
निषदासन्नहेतुमाह कांउद्वयेपीति। मधुकांउावसानगतमवधारणं दर्शयतीत्यनु
शासनमिति मुनिकांडं तेष्ववस्थितमुदाहरसेतावदिति। न केवलमुपदेशस्य संप
छेषत्वे बृहदारण्यकविरोधः किंतु सर्वोपनिषद्विरोधोऽस्तीत्याहतथेति। इष्टमर्थमिष्ट
मुक्त्वा तद्बाधनं निगमयति। तत्रेति। ननु बृहदारण्यके ब्रह्मत्वकंडिकायांऽजीवपरयोर्भे

Acc. No. 2494

(B) बृहदारण्यकभाष्यतात्पर्यटीका.

दोभिप्रेतः। उपसंहारे तु अभेद इति व्यवस्थायां तद्विरोधः शंकयः समाधातुमित्यत आह त
भाष्येति। ब्रह्मण्यपि पुरुषकल्पनाया मुपदेशानर्थक्यमिष्टार्थबाधश्चेत्यक्तं रहानोब्र
ह्मत्वादिवाक्ये ब्रह्मशब्देन परस्याग्रहणे तद्विद्याया ब्रह्मविद्येति संज्ञानुपपत्तिर्दोषांतर
माह व्यपदेशानुपपत्तेश्चेति अत्रोक्त ब्रह्मशब्दार्थात् जीवादन्यस्त तदात्मानमित्यत्रात्म
शब्देन परो गृह्यते तत्तद्विद्या च ब्रह्मविद्येति संज्ञासिद्धिरिति शंकते आत्मेतीति। वाक्यशेष
विरोधान्नैवमित्याह नाकृमिति तदेव प्रपंचयत्यन्यश्चेदिति। यथोक्तावगमे फलित
माह तथा च सतीति। असंतमेव व्यपदेशानुपपत्तिं विशदयति संसारीति। जीवब्रह्म
योर्भेदाभेदोपगमाद्भेदेन ब्रह्मविद्येति व्यपदेशः सेत्स्यतीत्याशंक्याह नचेति। स्यातां
वा ब्रह्मात्मनोर्भेदाभेदौ तथापि भिन्नाभिन्नविद्यायां ब्रह्मविद्येति नियतो व्यपदेशो २०३
न स्यादित्याह नचेति भिन्नत्वं विषयः। भिन्नाभिन्नविषयाविद्या ब्रह्मविषयाभिभवसे

वेति व्यपदेशासिद्धिमाशंक्याह तद्वेदेति । उभयात्मकत्वाद्वस्तुनस्तद्विधापि तथेति विकल्पो
पपत्तिमाशंक्याह नवेति अस्तु तर्हि वस्तु ब्रह्मवावकल्पिकमित्याशंक्याह श्रोतुरिति ।
संज्ञापितमपि ज्ञानं वाक्यादुत्पद्यते चेत्तावतैव पुरुषार्थः श्रोतुः सिध्यतीत्याशंक्याह ।
निश्चितं चेति । श्रोतुर्निश्चितज्ञानस्य फलवत्वे विवक्षुः संज्ञापितमर्थं वदतो न काच
न हानिरित्यत आह तरतीति । निश्चितस्यैव ज्ञानस्य पुमर्थसाधनत्वं न संज्ञापितस्येत्य
तः शब्दार्थः । जीवपरयोरसंतभेदे स्वरूपाभेदाप्तेरयोग्यायोगात्परमेव ब्रह्म ब्रह्मशब्दवा
च्यं न जीवस्तज्ज्ञानीत्यफलं संभवत्यंताभेदपक्षे दोषमाशंकृते । ब्रह्मणीति । तदात्मा
नमेवावेदिति । तात्त्वं ब्रह्मण्युच्यते तदयुक्तं तस्य ज्ञानकर्तृत्वादत एव न तत्कर्मत्व
मपि न च स्वकृतकस्य कर्मज्ञानान्मुक्तिं क्रियाकारकफलविलक्षणत्वादतो न परं ब्रह्म
ज्ञातुमित्यर्थः । शास्त्रे ब्रह्मणि साधकत्वादि दर्शयति तत्राणोरेषश्रमदोषं नोपात्तं स्माह

203

बृ.आ.२

तथा च तस्मिन्नविद्यां साधकत्वादि विरुद्धमिति समाधत्ते तत्र शास्त्रेति। स चायुक्तस्तस्यापौ-
रुषेयत्वेनासंभावितदोषत्वादिति शेषः ननु ब्रह्मणो नित्यमुक्तत्वे रक्षणार्थं शास्त्रम-
पिउपालभ्यते नेत्याह नचेति। शास्त्रादि ब्रह्मणो नित्यमुक्तत्वं गम्यते साधकत्वादि च
तस्य तेनैवोच्यते न चार्द्धजरतीयमुचितं तथा च वास्तवं नित्यमुक्तत्वं कल्पितं साधक-
त्वमित्यास्थेयं यदि तस्य नित्यमुक्तत्वार्थं सर्वथैव साधकत्वादि नेतदा स्वार्थपरित्यागः
स्यात्साधकत्वादिना विनाभ्युदयनिःश्रेयसयो रसंभवान्न च ब्रह्मणोन्यः चेतनो
चेतनो वास्ति नान्योतोस्ति द्रष्टा ब्रह्मैवेदं सर्वमित्यादिश्रुतेस्ते समाधयोक्ता व्यव-
स्थास्थेयेत्यर्थः। किंच सर्वस्यापि संसारस्याब्रह्मप्पविद्याध्यासात्मदं तत्कृतं सा- २४
धकत्वाद्यपि तन्नाध्यस्तमिति सत्युपगमे कानुपपत्तिरित्याह नचेति। तस्य तास्मिन्कल्पि-
ततं कुतोवगतमित्याशंक्याह नचेति। उक्तश्रुतितात्पर्यं संकलयति सर्वा हीति। सर्वस्यैव

तद्व्यवहारस्यैवं ब्रह्मणि कल्पितत्वे प्रकृतचोद्यस्याभासत्वं फलतीत्याह इदमसत्यमिति
परपक्षं निराकृत्य स्वपक्षं दर्शयति। तस्मादिति। तद्व्यतिरेकेण जगन्नास्तीति सूचयति
वैराढ्य इति। तत्पदार्थमुक्त्वा त्वंपदार्थं कथयति। इममिति। तयोर्वस्तुतो भेदं शंकित्वा पदांत
रं व्याचष्टे प्राणेति। तस्यापरिच्छिन्नत्वमाह सर्वं चेति। कथं तर्हि विपरीतधीरित्याशंक्या
ह किंत्विति। यथाप्रतिभासं कर्तृत्वादेर्वास्तवत्वमात्रं कल्पनायाः स्वविरोधान्नैवमित्याह पर
मार्थतस्त्विति। तद्विलक्षणमध्यस्तसमस्तसंसाररहितमिति यावत्। किमुतद्बले चेति
यं परिहृत्य किं तदेवेति। दिं चोद्यांतरं प्रस्ताह तत्कथंचिदिति सर्वथा कोक्तमविषया विशि
ष्टमपि कारितेनाव्यवस्थितं ब्रह्म नास्तिसंसाशलाचार्येण दयावता कथंचित्त्वोधि
तमात्मानमेवावेदिति संबंधः। आत्मैव प्रमेयस्तत्ज्ञानमेव प्रमाणमित्येवमथ
त्वमेवकारस्य विवक्षन्नाह। विद्येति। प्रकृतमात्मशब्दार्थं विविच्य वक्तुं पृच्छति कू

205

हीति। स एष इह प्रविष्ट इत्यत्रात्मनो दृष्टित्वाद्दर्शनादिलिंगस्य तस्यात्मत्वेवानुसंधातुं
शक्यत्वान्नास्ति वक्तव्यमित्याह नन्विति। आत्मानं प्रत्यक्षयितुं पृच्छतस्तत्परोक्षत्वव
चनमुत्तरमिति शंकते नन्वसाविति। आत्मानं चेत्प्रत्यक्षयितुमिच्छसि तर्हि प्रत्यक्षमेवं
तद्दर्शयामीत्यालेवं तदुइति। नेदं प्रतिज्ञानुरूपं प्रतिवचनमिति चोदयति। नन्वत्रेति।
प्रत्यक्षत्वाद्दर्शनादिक्रियायास्तत्कर्तुः स्वरूपमपि तथेत्याशंक्याह नहीति। यदि दर्शना
दिक्रियाकर्तृस्वरूपो क्रियमाणेनापि जिज्ञासास्तनोपशाम्यति तर्हि दृष्ट्यादिसाक्षित्वेनात्मो
त्मानुपपत्तुमवानित्याहैवं तर्हि दृष्टेरिति। सर्वस्यात्मेति वचनादस्मिन्नति वचने इद
विषयो विशेषो नास्तीति शंकते नन्विति। विशेषाभावं विशदयति यदीत्यादिना। घ
टस्य दृष्टा दृष्टेर्दृष्टेति विशेषे प्रतीयमाने तद्रूपावोक्तिर्व्याहतेत्याशंक्याह न दृष्टेरेति। २०५
तथापि दृष्टेरपि विशेषो नाविष्पतीत्याशंक्याह दृष्टाविति। वृत्तिमदंतःकरणावच्छिन्नः सवि

कारोघटद्रष्टा कूटस्थचिन्मात्रस्वभावः सन्निधिसत्तामात्रेण बुद्धितद्वृत्तीनां द्रष्टेति वि
रोधमंगीकृत्य परिहरति। नेत्यादिना। एतदेव स्फुटयति। अस्तीति। सप्तमी द्रष्टारमधि
करोति। दृष्टेर्द्रष्टुस्तावदन्वयव्यतिरेकाभ्यां विशेषं विचारयति यो दृष्टेरिति भवतु दृ
ष्टिस्सरूपा विद्रष्टुः सदा द्रष्टुत्वं तथापि कथं कूटस्थदृष्टित्वमित्याशंक्याह तन्नेति नित्यत्व
मुपपादयन्निविनित्याचेदिति। उक्तपक्षस्य परमसार्थ्यसप्तमी काह चित्तोद्रष्टृदृश्यत्वे दृ
ष्टांतमाह यथेति। घटादिवद्वृत्तिरपि कदाचिदेव द्रष्टुर्दृश्यते न सर्वदेत्यनिष्टापत्य
भावमाशंक्याह न चेति। विकारिणश्चित्तस्य द्रष्टृत्वं क्रमदृष्टत्वमन्यथाऽदृष्टत्वं च दृ
ष्टं तत्साक्षिणोऽभ्यावर्त्तमानं तस्य निर्विकारत्वं गमयतीति भावः। दृष्टिद्वयं प्रमाणाभ्या
वा दाश्लिष्टमिति चांकते किमिति तदुभयमंगीकरोति बाढमिति। तत्रानित्यां दृष्टि
मनुभवेन साधयति प्रसिद्धेति उक्तमर्थं युक्त्या व्यक्तीकरोति नित्यैवेति। संप्रति निसां

207

बृ·आ·३ दृष्टिं श्रुत्या समर्थयते द्रष्टुरिति। तत्रैवोपपत्तिमाह अनुमानाच्चेति। तदेव विवृणोति यस्या
पीति जागरिते चक्षुरादिहीनस्यापि पुंसः स्वप्ने वासनामयघटादिविषया दृष्टिरुप
लब्धा यास्या तस्मिन्काले चक्षुरादिजनितदृष्ट्यभावेपि स्वयमविनष्टरूपं समनुभूयते
सा द्रष्टुः स्वभावभूता दृष्टिर्नित्यैवेत्याद्विमतं नित्यमव्यभिचारितात्सरेणात्मवदिति
प्रयोगयपत्तेरित्यर्थः। नन्वात्मा दृष्टिस्वभावश्चेत्कथं द्रष्टेर्द्रष्टेत्युक्तमत आह तस्येति
नित्यत्वे हेतुरविलुप्तयेति नित्यद्वयं परिहर्तुं स्वरूपभूतयेत्युक्तं। तस्या द्रष्ट्रन्तरापेक्षां
वारयति स्वयमिति उक्तमविपरिलुप्तत्वं व्यनक्तीतरामिति। आत्मा दृष्टेर्द्रष्टेति स्थिते
फलितमाहैवं चेति। अन्यस्त्वेतनो वेति शेषः। नित्यदृष्टिस्वभावमात्मपदार्थं परिशोध्य २·६
श्रुत्यक्षराणि योजयति न त्विति वाक्यशेषविरोधं चोदयति नन्विति। किं कर्मत्वे
नात्मनो ज्ञानं विरुध्यते किं वा साक्षित्वेनेति वाच्यं नाद्योऽनभ्युपगमादित्याह। नेति। न द्विती

यरत्वादेवमिति। तदेवस्पष्टयत्येवं दृष्टेरिति। तर्हि तद्विषयं ज्ञानांतरमपेक्षितव्यमिति कुतो वि
रोधो न प्रसरतीत्याशंक्याहान्यज्ञानेति। न विप्रतिषेध इति सर्वेण संबंधः॥ संगृहीतमर्थं
विवृणोति न चेति। निसैव स्वरूपत्वेति शेषः॥ विज्ञानत्वं चात्र वाक्यीयबुद्धिवृत्तिव्याप्य
त्वं। अन्यां दृष्टिं स्फुरणलक्षणां। आत्मविषयस्फुरणाकांक्षाभावं प्रतिपादयति निवर्त्त
ते हीति। आत्मनि स्फुरणस्यान्यस्यासंभवेपि कुतस्तदाकांक्षोपशांतिरित्याशंक्याह न
हीति। किंच दृष्टेरिति। दृग्रूपाऽदृग्रूपा वा दृष्टिरपेक्ष्यते नाद्य इत्याह नचेति। आदित्यप्रकाश
स्वरूपादेस्तत्प्रकाशान्तराकांक्षाभावादिति भावः॥ न द्वितीय इत्याह नचेति। आत्मनो वृत्तिव्या
प्यत्वेपि स्फुरणव्याप्यत्वानंगीकरणान्न वाक्यशेषविरोधोस्तीत्युपसंहरति। तस्मा
दिति। वाक्यांतरमाकांक्षा सर्वकमादन्येनेतत्किमिति। तद्दृशेरपि व्याचष्टे रीति। इतिपद
मेवेदित्यनेन संबध्यते। ब्रह्मशब्दं व्याचष्टे ब्रह्मेतीति। ब्रह्माहंपदार्थयोर्मिथो विशेषणवि

शेष्यमाणमभिप्रेतं सर्वाकार्यमाहतद्वेवेति। आचार्योपदिष्टेर्थे स्वस्य निश्चयं दर्शयति यथेती
ति। शब्दे वाक्यार्थज्ञानसामर्थ्यर्थः। इदानीं फलवाक्यं व्याचष्टे तस्मादिति। सर्वस्याचमेव
व्याकरोत्यन्ध इति। अन्धे तेवाविद्ययासंसरति विद्ययाच मुच्यतइतिपक्षस्य निर्दोषत्व
मुपसंहरति। तस्माद्युक्तमिति वृत्तं कीर्तयति। यत्त्वदृष्टमिति। यथाग्निहोत्रादि मनुष्यत्वा
दिनाजातिमंतमर्थित्वादिविशेषवंतंचाधिकारिणमपेक्षते न तथात्मज्ञानमिति चनुक्तं
तद्योयो देवानामित्यादिवाक्यं तदक्षराणि व्याचष्टे तत्र येति। यथोक्तेन विधिनान्व
यादिकृतपदार्थपरिशोधनादिनेत्यर्थः। ज्ञानादेव तु मुक्तिर्न साधनांतरादित्येवका
रार्थः।। विवक्षितमधिकार्यनियमं प्रकटयति तथेत्यादिना।। यो यः प्रत्यबुध्यत स ए
व तदभवदिति पूर्वेण संबंधः। अन्धे तेवाविद्ययासंसरति मुच्यते च विद्ययेत्यक्तत्वा ७
देवादीनां विद्याविद्याभ्यां बंधमोक्षौ किंस्त्विरुद्धेत्याह देवादीनामित्यादीति। तत्र दृष्टैसेह

वचने काहानिरित्याशंक्याह पुर इति। आविर्भावे पीदमनूद्यत तदात्मनास्थितं ब्रह्म चेतनस्ये
व विद्याविद्याभ्यां बंधमोक्षौ लोके न तत्त्वापरविशेषोऽस्तीति फलितमाहात इति। अविद्याद
ष्टिमनूद्य तत्त्वदृष्टिमन्वाचष्टे परमार्थतस्त्विति। प्रबोधात्प्रागपि तत्र देवादिनाशेषेषुप
रमार्थतो ब्रह्मैवासीच्चेद्देपदेन्नैकं शानमनर्थकमित्याशंक्याह नान्यथेति। नानाजीव
मादस्य तु न वक्तुनिः प्रक्रमविरोधादित्याशयेनाह तदितीति। तथैवैकस्तन्न ज्ञानानुसा
रित्वपरामर्शः। तद्वैतदित्यादिवाक्यमनूद्य तात्पर्यं व्याकरोत्यस्येति। मंत्रोदाहरणस्तु
तिमेव प्रश्नद्वारा व्याचष्टे कथमित्यादिना। ज्ञानान्मुक्तिरित्यस्यार्थवादोऽयमिति
द्योतयितुं किलेत्युक्तं आदिपदं समस्तवामदेवसूक्तग्रहणार्थं। तत्रावांतरविभाग
माहातद्वैतदिति। शात्रप्रत्ययप्रयोगप्रासमर्थं कथयति पश्यन्निति। लक्षणहेत्वोः
क्रियाया इति हेतौ शात्रप्रत्ययविधानान्मैवं तर्थे च सति हेतुत्वसंभवात्सम्यक्तेन प्रत्यय

211

बृ.आ.२

बलात्फले विद्यामोक्षयोर्नैरंतर्यप्रतीतेस्तस्याः साधनांतरानपेक्षत्वं मोक्षे दर्शयति।
श्रुतिरित्यर्थः। अत्रोदाहरणमाह भुंजान इति। भुजिक्रियामात्रसाध्या हि तृप्तिस्तत्र प्रती
यते तथापि यद्रूपान्नित्यादेवपित्र्यामविद्यामात्रसाध्या मुक्तिर्विभातीत्यर्थः। तद्वैतदित्या
दिव्याख्यामतदिदमित्याद्यवतारयितुं शंकयति। सेयमिति। ऐदंयुगीनानां कलिकाल
वर्तिनामिति यावत्। उत्तरंग्रन्थमुत्तरत्वेनावतार्य व्याकरोति तदुत्थापनायेति। तस्य ता
टस्थ्यं वारयति। यत्स्वर्नेक्षतेति। प्रविष्टे प्रमाणमुक्तं स्मारयति दृष्टेति। व्यावृत्तं बालेषु
विषयेभ्यस्तु कं सालाषं मनो यस्य स तथोक्तः। एवंशब्दार्थमेवाहाहमिति। तदेवज्ञा
नं वितृणोत्यपोह्येति। मनुष्योऽहमित्यादिज्ञानेपरिपंथिनि कथं ब्रह्माहमितिज्ञानमि
त्याशंक्याहोपाधीति। अहमित्यात्मज्ञानं सदास्त्विति तत्तदर्थं प्रत्ययति तत्रापि
त्याशंक्याह संसारेति। केवलमिति सद्वितीयत्वमुच्यते। ज्ञानमुक्त्वा तत्फलमाह सोऽविद्येति। १०८

यत्तु देवादीनां महावीर्यत्वाद्ब्रह्मविद्यया मुक्तिः सिध्यति नास्मदादीनामल्पवीर्यत्वादिति तत्रा
ह न हीति। श्रेयांसि बहुविघ्नानीति प्रसिद्धिमाश्रित्य शंकते वार्तमानिकेष्विति। शंकोत्तरत्वे
नोत्तरं वाक्यमादाय व्याकरोति तत्राहेत्यादिना। यथोक्तेनान्वयादीनां प्रकारेणाब्रह्मविद्वा
तुरिति संबंधः। अपिशब्दार्थं कथयति किमुतेति। अल्पवीर्यास्तु तत्र विघ्नकरणे प्रयासा
नेति किमुत वक्तव्यमिति योजना। अप्राप्तप्रतिषेधायोगमभिप्रेत्य चोदयति ब्रह्मविघ्नेति।
शंकानिमित्तं दर्शयन्नुत्तरमाहोऽन्यत इति। अधमर्णानिवोत्तमर्णा देवादयो मनुष्यान्प्रति वि
घ्नं कुर्वन्तीति शेषः। कथं देवादीन्प्रति मर्त्यानामृणित्वं तत्राह ब्रह्मचर्येणेति। यथा पशु
रेवं स देवानामिति मनुष्याणां पशुसादृश्यश्रवणात्तेषां पारतंत्र्याद्देवादयस्तान्प्रति
विघ्नं कुर्वन्तीत्याह। पश्विति। अथो अयं वा आत्मा सर्वेषां भूतानां लोक इति च तेषां स
र्वप्राणिभोग्यत्वश्रुतेश्च सर्वेऽपि विघ्नकराः सन्तीत्याह ताद्यो इति। लोकस्तु लाभमभिप्रेत्यमर्थं

213

प्रकरयसात्मनरति।यथा अथमर्णान्मनुष्यान्स्वस्कृतमर्णाविघ्नमाचरंति तथा देवादयः स्व
स्थितिपरिरक्षणार्थं परतंत्रान्कर्मिणः प्रसन्नतत्वप्राप्तिमुद्दिश्य वीघ्नं कुर्वंतीति तेषां ता
न्प्रति विघ्नकर्तृत्वशंकास्पावकाशैवेत्यर्थः। पशुनिदर्शनेन विवक्षितमर्थं विवृणोति स्वा
स्मिन्निति। पशुस्थानीयानां मनुष्याणां देवादिभिरक्ष्यत्वे हेतुमाह महत्तरामिति।२ तस्य
देवादीनां मनुष्यान्प्रति विघ्नकर्तृत्वममृतत्वप्राप्तौ संभावितमित्याह तस्मादिति। इ
तस्य तेषां तान्प्रति तत्कर्तृत्वं प्रमाणीत्याह यथेति। स्वोत्लोके देहः। एवंवित्त्वं सर्वपत्तत्वो
ऽस्योत्तमितिकल्पनावत्त्वं क्रियापदानुषंगार्थश्च कारः। ब्रह्मवित्त्वेपि मनुष्याणां देवा
दिपारतंत्र्याविघातात्किमिति ते विघ्नमाचरंतीत्याशंक्याह ब्रह्मविद इति देवादी
नां मनुष्यान्प्रति विघ्नकर्तृत्वे शंकामुपपादितामुपसंहरति। तस्मादिति। न केवल
मुक्तहेतु बलादेव किंतु सामर्थ्याच्चेत्याह प्रभाववंतश्चेति सामर्थ्याद्विद्याफलप्राप्तौ तेषां

विघ्नकरत्वं तर्हि कर्मफलप्राप्त्यभावः स्यादिति अतिप्रसंगं शंकते नन्विति। भवतु तेषां स-
र्वत्र विघ्नाचरणं ततः किमित्यत आह हंतेति। अविश्रमो विघ्नसाधकः सामर्थ्याद् विघ्नकर्तृ-
त्वेति प्रसक्तं तस्मात् तथेति। अपि प्रसंगात् तस्मात् तथा कलेति। विघ्नकरणेऽप्रयुक्तमिति
पूर्वेण संबंधः। ईश्वरादीनां यथोक्तकार्यकरत्वे प्रमाणमाह येषां हीति। एषस्यैव साधकर्म
कारयति कर्म हि वत्स तुरित्यादि वाक्यं शास्त्रशब्दार्थः। इंद्रादीनां विघ्नकर्तृत्ववदी-
श्वरादीनामपि तत्संपत्त्वादेर्दार्थ्यानुष्ठाने विश्वासाभावात् अप्रामाण्यं प्राप्तमिति फ-
लितमाह तोपीति। किमिदं सर्ववैदिकस्य चोद्यं किं वा वैदिकस्येति विकल्प्याद्यं दूषयति ने-
त्यादिना दृष्टाद्युपपत्तिविषया दुग्धाद्यादान दर्शनात् प्राणिनां सुखदुःखादितारतम्यदृ-
ष्टेः स्वभाववादे चानियतनिमित्तादानवैचित्र्यदर्शनयोरनुपपत्तेस्तादृग्योगात् कर्मफलं
जगदेव द्रव्यमित्यर्थः। द्वितीयं प्रत्याह सुखेति। कर्म हि वेदाद्यास्मृतिः। कर्मणा बध्यते जंतुरित्या-

215

धास्यतिर्जगद्वैचित्र्यानुपपत्तिश्चन्यायः। कथमेतावतादेवादीनां कर्मफले विघ्नकर्तृत्वाभावस्त
त्राह कर्मणेति। कथं हेतुसिद्धिरित्याशंक्य कर्मणः स्वोत्पत्तौ देवाद्यपेक्षां व्यतिरेकमुखेन विवृ
णोति कर्मणेति। स्वफलेपि तस्य तत्सापेक्षत्वमस्तीत्याह फलमतेति। निष्पन्नमपि कर्म सर्वो
क्तं कारकमनपेक्ष्य फलदाने नैराकांक्ष्येनैवेत्यर्थः। कर्मणः स्वोत्पत्तौ फले च कारक
सापेक्षत्वे हेतुमाह क्रियायारिति। कारकादीनामनेकेषां निमित्तानामुपादानेन स्वभा
वो निष्पद्यते यस्याः सा तथोक्ता तस्या भावः कारकाद्यनेकनिमित्तोपादानस्वाभाव्यं त
स्मादुक्तं यत्परतन्त्रं कर्मेत्यर्थः। देवादीनां कर्मापेक्षितकारकत्वे फलितमाह तस्मादि
ति॥ इतोपि कर्मफलेनाविनाभावोस्तीत्याह कर्मणामिति। एवं देवादीनां क्वचिद्विघ्नल
क्षणे कार्ये कर्मणां वशवर्तित्वे हेत्वन्तरमाह स्वसामर्थ्यस्येति। विघ्नलक्षणं हि कार्यं दुः ११८
खमुत्पादयति न च दुःखमृते पापादुत्पद्यते दुःखविषये पापसामर्थ्यस्य शास्त्राधिगत

स्याप्रत्याख्येयत्वात्तस्मात्प्राणिनामदृष्टवशादेव देवादयो विघ्नकारणमित्यर्थः। देनादीनां क
र्मपारतंत्र्ये कर्मतत्परंतंत्रं न स्यात्प्रधानगुणभाववैपरीत्यायोगादित्याशंक्याह कर्मेति। इ
तश्च नामीषां नियतो गुणप्रधानभावोस्तीत्याह दुर्विज्ञेयश्चेति। इति शब्दो हेत्वर्थः। यतो गु
णप्रधानकृतो मतिविभ्रमो लोकस्योपलभ्यते तस्मादसौ दुर्विज्ञेयो न नियतोस्तीति
योजना। मतिविभ्रमे वादिदिप्रतिपत्तिहेतुमाह कर्मैवेत्यादिना। कथं तर्हि निश्चयस्ता
त्राह। तत्रेति। वेदवादानुदाहरति पुण्यो वा इति। आदिपदेन धर्मरज्वा व्रजेदूर्ध्वमित्या
दयः स्मृतिवादा गृह्यन्ते। सूर्योदयदाहसेचनादौ कालज्वलनसलिलादेः प्रधानभासि
द्धेर्न कर्मैव प्रधानमित्याशंक्याह यद्यपीति। अनैकान्तिकत्वमप्रधानत्वं तत्र हेतुमाह न्या
य्येति। श्रुतिस्मृतिलक्षणं चाशास्त्रमुररीकृत्य जगद्वैचित्र्यानुपपत्तिन्यायः कर्मफले दे
वादीनां विघ्नकर्तृत्वं प्रसंगागतं निराकृत्य विद्याफले तेषां तद्दात्रां कितौ निराकरोति नावि

घेति। तत्र नत्वर्यमुक्तार्थमनुवादस्सर्वज्ञं विशदयति। यदुक्तमिति तत्र प्रश्नसर्वज्ञं सर्वोक्तं हे
तुं स्फुटयति कस्मादिति। आत्मनो ब्रह्मत्वप्राप्तिरूपाया मुक्तेरज्ञानध्वस्तिमात्रत्वात्तस्या
श्च ज्ञानेन तुल्यत्वात्तस्मिन्सति तत्फलस्यावरूपकत्वाद्देवादीनां विघ्नाचरणेनावकाशो
स्तीत्यर्थः। उक्तमेवार्थं कामाख्यासर्वज्ञं दृष्टान्तेन समर्थयते कथमित्यादिना। ब्रह्मवि
द्यातत्फलयोः समानकालत्वे फलितमाहात इति। देवादीनां ब्रह्मविद्याफले विघ्नकर्तृ
त्वाभावे हेतुं तरमाह यत्रेति। यस्यां विद्यायां सत्यां ब्रह्मविदो देवादीनामात्मत्वमेव
तस्यां सत्यां कथं ते तस्य विघ्नमाचरेयुः स्वविषये तेषां प्रातिकूल्याचरणानुपपत्ते
रित्यर्थः। उक्तेऽर्थे समनन्तरवाक्यमुत्थाप्य व्याचष्टे तदेतद्दाहेति। कथं ब्रह्मविद्यास ११२
मकालमेव ब्रह्मविद्देवादीनामात्मा भवतीति तत्राह विद्यामात्रेति। यथेदं रजतं शुक्तिर
जताकारायाः शुक्तिकायाः शुक्तिकात्वमविद्यामात्रव्यवहितं तथा ब्रह्मविदोऽपि सर्वात्मत्वे

तस्मान्न व्यवधानात्तस्याश्च विद्योदयानंतरीयकत्वेन निवृत्तेर्युक्तं विद्यातत्फलयोः समान
कालत्वमुक्तं नैतत्प्रतिवचनदशायामित्यर्थः। उक्तस्य हेतोरपेक्षितं वदद्धं ब्रलहो देवा
यात्मत्वे फलितमाह तरालिकैन ल्पे तेषां विघ्नाकर्तृत्वे कुत्र तत्कर्तृत्वे साह्नं क्वाह यस्माहि
ति। तेषां निरंकुशं प्रसरत्तं वारयति। नान्विति। स फलः प्रपन्न इति सर्वैष्या संबंधः। तस्य
निरवकाशादिति हेतुमाह। वसरेति। ज्ञानस्यानंतरफलत्वात्तत्फले देवादीनां न वि
घ्नकर्तृत्वे तत्फलमुपेलस्वयत्यः शंकते। लवंतहेति। ज्ञानस्यानंतरफलत्वेन तदज्ञा
नं निवर्त्तयितृत्वानामिव तत्व ज्ञानामपि वलास्मीति ज्ञानसंतत्यभावान्नचाद्यमेव ज्ञा
नमज्ञानध्वंसि प्राग्वीर्ध्वमपि रागादेस्तत्कार्यस्य च दृष्टत्वात्ततो देहपातकालानं
ज्ञानमज्ञानं निवर्तयतीति कुलो जीवन्मुक्तिरित्यर्थः। अंत्यज्ञानस्याज्ञाननिवर्तकत्वं तत्सं
त्ततेर्वा प्रथमेतस्यां त्पत्त्यादाद्यमविषयत्वाज्ञानध्वंसितेति विकल्प्यो नयत्र दृष्टांताभावं

बृ॰आ॰२

मत्वा द्वितीयेदेशांतरमारुह्न प्रथमेनेति। तदेवानुमानेन स्फुटयति यदिहीति। कल्प्यांतरं शं
कयत्येवं तर्हीति। अविच्छिन्ना ज्ञानसंततिरज्ञानं निवर्तयतीत्येतद्दूषयति। नेत्यादिना।
ज्ञी च। नादिहेतुकः प्रत्ययो बुभुत्सितोऽर्थः सोऽस्येदमित्यादिलक्षणः तस्य बुभुत्सा सुप
प्तुस्तस्य प्रत्यस्मात्त्वनव्युच्छिन्नप्रत्ययसंततेश्च विरूढत्वाद्योगपद्याहेतुमाह विशेषादि या॰८
ति। प्रत्ययसंततिमुपेत्य दूषयति नेत्यादिना। तमेव दोषं विशदयति रज्यतामिति। स्वा
स्वार्थो ज्ञानसंततिरज्ञानं निवर्तयतीत्येवमात्मकः॥ आत्मेत्येवोपासीतेति श्रुतेरात्मता
न संततिमात्रसद्भावे ततो विद्याद्वाराऽविद्याध्वस्तिरिति शास्त्रार्थे निष्प्रयासिद्धिरि
त्याह संततीति। आत्मधीसंततेः सत्त्वेऽपि न सात्मविषयत्वात् विद्याद्वाराऽविद्यानिव २२२
र्तकस्याद्यद्वित्रिक्षणपास्वात्मधीसंततौ व्यभिचारादिति परिहरति नाद्यं तयोरिति॥
सर्वस्मिन्प्रत्ययेनाविद्यानिवर्तकत्वमैस्त्वेतुलथेत्युक्तेतस्यां तत्त्वात्तथात्वं चेद्दृष्टांताभावः।

आत्मविषयत्वात्तत्काले प्रथमप्रत्यये व्यभिचारः स्यादित्यक्तो दोषो। आद्यासंततिर्नाविद्याध्वंसिनी
अंत्यात्तु तथेत्यंगीकारेपि विशेषाभावादंत्यत्वात्तस्या निवर्तकत्वे दृष्टांताभावः। आत्मविष
यत्वात्तत्रोत्ते वेनैकांतिकमिसेतावेव दोषौ स्यातामित्यक्तं विवृणोति प्रथमेति। अंत्यप्रत्यय
स्यतत्संततेश्चाविद्यानिवर्तकत्वासंभवे प्रथमस्यापि रागाद्यनुवृत्त्या तदयोगात् ज्ञान
मस्तानामपि निवर्तकमेवेति चोदयत्येवं तदूरति। श्रुतिविशेषेण परिहरति न तस्मादिति। ता
सामर्थ्यवादत्वेनाविवक्षितत्वं शंकते अर्थवाद इति चेदिति अतिप्रसंगेन दूषयति नस
र्वेति। यथोक्तश्रुतीनामर्थवादत्वेपि कथं शास्त्रोपनिषदां तत्त्वप्रसक्तिरित्याशंक्याहै
तावदिति। एतावन्मात्रार्थत्वमात्मज्ञानात्तदज्ञाननिवृत्तिरित्येतावन्मात्रस्यार्थस्य स
ज्ञावः। अहंधीगम्येपती। चितासांप्रतेः संवादविसंवादाभ्यां मानत्वायोगादस्त्वेकार्थवा
दत्वेतिप्रसंगस्येष्टत्वं शंकते प्रत्यक्षेति। प्रमातुरहंधीगम्यतावात्मनस्तत्सा। क्षिणस्तस्य

221

वेदांतानामतत्त्वं बोधयंतीति न संवादादित्यं केत्याह नेत्येति। विद्वदनुभवमाश्रित्यापि फलश्रुते
रर्थवादत्वसमाहितेमित्याह। विद्येति। आत्मज्ञानस्य तदज्ञाननिवर्तकत्वे स्थिते परमतस्य नि
रवकाशत्वं फलतीत्याह तस्मादिति। चोद्यस्यानवकाशत्वमेव विशदयति विद्यादीति। ज्ञा
नसंततेरंत्यज्ञानस्य चाज्ञानध्वंसित्वासिद्धेराद्यमेव ज्ञानं तथैव स्फुरत्संप्रतिपरोक्षमनुवद
तियत्तत्क्रममिति। दर्शनानन्त्याद्यंतानमज्ञानध्वंसीति चेन्न। प्रारब्धकर्मशेषस्य विद्वद्देह
स्थितिहेतुत्वाद्विदुषोपि यावदारब्धक्षयं रागाद्याभासाविरोधात्तस्य येन च देहाभा
सजगदाभासयोरभावान्नाद्यज्ञानस्याज्ञाननिवर्तकत्वानुपपत्तिरित्यतरमाह
न तच्छेषेति। तदेव प्रपंचयति येनेत्यादिना। तच्छब्दस्याक्षिप्तत्वेन न संबंधः। आक्षे
पकत्वनियमं साधयति विपरीतेति। मिथ्याज्ञानेन रागादिदोषेण चानिमित्तेन चै
प्रवृत्तत्वादितियावत्। तथात्वं तस्येत्यस्य विवरणं विपरीतप्रसमेत्यादि। कर्मैवपक्षा

विनंक्ष्यति। तावन्मात्रं प्रतिभासमात्रशरीरं॥ प्रारब्धकर्मणोऽप्यज्ञानजन्यत्वेन ज्ञानति-
वर्त्यत्वान्न ज्ञानिनस्ततो देहाभासादिसंभवतीत्याशंक्याह मुक्तेषुवदिति। यथा प्रवृत्तवे-
गस्येष्वादेर्वेगक्षयादेवाप्रतिबद्धस्य क्षयस्तथा भोगादेवारब्धक्षयो भोगेन त्वितरे क्षप-
यित्वा संपद्यत इति न्यायान्न ज्ञानादित्यर्थः। तद्धेतुकस्य विपरीतप्रत्ययादिप्रतिभासका-
र्यजनकत्वं तस्येति यावत्। ननु ज्ञानमनारब्धकर्मवदारब्धमपि कर्म कर्मत्वाविशेषान्नि-
वर्त्तयिष्यतीति नेत्याह तेनेति। अविद्यालेशेन सहारब्धस्य कर्मणो विद्या निवर्त्तिका न स-
वतीत्यत्र हेतुमाह विरोदिति। न हि ज्ञानादारब्धं कर्म क्षीयते तद्विरोधित्वादविद्याले-
शस्य तदवस्थितेरन्यथा जीवन्मुक्तिशास्त्रविरोधादिति भावः। आरब्धस्य कर्मणो ज्ञाना-
न्निवर्त्यत्वे ज्ञानं कर्मनिवर्त्तकमिति कथं प्रसिद्धिरित्याह किंत्विति। प्रसिद्धिविषयमा-
ह स्वाश्रयादिति। ज्ञानविरोधि यदज्ञानं कार्यमनारब्धं कर्म ज्ञानाश्रयप्रमात्राद्याश्रया

ब्र·अ-४ दतानाहूफलानामनाजन्माणि मुखं तन्निवर्तकं ज्ञानमिति प्रसिद्धिरानिरूढेत्यर्थः। विमतं ज्ञा
न निवर्त्यं कर्मत्वादारब्धकर्मवदित्यनुमानादनारब्धमपि कर्म न ज्ञाननिरस्यमित्याशं
क्याहानिरस्य नागतत्वादिति। अनारब्धं कर्मफलरूपेणाप्रवृत्तत्वात् प्रवृत्तेन ज्ञानेन नि
वर्त्यम् आरब्धं तु कर्मफलरूपेण जातत्वात्तद्भोगादृते न निवृत्तिमर्हति। अनुमानं त्वागमा
पबाधितमप्रमाणमित्यर्थः। न च नारब्धकर्मनिवृत्तावपि विदुषश्चेदारब्धकर्म न निव
र्तेत तथा च यथापूर्वं विपरीतप्रत्ययादिप्रवृत्तेर्विद्वदविद्वद्विशेषो न स्यादत आह
किं चेति। हेतुसिद्ध्यर्थं विपरीतप्रत्ययविषयं विषये देलनवध्यतेति। संप्रति विद्वद्वि
षये विषयाभावाद्विपरीतप्रत्ययस्यानुत्पत्तिमुपन्यस्यति सचेति। आद्वात्रायस्यागृ
हीतविशेषस्य सामान्यमात्रस्यालंबनस्येति यावत्। आश्रयस्येति पाठेप्ययमेवार्थः २१४
विदुषो विपरीतप्रत्ययादिप्रतिभासेपि न यथापूर्वं तत्त्वं यस्य तु यथापूर्वं संसारित्वमिसा

दिन्यायविरोधादिति मत्वोक्तं न सर्ववृद्धिति तत्रानुपपत्तिं प्रमाणयति शुक्तिकादाविति । यथा
ज्ञानवतो विपरीतप्रत्ययप्रभावोनुपपद्यते तथा तद्वतोपि कश्चिद्विपरीतप्रत्ययो दृश्यते त
थाच कथं तत्त्वानुपपत्तिविरोधो न प्रसरेदित्याशंक्य परोक्षज्ञानवति विपरीतप्रत्ययसत्त्वेपि
नापरोक्षज्ञानवति तद्दार्ढ्यमित्यभिप्रेत्याह कृत्विति । परोक्षज्ञानाधारः सलम्पर्थः । पंच
मीत्व परोक्षज्ञानार्थमभिरुकस्मादि सत्तानातिरिक्तं कृत्स्नसामग्र्यभावोक्तिः । विदुषो मिथ्या
ज्ञानाभावमुक्त्वा विपक्षे दोषमाह सम्यगिति । तत्सर्वकर्मानुष्ठानमादिशब्दार्थः । सम्य
ग्ज्ञानाविश्वासे दोषांतरमाह सर्वं चेति । ज्ञानादज्ञानध्वंसे तदुत्थमिथ्याज्ञानस्य स
विषयस्य बाधितत्वान्न विदुषो रागादिरित्युपपाद्य ज्ञानान्मोक्षे तज्जन्ममात्रेणपारा
रःस्तिति हेतुत्वाभावापत्तेरिति सद्योमुक्तिपक्षं प्रत्याह तेनेति । प्रवृत्तफलस्य कर्मणो भोगाद
ते क्षयो नास्तीत्युक्तेन न्यायेनेति यावत् ॥ आरब्धकर्मणा देहस्थितिमुक्तेतरेषां ज्ञाननिवर्त्य

225

समुपसंहरति ज्ञानोत्पत्तेरिति। तस्य ह न देवाश्चनेति विदुषो विद्याफलप्राप्तौ विघ्ननिषेधक-
श्रुत्यनुपपत्त्या यथोक्तोर्थो भातीत्यर्थः। न केवलं श्रुतार्थापत्त्या यथोक्तार्थसिद्धिः। किं तु श्रु-
तिस्मृतिभ्यामपीत्याह क्षीयन्ते चेत्यादिना। जीवन्मुक्तिं साधयता ज्ञानफले प्रतिबंधाभाव
उक्तः। इदानीं पूर्वोक्तं शंकाबीजमनुवदति यत्त्विति। ऋणित्वं हि विदुषोऽविदुषो वेति विक-
ल्प्याद्यं दूषयति। द्वितीयमंगीकरोति तत्रेत्यादिना। ऋणित्वस्येति दोषः। तदेव स्फुटयति अविद्या-
वानिति। अविदुषोऽस्ति कर्तृत्वादीत्यत्र मानमाह यत्रेति। वक्ष्यमाणवाक्यार्थप्रकृतोपयोगि-
त्वेन कथयन्नन्यदिति। ऋणित्वं विदुषो नेत्युक्तं व्यनक्ति कर्तृत्वं तस्य नास्ति कर्तृत्वादीत्यत्रा-
पि प्रमाणमाह यत्र त्वस्य पुनरिति विद्यायास्तामविद्यायास्तत्कृतानेकत्वभ्रमस्य प्रहाणं।
यत्र संपद्यते तत्र तस्मादेव कारणात्तत्केनेत्यादिना कर्मादेरसंभवं दर्शयतीति योज- ११५
ना। प्रमाणसिद्धमर्थं निगमयति तस्मादिति। अविद्याविषयमृणित्वमित्येतत्प्रपंचयन्न

विद्यास्त्रमवतारयत्येवेति। तद्गुणित्वमविद्याविपर्ययं यथास्फुटं भवति तथाप्ययोन्याभि
सादावनंतरग्रंथ एव कथ्यते प्रथममित्यर्थः। तदस्त्राणि व्याकरोत्सयेत्यादिना विद्या
स्त्रज्ञानंतर्यमविद्यास्त्रस्याथत्राद्यर्थः। यागो गंधपुष्पादिना पूजाबल्युपहारो नैवेद्य
समर्पणं प्रणिधानमेकाग्र्यं ध्यानं तस्यैवानंतरितप्रत्ययप्रवाहकरणं। आदिपदं प्रद
दिग्ग्रहा५ क्षिणार्थमितेर्दर्शनमंत्रोपास्तनंनज्ञास्त्रीयमिलक्षिप्रेत्येतदेव विवृणोत्यन्योसावि
ति। तस्य फलमाह न स्मरति। वाक्यांतरमवतारयत्याचष्टे स्म न केवलमिति। सोविद्यान्ते
वमुक्तदृष्टांतवशात्सप्रभुरिव देवानां भवति तेषां मध्ये तस्यैवैकेन वकुम्भिरूपका
रैर्भोग्यत्वादितियोजना प्रभुसाम्ये सिद्धमर्थं रूपयत्यतरति। अथानेनाविद्यास्त्रे
णाकिं कृतं भवतीत्यपेक्षायामविद्यायाः संसारहेतुत्वं सूचितमिति वक्तुमविद्याकार्यं
कर्मफलं संक्षिप्याहे तस्येत्यादिना। कर्मस्वरूपमत्ता विद्यादेवताध्यानोत्थितकाग्रास्त्री

227

बृ॰ आ॰ २

पवत्स्वाभाविककर्मणो विदुर्विध्वंसस्य चयितुं च शब्दः। तत्र तु सहकारिणी विद्यानगस्त्री
हर्शनादिरूपेति शेषः। कथं यथोक्तं कर्मफलमविद्यावतां स्यादित्याशंक्याह यथा चेति।
स्तत्र दैविध्यसिद्ध्यर्थं विद्यासूत्रार्थमनुक्रामति विद्यायाश्चेति। सूत्रांतराशंकां वारयति
सर्वाहीति। कथमेतदवगम्यते तत्राह यथेति मनुष्याणामविद्यावतां देवपशुत्वे स्थिते
फलितमाह यस्मादिति। तत्र प्रमाणत्वेनोत्तरं वाक्यमुत्थापयतीत्येतदिति। किमिदमवि
द्यावतो देवादिपालनमित्याशंक्य वाक्यतात्पर्यमाह मइंद्रादय इति। अतिसंधिरविद्यावतः
पुरुषस्येति शेषः। एकस्मिन्नेवेत्यादिवाक्यमादाय व्याचष्टे तन्नेति। मनुष्याणां पशुत्वा वा
पुत्यानमप्रियं देवानामिति स्थिते तदुपायमपि तत्त्वज्ञानं तेषां देवा विद्विषंतीत्याह तस्मा ११६
दिति। तत्त्वविद्याया दौर्बल्यत्वं कथं चनेत्युक्तं। मनुष्याणामुत्कर्षं देवानसूयंतीत्यत्र प्रमा
णमाह तथा चेति तेषां ब्रह्मविद्यायाः कैवल्यात्किं सुतरामविद्येति भावः। देवादीनां मनुष्येषु

कुत्सनाम स्यात्प्रियत्वेऽपि किं स्यादित्याशंक्याहोत्तर इति। तेषां विघ्नमाचरतामभिप्रायमाहास्मदि
ति। हि देवादिभिरुपहतानां मनुष्याणां मुमुक्षैव न संपद्यते त्याशंक्याह। यं लिति उक्तं हि। न देवा
देउमादाय रक्षंति पशुपालवत्। अयं हि रक्षितुमिच्छंति बुध्या संयोजयंति तमिति तर्हि किमिति।
सर्वा देवैनैव देवानामनुग्रहं णंहतीत्याशंक्याह विपरीतमिति। देवतापरांमुखं न मुमोचयि
षंतीति यावत्। संप्रति देवाप्रियत्वे केन ध्वनितमर्थमाह तस्मादिति। अविदत्सु मनुष्येषु देवा
देवादीनां स्वातंत्र्यं तच्छब्दार्थः। स्रगादिप्रधानस्तदाराधनपरः सन् देवादीनां प्रियः स्यात्तद्वि
पक्षस्य मुमुक्षावैफल्यादिस्पर्धः। तत्प्रीतिविषयश्च तस्मात्सादासाद्देल वैराग्यः सर्वाणि क
र्माणि संत्यस्य विद्याप्रापकश्रवणादिकं प्रत्येकाग्रमनाः स्यादित्याह। प्रमादीति। श्रवणादि
कर्मनुतिष्ठन्नपि वर्णाश्रमाचारपरोऽपि वेदन्यथा विद्यालक्षणे फले प्रतिबंधसंभवादि
त्याशयेनाह विद्योप्रतीति। तस्यादिनिमित्ता ध्वनेर्विहतिः काकुरुच्यते यथाह काकुस्ति

229

यां विकारोयः श्लोकभीत्यादिष्वपि ध्वनेरिति तया काठककाण्वश्रुतेः स्वरदूपेन भयमुपलक्ष्य दे
वादिभजने कल्प्यते तात्पर्यमित्याह काठकेति। ब्रह्मकंडिकामित्यमारभ्याय ब्रह्मनामि
त्यादिवाक्यस्यातीतेन संबंधं वक्तुं वृत्तं कीर्त्तयति स्त्रात्रितइति आत्मस्यार्थत्वादौ ब्रह्मवि
षयस्तावदुरित्यादिनोक्तमनुवदति। तस्य चेति। अर्थवादस्तु योयो देवानामित्यादिः।
संबंधोस्तानस्यस्य वापित्तिफलेन साध्यसाधनत्वमधिकारिणाश्रयाश्रयित्वमैक्येन वि
षयविषयित्वमिति विभागः। अविद्यासूत्रेवृत्तं कथयत्यविद्यायाश्चेति। संसारस्याधि
कारः प्रवृत्तिरुत्पत्तिरिति यावत्। यथाप्रभुरित्यादिनोक्तमनुभाषते तत्रेति। अविद्या
धिकारः सम्मप्यर्थः। तत्राविद्याकार्यं प्रपंचयितुमध्यायशेषप्रवृत्तिरिति मत्वानो विद्या
विवर्त्तचातुर्वर्ण्यसृष्टिप्रकटयैनाथ तदेतद्ब्रह्मेत्यस्मात्प्राक्तनवाक्यमित्याशंक्याकांक्षापू
र्वकमाह किंपुनरिति। ब्रह्म वा इदमित्यादिवाक्यमिदमापरामृश्यते। वर्णानेव विशिनष्टि

यन्निमित्तेति। यैर्निमित्तैर्जलप्लावादिभिः संबंधेषु कर्मसु अयमविद्वानधिकृतः पशुरिव सं-
सरतीति पशूनि दर्शनस्मृतेः प्रसिद्धतानि निमित्तानि दर्शयितुमुत्तरं वाक्यं प्रवृत्तमित्य-
र्थः॥ अथेत्यस्य मंत्रादिसत्रानुग्रहरूढदेवतासर्गं प्रक्रम्याग्नेर्दिवसृष्टिरुक्ता नेंद्रादीनाम-
त्र तु अविद्यां प्रस्तुत्य तेषां सोच्यते तत्रादः श्रुतेरपि प्रायस्त्वनागतस्येति। सर्वमग्निसर्गानं-
तरमिंद्रादिसर्गो वाच्योपि नोक्तः फलाभावादिहत्वविदुषस्तत्कार्यविवर्णद्युभिमानिनः
कर्माधिकृतिरित्येतस्यार्थस्य प्रदर्शनार्थं तदाविद्यत्वविवक्षया सव्युत्पाद्यतरत्वर्थः। अ-
ग्निसर्गोपि तर्हि तद्वदत्रैव वाच्यो विशेषाभावादित्याशंक्याग्नेस्त्विति। प्रजापतेः सृष्टि-
हर्तये चेदग्निसृष्टिस्तत्रोक्ता हंतेंद्रादिसर्गोपि तत्रैव वाच्योन्यथा तदहर्तेरित्याशंक्या-
हायं चेति। तर्हि तत्रोक्तस्य कस्मादत्रोक्तिः पुनरुक्तेरित्याशंक्येतस्यैवार्थस्येसत्रोक्तं स्मा-
रयतीह त्विति। संगतिमुक्त्वा वाक्यमादाय व्याचष्टे ब्रह्मेति। अग्नेः सर्गादिसत्रोक्तत्वमिति
सत्रादिसर्गा

231

यावत्। वैश्यस्यावधारणार्थत्वं वदन्वाक्यार्थे निकृष्टविकल्पमेकमित्यस्यार्थमाहैकमिति।
द्वितीयमेवकारं व्याचष्टे नासीदिति। कथं तर्हि तस्य कर्मानुष्ठानसामर्थ्यसिद्धिरित्याशंक्या-
ऽमनंतरवाक्यं व्याचष्टे ततरति। तदेव स्पष्टमाकांक्षाद्वारा स्पष्टयति। किं पुनरिति। एकाचे-
त्क्षत्रजातिः स्यात्कथं तर्हि यान्येतानीति बहूक्तिरित्याशंक्याह तद्व्यक्तिभेदेनेति। क्षत्र-
जातेरेकत्वे कथं क्षत्राणीति बहुवचनमित्याशंक्य जगत्या व्याख्यायामेकस्मिन्बहुवचनमन्यत-
रस्यामिति स्मृतिमाश्रित्याह जातीति। बहूक्तेर्गत्यंतरमाह व्यक्तीति तासां बहुत्वाज्जातेश्च
तदभेदान्नापि चेदमुपचर्यं बहूक्तिरित्यपेक्ष्य क्षत्राणीति बहुवचनमिति संबंधः।
तेषां विशेषतो ग्रहणं क्षत्रस्योत्तमत्वं ख्यापयितुमिति मन्वानः सन्नाह कानि पुनरित्यादि
नानतु किमिति देवेषु क्षत्रसृष्टिरुच्यते ब्राह्मणस्य कर्मानुष्ठानसामर्थ्यसिद्ध्यर्थमनु-
ध्येयैव तत्सृष्टिरुपदेश्येत्याशंक्याह तदन्विति। तथापि विवक्षिता सृष्टिर्मुखतो वक्ष्यमेसा

त्रं कलो वो द्धातो यमित्याह तदर्थ इति। तस्मादिति व्याचष्टे। यस्मादिति। क्षत्रस्य नियंतृत्वतदुत्कर्षे हे
त्वंतरमाह तस्मादिति। ब्रह्मेति प्रसिद्धं। ब्राह्मण्यमस्त्वमिति यावत्। उक्तमेव प्रपंचयति राज
स्त्ययेति। आसद्यघ्रांमं विक्रम्यां क्षत्रे स्वाकीयं यन्नः समर्थयतो ब्राह्मणस्य निकर्षमाशंक्याह
सैवेति। तयोर्ब्राह्मणत्वस्य तुल्यत्वात्कुतोऽवांतरभेदः क्षत्रमपि क्रतुकाले ब्राह्मण्यं प्राप्नो
तीत्याशंक्याह तस्मादिति। क्षत्रस्य ब्रह्माभिषवे होमश्रवणाच्चैतस्य तदपेक्षया तद्रूपत्व
मित्याह यस्त्विति। प्रप्रमादादपीति वक्तुमुत्तावः। यदुक्तं हिनस्तीति प्रतीकग्रहणं यस्तु पु
नरित्यादिव्याख्यानमिति स्तेदः। ईयसुनस्तरवर्थस्य प्रयोगे हेतुमाह सर्वमपीति। ब्रा
ह्मणाभिपतने पापीयस्त्वमित्येतदुदाहरणेन बुद्धावारोपयति। यथेति। कर्तुर्ब्राह्मणस्य
नियंतृत्वक्षत्रियस्य स्पष्टत्वात्किमुदाहरणेनेत्याशंक्याह क्षत्र इति। तद्व्याचष्टे कर्मण इति।
क्रमब्राह्मणोऽस्मीत्यभिमानी पुरुषस्तथाप्यत्र संगीतत्वमिवेति यावत्। कथं तर्हि लोके

कसामर्थ्यसंपादनद्वाराद्धर्मानुष्ठानमलमाहसवित्रामिति। देवजातानीत्यत्र तकारे निष्ठा। गणं
गणांकृत्वाकिमित्यारभ्यानंविन्नामित्याशंक्याहगणेति। वित्तांसमुदायप्रधानत्वमप्यपिप्रलस्य समि
त्याहप्रायेणेति। कर्तृपालयितृधनार्जयितृणांसृष्टत्वात्सृष्टंवर्णांतरस्येत्याशंक्याहस्वपरि
वारकेति। शौद्रंवर्णमसृजतेत्यत्रौकारोवृद्धिः। पुष्यतीतिपुषेरुकृत्वात्प्रश्नस्यानवकाशत्वे
मात्राशंक्याहविशेषतस्त्विति। एषशब्दस्यार्थांतरे अप्रसिद्धत्वात्कथंपृथिव्यांवृत्तिरित्याशंक्याह इय
मेवेति। ननुचातुर्वर्ण्यस्य सृष्टत्वादेतावतैव कर्मानुष्ठानसिद्धेरलंधर्मसृष्ट्येत आह स चतुर इति।
अनियतताशंकया नियामकाभावे तस्यानियतत्वंसंपादनयेतियावत्। तच्छब्दः सृष्टक्षत्र
विषयः कुतो धर्मस्य सर्वनियंतृत्वं क्षत्रस्येव तत्प्रसिद्धेरित्याह तत्कथमिति। अनुसवमनु ११०
सृत्य परिहरत्यच्यत इत्यादिना तदेवोदाहरति। यथेतिराज्ञा स्पर्धमान इतिशेषः॥ धर्मस्य
स्योत्कृष्टत्वेनसत्याद्भिन्नत्वं हेत्वंतरमाह यो वा इति। कथंधर्मस्य सत्यत्वंस हि पुरुष धर्मे वि

चन धर्मः। स सत्वमित्यवांतरभेदादित्याशंक्याह स एवेति। यथोक्ते विवेके लोकप्रसिद्धिं प्रमाणय
ति यस्मादिति। उक्तपशब्दो धर्मसत्वविषयो धर्मं वदतीत्येतदेव विभजते प्रसिद्धमिति यथा
शास्त्रानुसारेण वदंतं धर्मं वदतीति वदंति तथा तद्वैकल्येन वा रन वैपरीत्येन धर्मं वदंतं स सं वदती
तीत्याहुरिति योजना। धर्ममेवन व्याचष्टे लौकिकमिति। सत्यं वदतीत्येतदेव स्फुटयति। शास्त्रा
दिति। कार्यकारणभावेनानयोरेकत्वमुपसंहरत्येतदिति। शास्त्रार्थसंशये शिष्टव्यवहार
निश्चयो यथा च वदा। हादिशाकेषु धर्मसंशये तु शास्त्रार्थविशान्निर्णयो यथा चैत्यवंद
नादिव्युदासेनाग्निहोत्रादावतो हेतुहेतुमद्भावादुभयोरैक्यमिति भावः। धर्मस्य स
त्वादभेदफलितमाह। तस्मादिति। तस्य सर्वनियंतृत्वे पि प्रकृते किमायातं तदाह तस्मा
त्स इति। तर्हि यथोक्तधर्मवशादेव कर्मानुष्ठानसिद्धेर्वर्णाश्रमाभिमानस्याकिंचित्क
रत्वमित्याशंक्याहानर इति। धार्मिकत्वायेभिमानो ब्राह्मण्याद्यभिमानं पुरोधायानुष्ठापक
य

235

श्चेत्तदपि मनोपि तथैवाभिमानांतरं पुरस्कृत्यानुष्ठापयेदित्याशंक्याह तानिवेति। न खल्वविदु
षो धार्मिकस्य ब्राह्मण्यादिषु निमित्तेषु सत्सु कर्मप्रवृत्तौ निमित्तांतरमपेक्ष्यते प्रमाणाभावा
दित्यर्थः। पुनरुक्तिवैयर्थ्यमाशंक्योक्तमुत्तरार्थ इति सर्वेष्विति देवेषु दर्शितस्य वर्णविभागस्य
मनुष्येष्वतरयंथेनयोजनार्थ इति यावत्। सर्व एव वर्णचतुष्टयनिविष्टमवांतरविभागमभि
धातुमारभते यदिति। अन्यदेहांतरस्वरूपेण क्षत्रादिविकारमंतरेणेति यावत् विकारांतरमति
ब्राह्मणलक्षणं। क्षत्रियेणेत्यत्र विवक्षितमर्थमाहेंद्रादिदेवताधिष्ठित इति वेरूपेणेति। वस्त्वा
ऽधिष्ठितत्वमुच्यते श्रेष्ठेणेति सर्वाधिष्ठितत्वं। आग्न्यादिभावमापन्नस्य क्षत्रादिर्नु भा
वो नतु क्षत्रादिभावमापन्नस्य अग्न्यादिभाव इत्येतावन्मात्रेण ब्रह्मणो विकृतत्वाविकृतत्व
मग्नि ब्राह्मणस्तु सर्वमुक्तमित्यपि तिश्रेस्य तस्मादित्यादि व्याचष्टे यस्मादिति। यथोक्तमा
र्थनायान्याप्यत्वं साधयति तदर्थमेवेति। कर्मफलहानार्थमिति यावत्। मनुष्याणां मध्येऽव १२

रमपि मनुष्यमवलंब्य कर्मफलभोगापेक्षायामधिकरणसंप्रदानभावेनावस्थिताग्नीन्द्रा-
दिनिमित्तक्रियापेक्षा नास्ति किंतु ब्राह्मणजातिप्राप्तिमात्रेण तत्प्रतिबद्धं जप्यादिकर्मै-
व रूपं भावीति तन्मात्रेण पुरुषार्थः। सिद्धताप्तिप्रतीकग्रहणं सर्वत्र माह मनुष्याणामि-
ति। कुत्र तर्हि यथोक्तक्रियापेक्ष्यत इति तत्राह यत्र त्रिविलादिवानां मध्येऽग्निसंबंधमेव
कर्म कृत्वा पुरुषार्थलाभो मनुष्याणां मध्ये तु ब्राह्मण्यप्रयुक्तजप्यादिमात्रेणात्मप्राप्ति-
रित्यत्र प्रमाणमाह स्मृतिश्चेति। जप्याग्रहणं जातिमात्रप्रयुक्तकर्मोपलक्षणार्थं। अन्व-
न्यदग्निसंबद्धं कर्म कोपं ब्राह्मणो नाम तत्राह मैत्र इति। सर्वेषु भूतेष्वभयप्रदो विशि-
ष्टजातिमानिति यावत्॥ ननु यथोक्तस्मृतेर्ब्राह्मण्यप्रतिलंभमात्रादभ्युदयलाभेऽपि
कुतस्तल्लोके निःश्रेयससिद्धिस्तत्राह। पारिव्राज्येति ब्राह्मणा व्युत्थायाथ भिक्षाचर्यं चरं-
तीति युक्तमित्यर्थः। ब्राह्मणे मनुष्ये विहितस्यार्थमुपसंहरति तस्मादिति। हेतुवाक्यमादा

237

यच्चाचष्टे यस्मादिति हिंसाद्यर्थी यस्मादिकस्को मत्स्य एवं बलं तदेताभ्यां यस्मात्सा स्या दृभ
व तस्माद् यावेवे यांदिपुक्तमिति योजना। अग्नौ हुत्वा आलये च दत्वा परामत्मलस्पर्णं लो
कमाप्नुमि ह्लीति पत्ते प्रपंच व्याख्यामनुवदस्य नेति। सप्तमी तस्मादिसादिवाक्य विषया प्र
क्रमालोचनायां कर्मफलमिहलोकलौ शब्दार्थीन परमार्थोप्रक्रम पांगप्रसंगादिति दृष
याति। तदस्य दिति सकर्माधिकार्यं कर्मसु प्रसिध्यर्थमिति भावत। वाक्यशेषगत विशेषण
वशादपि कर्मफलस्यैवात्र लोकशब्दवाच्यत्वमित्याह। परेण चेति। तदेव प्रपंचयति यदि
हीति। परपक्षे स्वमिति विशेषणं व्यावर्त्याभावान्न घटेतेति चेत्तत्वत्पक्षेपि कथं तदुपप
त्तिरित्याशंक्याह स्वलोकेति। परशब्देनात्मविषयः न नु प्रकृतेवाक्ये लोकशब्देन परमा
त्मानोच्यते चेदुत्तरवाक्ये वितेनेनास्यावुच्येत विशेष्याभावादित्याशंक्य विशेषणसामर्थ्या १२९
न्नैवमित्याह। विद्येति। तेषां स्वरूपव्यभिचारे वाक्यशेषं प्रमाणयति ब्रवीतीत्येति। उत्तरवा

2३8

वाख्यायसं सर्वपक्षमाह ब्रह्मणेति। तत्पुनरचेतनं न किंचित्करमित्याशंक्याह तत्त्वेति। सर्वै
रेव वर्णैः स्वस्य कर्त्तव्यतया तान् प्रतिनियंतृत्वेति योजना। तस्य पुमर्थोपायत्व प्रसिद्धिमा
द्रायफलितमाह तस्मादिति। अविद्योपाधिकभेदः। देवतागुणकर्ममुक्तिहेतुरिति पक्षं प्रतिक्षे
प्तुमुत्तरं वाक्यमुत्थापयति। अत आहेति। ज्ञानादेव तु मुक्तिर्न कर्मणेत्यागमप्रसिद्धमिति
निपातयोरर्थः। तत्र निमित्तमुपादानं चेति द्वयं संक्षिप्य लविधेति। निमित्तं विवृणोत्यध्य
धीनेति। आत्माख्यस्य लोकस्य स्वत्वे हेतुमाहात्मत्वेनेति। अहं ब्रह्मास्मीति द्रष्टव्येति संबं
धः। यः परमात्मानमविदित्वैव म्रियते तमेनं परमात्मानं पालयतीति योजना। परमात्मनः
स्वरूपत्वादविदितस्यापि पालयितृत्वं स्यादित्याशंक्याह सयद्यपीति। लोकशब्दादुपरि
ष्टाद्यापीति द्रष्टव्यं। अविदितइत्यस्य व्याख्यानमविद्ययेत्यादि परमात्माख्यो लोको
ज्ञातोपुनक्तोसन्न कर्मफलत्वलोकं वैधर्म्यदृष्टांततया दर्शयस स्वरवेति। अज्ञातस्यापा

बृ·आ·३ त्वयितत्वेसा धर्म्यदृष्टांतमाह संख्येति यथा लोके कश्चिद्दशमोस्मीसन्ज्ञानात्तेन नवैकादिनिव
र्तितेनात्मानमनुन्क्ति तथा परमात्मापीत्यर्थः। तत्रैव स्फटिकलौहित्यदृष्टांतद्वयं व्याचष्टे यथानेला
दिना। अविद्यादीनां दिनाश्येन तद्गुणसंसर्वसंसर्ग्यते यदि हेत्वादिभावकापोद्यं चोद्यमुत्थापय
ति। नन्विति। नन्विष्टफलनिमित्तस्यापि कर्मणः फलप्राप्तिध्रौव्यात्कथं कर्मणा मोक्षं
सेत्स्यंतित आहेति। बाहुल्यमश्वमेधादिकर्मणो महत्त्वं तद्धि दुरितमात्रक्षयमो
क्षमेव संपादयिष्यतीत्यर्थः। यत्कृतकं तदनित्यमिति येन्यो मानस्य परिहरति तत्रे सा
दिना सत्यमप्यर्थः संसार इति निपातार्थस्तु च यत्स्पकृतवदिति। अनेनं विलंब्याकरोति सलो
कमिति। यथोक्तेर्विधिरन्वयव्यतिरेकादिः। पुण्यकर्मच्छिद्रेषु दुरितप्रसक्तिं निवारयति नै
रंतर्येणेति। तथा पुण्यं संचिन्वतोपि प्रायमहानेनेति। प्रक्रांतस्य छद्मापेक्षितं कथयति १२२
तत्कर्मेति। प्रागुक्तन्यायद्योतीहेति निपातः। कारणरूपेण कार्यस्य ध्रुवत्वमान्त्यमाह।

तत्कारणयोरिति। मुक्तेरनित्यत्वदोषसमाधिस्तर्हि केन प्रकारेण स्यादित्याशंक्याह तरति।
आत्मशब्दार्थमाह स्वलोकमिति। तदेव स्फुटयत्यात्मानमितीति। आत्मशब्दस्य प्रकृतस्व
लोकविषयत्वे हेत्वंतरमाहेह चेति। प्रयोगे तु पुनरुक्तिभयादर्थांतरविषयत्वमपि स्यादित्य
र्थः। विद्याफलमाकांक्षाद्वारा निरूपयति समरेति। कर्मफलस्य क्षयित्वमुक्त्वादकर्मणो क्ष
यत्वं वदतो व्याहतिमाशंक्याह कर्मेति। वाक्यस्य विवक्षितमर्थं वैधर्म्यदृष्टांतेनाचष्टे ये
थेति। अविदुष इति छेदः। कर्मक्षये वा विदुषो दुःखाभावे दृष्टांतमाह मिथिलायामिति।
आत्मानमित्यादि केवलं ज्ञानान्मुक्तिरित्येवं परतया व्याख्यातं संप्रति तत्र भर्तृप्रपंच
व्याख्यानमुत्थापयति। स्वात्मेति। आत्मलोकोपासकस्य कर्माभावे कथं तदक्षयवाचो
युक्तिरित्याशंक्य कर्माभावस्यासिद्धिमभिधाय कर्मसाध्यं लोकं व्याकृतरूपेणाभिनत्ति
लोकशब्दार्थं चेति। औत्प्रेक्षिकी कल्पना न तु श्रौतीति वक्तुं। कैल्लेत्युक्तं। तत्राद्यं लोकशब्दा

र्थमनन्यतदुपासकस्य दोषमाहेकरिति। परिछिन्नः कर्मात्मा तत्साध्यो व्याहृतावस्थो लोकस्त
स्मिन्नहंग्रहेणासत्लोकस्येति यावत् क्लिलन्नाब्धस्तु पूर्ववत्। द्वितीयलोकनाब्धमिन्नघ
तदुपासकस्य लोपं दर्शयति तमेवेति। यथा कुंडलादिरंतर्बहिरन्वेषणे सुवर्णातिरिक्त
रूपानुपलंभात्तद्रूपेणास्य मिथ्यात्वं तथा कर्मसाध्यं हिरण्यगर्भादिलोकं कार्यत्वाद्व्याहृ
तं कारणमेवेसंगोलसयस्तस्मिन्नहंबुध्योपास्ते नैस्या परिछिन्नकर्मसाध्यलोकात्मो त
पासकता तत्ब्रह्मवित्वं कर्मित्वं च घटते तस्मखल्वात्मैव कर्म तेन तस्य तन्न क्षीयते यत्पु
नरद्वैतावस्थामुपास्ते तस्यात्मैव कर्म स्रवतीति हि मत्वर्थप्रपंचैरुक्तमित्यर्थः। आत्मानमि
त्यादि समुच्चयपरमिति प्राप्तं पक्षं प्रत्याह पानतीति। श्रौतत्वाभावे हेतुमाह स्वं लोकेति।
स्वलोकमहस्वेत्यत्र स्वलोकशब्देन परस्य प्रकृतस्यात्मन एवेत्यत्र प्रकृतहानाप्रकृ १२३
तप्रक्रियापरिहारार्थमुक्तत्वादात्रलोकद्वैविध्यकल्पनायुक्तेत्यर्थः। लोकशब्देनात्र

परमात्मपरिग्रहे हेत्वं तस्माहा। स्वं लोकमितीति। यथा लोकस्य स्वशब्दार्थो विशेषणं तथात्मा
छ१ नमिसत्र स्वशब्दपर्यायात्मशब्दार्थस्तस्य विशेषणं दृश्यते। न च कर्मफलस्य मुख्यमात्म
त्वमतो लोकशब्देन परमात्मैवेत्यर्थः। प्रकरणादिविशेषणाच्च सिद्धमर्थं दर्शयति तत्रेति।
परस्यैव लोकशब्दार्थत्वे हेत्वं तस्माह परेणेति। उक्तमेव प्रपंचयति पुत्रेति। अथ परे बुवा
क्येषु परमात्मा लोकशब्दार्थः प्रकृते तु कर्मफलमिति व्यवस्थेति चेन्नैवमेकवाक्यत्वसंभ
वे तच्छेदस्यान्याय्यत्वादित्याह तैरिति। एकवाक्यत्वसंभावनामेव दर्शयती। सा हपीति। य
थोत्तरत्र आत्मादिशब्देन विशेष्यते पूर्ववाक्ये च स्वं लोकमदृष्ट्वेति स्वशब्देनात्मवाचिना
तस्य विशेषणं दृश्यते तथा च पूर्वापरालोचनायामेकतासिद्धेरित्यर्थः। प्रकरणेन प
रस्य लोकशब्दार्थत्वमयुक्तं लिंगविरोधादिति चोदयति तस्मादिति। तदेव विवृणोति
हेस्मादिना॥ अर्थवादस्थं लिंगं न प्रकरणाद्बलवदिति मत्वा समाधत्ते नेत्यादिना स्तुतिमेव

बृ॰आ॰३ स्य एव तस्मादेवेति। लोकाज्ञानादिति शेषः। यथा छांदोग्ये स्तुत्यर्थमात्मानः स्रष्टृत्वमुच्य
ते तथात्राप्यात्मलोकं स्तोतुमेतत्फलवचनमित्याहान्तरमिति। भवतु वा मा वा फलं तदस्मा
द्ध्येवेत्यादिरर्थवादस्तथापि तस्य सर्वात्मत्वप्रदर्शनार्थत्वादुक्तमत्र लोकशब्देन परमात्म
ग्रहणमित्याह सर्वात्मेति। तस्मात्सर्वमभवदिति वाक्यं दृष्टान्तयति सर्ववदिति। किंचात्म
शब्दस्य त्रिधापरिच्छेदशून्यार्थवाचितायाश्च प्रालीत्यादिवाक्येन सिद्धत्वात्तत्समानाधि
करणाल्लोकशब्दस्यापि तदर्थत्वात्परस्यैवात्र लोकत्वमित्याह यदिहेति। किंच यदि लोक
शब्देन परं हित्वार्थान्तरमुच्यते तदा स विशेषणं वाच्यं स्यादन्यथा स्वं लोकमिति प्रकृतप
रमात्मलोकस्य स्वत्वस्य पक्षे अनन्तरोक्तवरुब्रह्मलोकस्य च व्यावृत्तस्य योगात् न चात्र स विशे
षणं वाक्यं दृष्टम्। अतः स्वं लोकमिति प्रकृतः परमात्मैवात्रापि लोक इत्याहास्येति विशे १२८
षणं विनैवास्मादित्यत्र परापराभ्यामर्थान्तरं किं न स्यादित्याशंक्याह नहीति स्वं लोकमिति

प्रकृतो परमात्मन्यात्मानमेवेति विशेषिते चाव्याकृताख्यापरापराख्यामंतरालावस्थानं प्र
तिपत्तुंनुज्ञायते तस्याः श्रुतत्वाभावादित्यर्थः। ढुंढिकांतरमवतार्य वृत्तमनूद्याकांक्षापूर्वकं
तात्पर्यमाह यथोरत्वादिना। अत्रे सविद्यावस्थापूर्वभ्रंशो वा गम्यते। अपि पर्यायस्याथो
शब्दस्यासंगतिमाशंक्य व्याकरोत्यथोरतीति। परस्यापि प्रकृतत्वात्कुतो विशिनष्टि ग्र
हीति ग्रहीत्वे हेतुरविद्यानित्यादि। एतत्पर्युदासार्थं कर्माधिकृततरत्कस्कं। कथमुक्तस्या
त्मनः सर्वयोग्यते त्याशंक्याह सर्वेषामिति। तदेव प्रश्नद्वारा प्रकटयति कैः पुनरिति
यजतिजुहोत्योरस्यागार्थत्वेनाविशेषात्पुनरुक्तिमाशंक्य यजतिचोदना द्रव्यदेवता
क्रियासमुदाये कृतार्थत्वादिति न्यायेनात्यागा इति। आसेचनं प्रक्षेपः। उक्तं च जुहोतिरा
सेचनाधिकः स्यादिति। यथोक्तहोमादिभिर्देवादीन्नुपकुर्वतोग्रहाणे विद्यया प्र
तिबंधसंभवात्तदुपकारित्वं व्याहतिरिलानां कथं पूर्वेषामथशब्दानामभिप्रेतमर्थम

न्तस्यसमनंतरंकाकमेवतार्यंतदर्थमाह यस्मादिति देवादीनां कर्माधिकारिणि कर्तृत्वा
द्विपरिपारिपालनमेवपरिरक्षणमिति विवक्षित्वा सर्वेषां स्मारयतितस्मादिति।
यथोक्तंकर्मकुर्वन्यद्यपि देवादीनामुपकरोतीति तथापि तत्कर्तृत्वमावश्यकमानाथा
नादित्वाक्ताहतत्राह इति। ततयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञो भूतयज्ञश्चेत्येवमे
ते पंचमहायज्ञाः ननु श्रुतमपि विचारं विनानुष्ठेयं न हि रुद्ररोदनादिश्रुतमेवानुष्ठी
यते तत्राह निर्मांसितमिति। तदेतद्ददृपतेयघजते स यदाग्नौ जुहोतीत्याद्यवदानप्रकृ
रणं। ऋणं ह वा हैव जायते जायमानो यो ऽस्तीत्यादिनार्थवादेनेति शेषः। वाक्यांतरमा
दाय व्याख्यातुं पातनीकां करोति। आत्मैवेत्यादिना। कर्मैव बंधनं तत्राधिकारीनुष्ठा
नं तास्मिन्निति यावत् विद्याधिस्तदुपाये श्रवणादौ प्रवृत्तिस्तत्रेत्यर्थः। यथोक्ताधि २५
कारिणो देवादिभीरक्षणं प्रवृत्तिमार्गे नियमेन प्रवर्तकामिति शंकते नन्विति। उक्तमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

246

गी करोति बाढमिति तर्हि प्रवर्त्तकान्तरं न वक्तव्यं तत्राह कर्माधिकार इति। कर्मस्वधिकारेणास्व
गोचरत्वं श्रास्नानेव देवादयोपि रहंति न सर्वो अमासाधारणं ब्रह्मचारिणमतोस्य कर्म
मार्गे प्रवृत्तौ देवादिरसपास्या हेतुत्वात् ब्रह्मचारिणो निवृत्तिं लक्षणप्रवृत्तिपक्षपाते का
रणं वाच्यमित्यर्थः। मनुष्यमात्रं कर्मण्येव ते बलात्प्रवर्त्तयन्ति तेषामन्निंस्वन्वाक्लित्वादि
त्वाशंक्याहान्यथेति। स्वगोचरारूढानेवैत्सेव काश्यानर्सकोर्त्तयन्ति नत्विति विद्विष्टा
धिकारो गृहस्थानुष्ठेयकर्मसु गृहस्थत्वेन स्वामित्वं तेन देवगोचरतामप्राप्तमित्यर्थः॥
देवादिरसपास्या कारणत्वे फलितमाह तस्मादिति। प्रसंग विद्याय योक्ताधिकारिणो
नियमेन प्रत्यनुरागे हेतुरिति शंकते नन्विति। तदेव स्फुटयति। अविद्यावान्नित्तिलतस्याः स्व
रूपेण प्रवर्त्तकत्वं दूषयति साक्षीति। अविद्यायास्तर्हि प्रवृत्त्यन्वयव्यतिरेकौ कथमित्याशंक्य
कारणकारणत्वेनेत्याह प्रवर्त्तकेति। सत्यन्यस्मिन्नकारणे कारणमेवाविद्या प्रवृत्तेरिति चेन्नत्रा

हैवं तान्न हीति। उत्तरवाक्यमुत्तरत्वेनावतार्य तस्मिन्विवक्षितं प्रवर्त्तकं संक्षिपति तदिहापि
धीयत इति तत्रार्थतः श्रुत्यंतरं संवादयति स्वाभाविकामिति। तत्रैव भगवतः संमतिमाह।
स्मृतौ चेति। अथ यत्केन प्रयुक्तोऽयमित्यादिप्रश्नस्योत्तरं काम एष क्रोध एष रजोगुणसमु
द्भव इत्यादि॥ अकामतः क्रिया काचिद्दृश्यते नेह कस्यचित्। यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य
चेष्टितमिति तमिति वाक्यमाश्रित्याह मानवे चेति। दर्शितमिति शेषः। उक्तेऽर्थे तृतीयाध्याय
श्लोकमपि प्रमाणयति स एष इति। एवं तात्पर्यमुक्त्वा प्रतीकमादाय पदानि व्याकरोति
आत्मैवेत्यादिना। वर्णी द्विजत्वद्योतको ब्रह्मचारीति यावत्। कथं तर्हि हेतुत्वाभावे तस्य
कामित्वमपि स्यादित्याशंक्याह जायादीति। सशब्दं व्याकुर्वन्नुत्तरवाक्यमादायाव
शिष्टं व्याचष्टे स्वाभाविकेति। कामनाप्रकारं प्रश्नपूर्वकं प्रकटयति कथमिति। कर्मा
धिकारहेतुत्वं तस्याः साधयति तच्चेति। प्रजां प्रति जायाया हेतुत्वद्योतकोऽथशब्दः। प्रजा

यामानुषविज्ञांतर्भावमुपेत्य द्वितीयो यच्छब्दस्तृतीयस्तु विनास्य कर्मानुष्ठानहेतुत्वविवक्षयेति
विभागः कर्मानुष्ठानफलमाह येनेति। तत्किं नित्यनैमित्तिककर्मणामेवानुष्ठानेनेत्याह काम्या
नि चेति क्रियापदमनुकृष्टं चशब्दः कामशब्दस्य यथाश्रुतमर्थं गृह्णीतो तावानित्यादिवाक्य
स्याभिप्रायमाह साधनत्वस्येति। अस्याः साधनैषणायाः फलस्मृतेति संबंधः द्वयोरे
षणात्वमुक्त्वा लोकैषणां परिशिनष्टि तदर्थं हीति। कथं तत्र साधनैषणोक्तिरित्याशंक्याह
सैकेति एतेन वाकारोपोप्यनुगुणो भवतीत्याह इति। साधनवत्फलमपि काममात्रं चेत्क
थं तर्हि श्रुत्या साधनमात्रमभिधीयेत तावानित्यवधार्यते तत्राह फलार्थत्वादिति उक्ते सा
धने साध्यमार्थिकमित्यत्र दृष्टांतमाह भोजनवदिति। साधनोक्तौ साध्यस्यार्थादुक्तेरेतावानि
ति द्वयोरनुवादेपि कृपमेषणार्थे कामशब्दस्तत्र प्रयुज्यते न हि तौ पर्यायौ न च तद्वाच्य
त्वे तयोरनर्थते सानांकपर्यायत्वमेषणाकामशब्दयोरूपेत्याह ते एते इति। वेष्टनमेवस्य एथ

तिकर्ममार्गस्य प्रवृत्तिरिति। अग्निमुग्धोग्निरेवा होमादिद्वारेणाममस्यैवः साधनं नात्मज्ञानमि
त्यभिमानवान्। धूमतांतो धूमेन ग्लानिमापन्नः धूमतांतो धूमेन ग्लानिमापन्नः धूमतावाम
मांते देहावसाने भवतीति मन्यमानस्तो धूममाप्तिभवतीति श्रुतेः। स्वर्लोकमात्मानं वाक्यांत
रमुत्थाप्य व्याचष्टे कथमित्यादिना। तस्मादेतावत्वमवधार्यतेषामिति श्रोष्युः। उक्तमेवा
र्थं लोकदृष्टिमवष्टभ्य स्पष्टयति न हीति लब्धव्यांतरात्माद्येपि काममपि व्यांतरं स्यादित्या
शंक्याह लब्धव्येति। एतद्व्यतिरेके घासाध्यसाधनातिरेकेणेयावत्। तयोर्द्वयोरपि कामत
विधायिश्रुतेरभिप्रायमाहैतदुक्तमिति। कामस्यार्थत्वात्साध्यसाधनयोश्च तावन्मात्रत्वा
त् स्वर्गादौ पुमर्थता। निश्वासं सह्वास्वप्नलाभतुल्यप्यस्तिस्तःप्सो व्युत्थानं सन्नासागम
कं कृत्वाकांक्षितमोक्षहेतुज्ञानमुद्दिश्य श्रवणाद्यावर्तयेदित्यर्थः। तस्मादपीत्यादि व्याच ३७
ष्टे यस्मादिति। प्राकृतेस्त्वेवमितरेषां नबुद्धिसर्वकारिणामिदं वृत्तमित्याशंक्याह। प्राजापते

ख्येति तत्र हेतुत्वेन पूर्वं लिंगं स्मारयति सोविभित्यादिना। तत्रैको वेर्यल्लिंगमनुमानं सूचयति
तस्मादिति। सयावदित्यादिव्याक्यमादायस्यापृसरवमिति। पूर्वः सूत्राब्दोवाक्यप्रदर्श
नार्थो द्वितीयस्तु स्वाभ्यासान्मध्यपातित्वविरोधः। अर्थसिद्धमर्थमाह पूर्वरिष्टोव्यादिति। त
स्यो हत्वतित्वेत दवतार्यव्याकरोति यदित्यादिना। अहत्त्वत्वाभिमानिनो विरुद्धं हत्व
त्वमित्याह कथमिति। विरोधमंतरेण कात्स्न्यार्थे विभागं दर्शयत्ययमिति विभागेऽस्तु तेम
न सोमयजमानत्वकल्पनायां निमित्तमाह तत्रेति। उक्तमेव व्यनक्ति यथेति। तथा मनसो य
यजमानकल्पनावदित्यर्थः। वाचि जायात्वकल्पनायां निमित्तमाह मनरति। वाचो मनो
नुवृत्तित्वं स्वरूपकथनपुरःसरं स्फोरयति वागीति। प्राणस्य प्रजात्वकल्पनां सा
धयति ताभ्यां चेति। कथं पुनश्चक्षुर्मानुषं वित्तमित्युच्यते पशुहिरण्यादि हि तथेत्या
शंक्याह तत्रेति। आत्मादित्रये सिद्धे सतीति भावः। आदिपदेन कायचेष्टा गृह्यते। मानुष

मिति विशेषणस्यार्थवत्त्वं समर्थयते तद्द्विविधमिति। संप्रति चक्षुषो मानुषवित्तत्वं प्रपंचय-
ति गवादीति। तत्सदपरामृष्टमेवार्थमाचष्टे तेन संबंधादिति। तत्स्थानीयं मानुषवित्तस्था-
नीयं तेन मानुषेण वित्तेन त्वेतत्संबंधमेव साधयति चक्षुषा हीति। तस्माच्चक्षुर्मानुषं वित्त-
मिति शेषः। आकांक्षापूर्वकमुत्तरवाक्यमुपादत्ते किं पुनरिति। तद्व्याचष्टे दैवेति। तत्र हेतुमा-
ह कस्मादित्यादिना यजमानादिनिर्वर्त्यकर्मप्रश्नपूर्वकं विशदयति किं पुनरित्यादिना॥
हेति संपत्तेरुक्तिः। शारीरस्य कर्मत्वमप्रसिद्धमिति शंकित्वा परिहरति कथं पुनरिति। अस्ये-
ति यजमानोक्तिः। हिरण्याद्यर्थो यतरत्पन्नघते तस्य कृत्स्नतेलक्षणमुपसंहरति तस्येति। उक्त-
नीत्या कृत्स्नत्वे सिद्धे फलितमाह तस्मादिति। अस्येति दर्शनोक्तिः पशोः पुरुषस्य च पाङ्क्तत्वं
तद्व्याचष्टे। पुरुषस्य पशुत्वाविशेषात्पृथग्ग्रहणमयुक्तमित्याशंक्याह पशुत्वेऽपीति। १२८
न केवलं पशुपुरुषयोरेव पाङ्क्तत्वं किंतु सर्वस्येत्याह किं बहुनेति। तस्माद्व्याप्तिकस्य दर्शन

स्य पत्तत्वं प्रचत्वयोगाद्विरुद्धमिति शेषः। संपत्तिफलं व्याकरोत्येवमिति। व्याख्यातार्थवाक्यमनुवदन्ब्राह्मणमुपसंहरति। साध्यं साधनं च पांक्तं सूत्रात्मना तात्मात स्वात्मत्वेनानुसंदधानस्य तदाप्तिरेव फलं तक्रतुन्यायादित्यर्थः। ब्राह्मणं। ब्राह्मणांतरमवतार्य संगतं वक्तुं वृत्तं संकीर्तयति। यत्सप्तान्नानीत्यादिना। तत्रेत्यतिक्तां तद्ब्राह्मणोक्तिं उपास्तिरा। उक्तं पिददर्शनमविद्याकार्यमिनेनान्नघनुस्सदेवेति। तद्धेतुरविद्या सर्वत्र प्रस्तुतेति योजना। अथो अयमित्यत्रोक्तमनुवदति। सवर्णाश्रमाभिमान इति। आत्मैवेदमग्र आसीदित्यादावुक्तं स्मारयति काम प्रयुक्त इति। वृत्तमनूद्योत्तरग्रंथमवतारयितुमपेक्षितं स्मारयति यथा चेति। गृहिणो जगतश्च परस्परं स्वकर्मोपार्जितत्वमेष्टव्यमन्यथान्योन्यमुपकारकत्वायोगादित्यर्थः। ननु सूत्रस्यैव जगत्कर्तृत्वं ज्ञानक्रियालिनापृथक्त्वान्नेतरेषां तदभावादत आह एवमिति सर्वकल्पीयविहितप्रतिषिद्धकर्मानुष्ठाता सर्वो जंतुरुत्तरसर्गस्य पितृत्वेनात्र वि

वक्षितेन तु प्रजापतिरेवैतत्कर्मार्थं संक्षिप्याह सर्वस्येति। सर्वस्य मिथो हेतुहेतुमद्भावमाहेतदेति। सर्वस्यान्योन्यकार्यकारणोभयाकल्पितत्ववचनं कुत्रोपयुज्यते तत्राहात्मैकत्वेति। एवं तर्हि कांकृतोत्र ब्राह्मणातात्पर्यमाह यदस्माविति। उच्यते ध्यानार्थमिति शेषः। अन्नत्वे हेतुर्भोज्यत्वादिति। तेन ज्ञानकर्मभ्यां जनकत्वेनेति यावत्। ब्राह्मणमवतार्य मंत्रमवतारयति। एतेषामिति। तत्राद्यमंत्रभागमादाय व्याचष्टे यत्सप्तान्नानीति। अजनयदिति क्रियाविशेषणं यदिति पदं। तथा च तद्युक्तं पितृत्वादिति शेषः। ग्रंथार्थधारणाशक्तिर्मेधा कृछ्रचांद्रायणादितपः ते कस्मादत्र न गृह्यते तत्राह ज्ञानकर्मणीति द्वे। तयोः प्रकृतत्वं प्रकटयति पांक्तं हीति। इतरयोरप्रकृतत्वे हेतुमनुपफलितमाह। तस्मादिति। ज्ञानकर्मणोः प्रकृतत्वमुक्तं हेतुमादाय वाक्यं ग्रहयत्यत इति। सप्तान्नानीत्यादिमंत्रभागं व्याख्याय ब्राह्मणवाक्यसमुदायतात्पर्यमाह तत्रेति। मंत्रब्राह्मणात्मको ग्रंथः ससम्यर्थः।

मेधयाहीत्यादिनालपनमाकांक्षापूर्वकमुत्थापयति तत्रयदिति। प्रकृतमंत्रसमुदायः सप्तम्या
परामृश्यते। व्याख्यानेमेव संगच्छतिप्रसिद्धो ही। तिन केवलं हि शब्दान्मंत्रस्य प्रसिद्धार्थत्वं
किंतु मंत्रस्वरूपालोचनायामपि तत्सिद्ध्यतीत्याह यदिति। मंत्रार्थस्य प्रसिद्धत्वे मंत्रस्यानु
गुपात्वं हेत्वहेतुफलितमाह तरति। तत्प्रसिद्धिमुपपादयितुं पृच्छति नन्विति। साध्यासा
धनात्मके जगति यदपि तत्त्वमविद्यावतो भावितत्सत्सहत्वात्सिद्धमनुष्ठीयते हि जाया
दिसंपादयन्नविद्यावानित्याहोच्यत इति। स्तुत्या च प्रागुक्तत्वात्प्रसिद्धमेतदित्याशान्तिहितं
चेति यच्चमेधातयोर्म्यां स्वष्टत्वं मंत्रस्यालपनोक्तं तदपि प्रसिद्धमेव विद्याकर्मपुत्राणा
मभावे लोकत्रयोत्पत्त्युपपत्तेरित्याह तत्रचेति। सर्वोत्तरस्येयं सम्बन्धः। पुत्रेणैवायं
लोको जय्य इत्यादेर्वक्ष्यमाणत्वान्मंत्रार्थस्योपस्य प्रसिद्धत्वेत्याह वक्ष्यमाणं चेति। मंत्रार्थ
स्याप्रसिद्धत्वे मंत्रस्य प्रसिद्धार्थविषयं आलपनमुपपन्नमित्युपसंहरति तस्मादिति। प्र

बृ॰आ॰३ कारांतरेण मंत्रार्थस्य प्रसिद्धत्वमाह लक्षणा हीति। फलविषयत्वं तस्याः स्वानुभवसिद्धमिति म
न्तुं हि शाब्दस्तस्याश्च लोकप्रसिद्धत्वेपि कथं मंत्रार्थस्य प्रसिद्धत्वमत आहैषणा चेति। जाया
धात्मकस्य कामस्य संसारंप्रकृत्वात्मोक्षेपि कामः संसारमारभेत कामत्वाविशेषादित्य
प्रसंगमाशंक्याह ब्रत्मैंविधेति। तस्या विषयो मोक्षस्तस्मिन्नद्वितीयत्वाद्रागादिपरिपंथि नि
कामा १२ पर्यायो रागो नावकल्पते न हि मिथ्याज्ञाननिदानो रागः सम्यग्ज्ञानाधिगम्ये मो
क्षे संभवति भ्रान्त्या तु तत्र भवति। तत्त्वबोधाधीनतया संसारविरोधिनी तत्र संसारानुष
क्तिर्मुक्तावित्यर्थः। आत्मीयस्य जायादेः संसारहेतुत्वे कर्मादेरनात्मीयस्य कथं तद्धेतुत्वमि
त्याशंक्याहैतेनेति। अविद्योत्थस्य कामस्य संसारहेतुत्वोपदर्शनेनेति यावत्। स्वाभावि
काभ्यामविद्याधीनकामप्रयुक्ताभ्यामित्यर्थः। इतश्च तयोर्जगत्सृष्टिप्रयोजकमेव व्यामि १३०
ताह स्त्वाकरांतस्येति। यत्सप्तान्नानीत्यादिमंत्रपदस्य मेधया हीत्यादिब्राह्मणस्य चास्य

रोऽस्य मर्थमुक्त्वा तात्पर्यार्थमाह विवक्षितत्वेति। शास्त्रपरवश्यं ह्येच्छास्त्रं च यागादेव साध्यसा
धनभावाद्ध्येशास्त्रीयाद्वैमुख्यसंभवान्न तस्याविवक्षितत्वमित्यर्थः। शास्त्रीयस्य
साध्यसाधनभावविवक्षितत्वे हेतुमाह चलेति। तदेव प्रपंचयति सर्वो हीति। दुःख
यतीति दुःखस्य हेतुरिति यावत्। आम्नातमंत्रब्राह्मणव्याख्यासमाम्नायेति शब्दो विव
क्षितार्थप्रदर्शनसमर्थौ वा। मंत्रब्राह्मणयोः श्रुत्यर्था स्यामर्थमुक्त्वा समनंतर
ग्रंथमवतारयति तन्नेति सप्तविधेत्रे सप्षे सतीति यावत्। व्याख्यानमेवं विवृणो ल
स्येसादिना। साधारणमन्नाम साधारणी कुर्वतो दोषं प्रदर्शयति सपरस्ति तस्य रोभ
वतीस्कन्दे निवृणोत्यपासनेदंति ब्राह्मणो केचेमंत्रं प्रमाणायति तथा चेति मोघं वि
फलं देवाद्यनुपभोग्यमन्नं यादिज्ञानदुर्बल्पेल्को लभते लदासवध एव तस्येति सा
धारणान्नस्यासाधारणीकरणं निंदितमित्यर्थः। तत्रैव स्मृतौ रुद्राहरति भ्रमतिरपीति।

नवृथा घातयेत्पशुं नचैकः स्वयमश्नीयात् विधिवर्जंति निर्वपेदिति पादत्रयं द्रष्टव्यं इष्टा
न्भोगान्हि वो देवा दास्यंते यज्ञभाविताः। तैर्दत्तानिति शेषः। अनेना अभिप्रे सति स्ते
नः प्रमुक्तौ राजनियावन्त्यन्तस्संगर इत्युक्तरं पादत्रयं तत्राद्यपादस्यार्थोऽपि प्राहष्वे
षु आत्मपाघातकोयथाकुर्वरिष्ट ब्रह्महा चैव ऽभ्य पाहे स्वपिति पीमतइति स्वस्यान्न
मस्य केस्वपापं मार्ष्टि स्नो धवतीत्यत्र हेतुः पापहयोरितरस्यासाधारणीकृतभुंजा
नस्य पापितेति। अदत्वा तु य एतेभ्यः पूर्वं भुंक्ते विचक्षणः। स भुंजानो न जानाति स्व
गृध्रैर्जग्धिमात्मन इत्यादिवाक्यमादिनाब्द र्थः। आकांक्षापूर्वकं हेतुमवतार्य व्या
करोति कस्मादिना सर्वभोज्यत्वं साधयति योमुख इति। परस्य भ्रमाज्ञीशदेशितियावत्।
पीडाकरत्वेहेतुमाहममेदमिति। प्रागुक्तदृष्टिफलमाचष्टेतस्मादिति। साधारणमन्नम १३१
साधारणीकुर्वपास्य पापानि हन्ति रिसन्न हेत्वंतरमाह दुष्कृतं हीति। यद्यपि हि मनुष्याणां

उद्धृतमात्रमाश्रियत इति तदसाधारणीकुर्वतो महत्तरं पापं भवतीत्यर्थः। एकमस्येता
दिमंत्रब्राह्मणयोः स्वपक्षमुक्त्वा मतान्तरप्रपंचपक्षमाह गृह्णेति। यदन्नं गृहिणा प्रस
हमग्नौ वैश्वदेवाख्यं निर्वपतीति तत्साधारणमिति मतान्तरप्रपंचैरुक्तमित्यर्थः। साधारण्ये
पक्षानुपपत्तेर्न युक्तमिदं व्याख्यानमिति दूषयति तन्नेति। वैश्वदेवस्य साधारणत्वम
प्रमाणितुमित्युक्तमिदानीं तस्याप्रत्यक्षत्वादिदमपरामृश्य न युक्तिमानित्याह नाथ
ते। इतश्चासाधारणत्वेन सर्वप्राण्यन्नं ग्राह्यमित्याह सर्वेति वैश्वदेवे गृहे पीतर
चरुः स्यादिति चेन्नेत्याह वैश्वदेवेति। यत्तु परपक्षे बदिहमघत इति वाचो नानुकूल
मिति तन्नास्मत्पक्षे स्त्री साहतत्रेति। प्रसक्तसाधारणान्नं समभ्यर्च्य। विपक्षे दोषमा
ह बदिहीति। प्रसंगस्यापि प्रत्वं निराचष्टे दृष्यते हीति परपक्षे वाक्यदोषं विरोधं दोषांत
रमाह नचेति। रूपनादितुल्यत्वं तस्य व्यावर्तयति न च तस्येति। अतिविदस्यापि तस्या

बृ·आ·२

स्वप्रावरणेऽनुष्ठितत्वात्तदनुष्ठानुष्ठायिनः पापानि रतीति दित्याशंक्याह न चेति। अवरपं याति
तिर्यक्त्वं जग्धा चैवाहुतं हविरित्यकरणे वैश्वदेवस्य प्रत्यवायश्रवणाच्च तदनुष्ठायिनो
न पाप्मवेधोऽस्तीत्याह करणे चेति। सर्वसाधारणान्नत्यहेतुतत्स्वरस्य निंदावचनमुप
पद्यते तेन तद्देवगाल्यमित्याहेतरत्रेति। तत्रैव मक्तव्यंतरं संवादयत्याहमिति। अर्थिभ्यो
विभज्य अन्नमदत्वा स्वयमेव भुंजानं नरमहमन्नमेव भक्षयामि तमनर्थभाजं करो
मीत्यर्थः। मंत्रांतरमाहायाक्रोशा द्वाराभ्राल्लणमुत्याप्याचष्टे देवानित्यादिना। कृतप्र
कृतयोर्देवान्नत्वे संप्रतिनमनुष्ठानमनुकूलयति यस्मादिति। पक्षांतरमुपन्यस्य व्या
करोत्ययो इति। दर्शपर्णमासौ देवान्नेकृयेंतर्हि कृतप्रकृते इति पक्षस्य प्राप्तिरस्त्वत्राहाद्वि
त्वेति। तर्हि द्वे देवानिति श्रुतद्वित्वस्य कृतप्रकृतयोरपि संभवान्न प्रथमपक्षस्य प्रर्थप १३२
क्षत्वमत आहायपीति। प्रसिद्धतरत्वे हेतुमाहमंत्रेति। अन्नमयेज्वृहन्निर्वपाम्यग्निरिदंह

हविरजुषतेत्यादिमंत्रेषु दर्शपूर्णमासयोर्देवान्नत्वस्य प्रतिपन्नत्वादिति यावत्। इतरथा दर्शपूर्णमासयोरेव देवान्नत्वमिति वक्तुं सामान्यमाह गुणेति। गुणप्रधानयोरेकत्र साधारणशब्दात्मा तौ सत्यां प्रथमतरां प्रधानेभवसवगति गौणमुख्ययोर्मुख्ये संप्रत्यय इति न्यायादित्यर्थः। अस्त्वेवं प्रस्तुते किं जातं तदाह दर्शपूर्णमासयोश्चेति। तयोर्निरपेक्षश्रुतिदृष्टतया सापेक्षस्मृतिसिद्धहुताद्यपेक्षया प्राधान्यं सिद्धं तया प्रधानयोस्तयोरितरयोश्च गुणयोरेकत्र प्राप्तौ प्रधानयोरेव द्वे देवान्निति मंत्रे ग्रहो युक्तिमानित्यर्थः। दर्शपूर्णमासयोर्देवान्नत्वे समनंतरनिषेधवाक्यमनुकूलयति यस्मादिति। इष्टियजनशीलेन स्यादिति संबंधः। ननु तद्यजनशीलत्वाभावे कुतो दर्शपूर्णमासयोर्देवार्थत्वं न हि तावन्निष्पन्नौ तदर्थावित्याशंक्याह इष्टिशब्देनेति। किं पुनस्मिन्वाक्ये काम्येष्टिविषयत्वमिष्टिशब्दस्येत्यत्र नियामकं तत्र किलशब्दस्य चितां पाठक्रमासिद्धिमाह न्यातपथीति काम्ये

धीनामनुष्ठाननिषेधे स्वर्गकामवाक्यविरोधः स्यादित्याशंक्याह ताच्छील्येति। तत्र विहितस्यो
क्तप्रत्ययस्यान्त्राप्रयोगात्कामेष्टियजनप्रधानत्वमिह निषिध्यते तच्च देवप्रधानयो
र्दर्शपूर्णमासयोरवरूपानुष्ठेयत्वासिध्यर्थ ननु तास्वतो निषिध्यंते तन्नास्वर्गकाम
वाक्यविरोधोस्तीत्यर्थः। पश्वन्नविषयमेतत्पदमादाय प्रश्नः सर्वक्लृंतदर्थंचू पश्यति प
शुष्यरति। पशूनां यथोन्नमिति तदुपपादयितुं पृच्छति कथं पुनरिति पयो हीति। प्रती
कमुपादाय व्याकरोत्यन्न इति। पवैवोक्ते द्विपादश्चतुष्पादश्चेति श्रुतिमाश्रित्य मनु
ष्याश्चेत्युक्तं उचितं हीति। अत्र हि शाब्दस्तस्मादर्थे यस्मादित्यपकृमाह। ओविलैव्य
तिरेकद्वारा साधयत्यन्यथेति नियमेन प्रथमं पशूनां तदुपजीवनमसंप्रतिपन्नमि
ति। मनुष्यविषयेवा प्रश्नस्तदितरपशुविषये वेति दृष्टस्कच्यत इति। तत्राद्य मनुष्य
वावष्टपीनप्रत्याचष्टे मनुष्याश्चेति। चकारो मनुष्यमात्रसंग्रहार्थः। ते चैन पयसैवेतिया

वत्। घृतं वेति वाशब्दो वक्ष्यमाणविकल्पद्योतकः॥ जातरूपं हेमत्रैवर्णिकेष्वेकेऽन्येषां जातक-
मीमांसा वा योग्यतामनतिक्रम्य स्तनमेव जातं कुमारं प्रथमं पाययंती सा हि यथा संभ-
वमिति। यद्वा तेषां जातकर्मानधिकृतानां जातं कुमारं यथासंभवं घृतं वा स्तनं वा प्र-
थमं पाययंतीयावत्। पशुविषयं प्रश्नं पक्षा वश्चेति सूचितसमाधानं प्रसाह स्तनमेवेति।
पशूनां जातं वत्समिति संबंधः। पशूनां पयोन्नमिसत्रलोकप्रसिद्धिं प्रमाणयति। अथेति।
द्विपात्। स्वाधिकारविच्छेदार्थोऽयं शब्दः। प्रतिवचनं ब्राचसेनाप्यपीति। ननु येषाममंत्रे घृतोप-
जीवित्वमुपलभ्यते पयस्तेनोपजीवंतीति। न युक्तं तल्लेदस्योक्तत्वात् लक्षाहघृतस्यापीति।
मंत्रपाठक्रममतिक्रम्यापपश्चन्नेत्यारभ्याने प्रसवतिष्ठतेकस्मादिति। द्वे देवानुपाजयदिति द्वे
आख्याते साधने साधनत्वविनोपात्ययोपि बुद्धिस्थमित्यपेक्षमनाश्रित्य परिहरति। कर्मेति।
तदेवस्य एयति कर्महीति। यद्यपि मयोरूपं साधनमाश्रित्य कर्मप्रवृत्तं तथापि द्रव्यहरणमास्मानं

सू॰ आ॰ ३ तर्हिकथं पयसः। सिध्यति तत्राह तद्धेति। वित्तेन पयसा साध्यं काम्यमिन्द्रियस्य साधनमित्यत्र दृ
ष्टांतमाह यथेति। सर्वोक्तो दर्शपूर्णमासौ हि देवन्नो वक्ष्यमाणस्यात्तत्र यस्य यथा साधनं तथा
पयोप्याग्निहोत्रद्वारा तत्साधनत्वात् कर्मकोटिनिविष्टत्वात्तद्व्याख्यानानंतर्यं पयोव्याख्या
नस्य युक्तमित्यर्थः। यः क्रमस्तर्हि किमर्थमित्याशंक्यार्थक्रमेणात द्बाधमभिप्रेत्याह साध
नत्वेति। आनंतर्यपाठक्रमः। अकारणमेतत्विनिश्चितत्वं पाठक्रमादर्थक्रमस्य बलीयस्त्वा
त्तेनेतरस्य बाध्यत्वमित्येतत्प्रथमे तंत्रे स्थितमित्यभिप्रेत्याह इति चेति। पश्रवणस्य चतु
र्थत्वेन व्याख्याने हेत्वंतरमाह व्याख्याने इति। व्याख्याने सौकर्यं साधयति सुखं हीति। प
श्रवणस्य च प्रतिपत्तिसौकर्यं प्रकटयति। व्याख्यातानीति। चत्वारि साधनानि त्रीणि साध्या
नीति विषयोक्तो वक्तव्योत्र सौकर्यपाधीर्भवति। ततश्च पाठक्रमातिक्रमः श्रेयान्नि--- १२५
श्रवणस्य सर्वाधिष्ठानविषयं मंत्रमवतार्य प्रश्नपूर्वकं तदीयं ब्रह्मलक्षणं व्याचष्टे तस्मिन्निति

त्यादिना। मंत्रात् भेदो प्रतिभातीत्याशंक्याह। तत्रेति। पयसि हीति ब्रालपि हिशब्दस्य प्रसिद्धव
द्योतकत्वमस्ति तेन च हेतुना हिशब्देन तस्मिन्नित्यादिना मंत्रार्थयोस्तभेदो प्रतिभातीत्याशंक्याह।
तत्रेति। पयसि हीति। ब्रालणे हिशब्दस्य प्रसिद्धत्वं द्योतकत्वमस्ति तेन च हेतुना हिशब्देन तस्मि
न्नित्यादिमंत्रपदं व्याख्यातमिति योजना। मंत्रार्थस्य लोकप्रसिद्धाभावात् न प्रसिद्धवद्योति
ना हिशब्देन व्याख्यानं युक्तमिति चेत् कृते कथमिति। कार्यकारणे प्रातिष्ठितमिति न्यायेन वैदि
कीं प्रसिद्धिमादाय तस्माधत्ते कारणत्वेति। पयसो द्रवद्रव्यमात्रस्य कुतः सर्वजगत्कारणत्व
मित्याशंक्याह कारणत्वं चेति। तत्समवायित्वेपि कुतो जगत्कारणतेत्याशंक्याह। अग्निहोत्रादी
ति। ते वा एते आहुती हुते उत्क्रामतस्तेंतरिक्षमाविशात। इत्यादयः श्रुतिवादाः द्युपर्जन्य
त्रीह्यादिक्रमेणाऽग्निहोत्राहुत्योर्गर्भाकारप्राप्तिं दर्शयंति। अग्नौ प्रास्ताहुतिः सम्यगादित्यमु
पतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादयः स्मृतिवादाः। पयसि हीत्यादि

क्षालयामुपसंहरत्यत इति। पथ सः सर्वजगदाधारत्वस्य श्रुतिस्मृतिप्रसिद्धत्वादिति यावत्। स
र्वं पयस्मि प्रतिष्ठितमिति विधित्सितदर्शनस्तुतयेऽग्गख्यातरीयमत्तं निदितुमुपक्रमयति यत्त
दिति। न केवलेन कर्मणा मृत्युं जयति किंतु दर्शनसहितेनेति दर्शयितुमग्निहोत्राहुतिषु सं
ख्यां कथयति संवत्सरेणेति। उक्ताहुतिसंख्यायां संवत्सरावच्छिन्नायामग्निहोत्रविदां संप्र
तिपत्त्यर्थं किलेत्युक्तं। ननु प्रत्यहं सायंप्रातश्चेत्याहुती द्वे विधीयेते तत्कथमाहुतीनां षष्ठ्यधिका
नि त्रीणि शतानि संवत्सरेणापद्यंत इति तत्राह सत्यं चेति। प्रत्येकमहोरात्रावच्छिन्नाहुतिप्रयोगा
णामेकमहोत्रावच्छिन्नाहुतिप्रयोगाणामेकस्मिन् संवत्सरे सर्वैक्ता संख्यां तत्रैव प्रयोगा
र्णानां विंशत्यधिकासप्तशतरूपा संख्येति सिद्धमित्यर्थः। आहुतीनां संख्यामुक्त्वा तासु
याजुष्मतीनामिष्टकानां दृष्टिमाह। याजुष्मतीरिति। तासामपि षष्ठ्यधिकानि संख्ययाप्न
वंति तथा च प्रत्यहमाहुतीरपि निष्पद्यमानाः संख्यासामान्येन याजुष्मतीरिष्टकाश्चिंत १३५

येदित्यर्थः। आहुतीमयीनामिष्टकानां संवत्सरांवयवानां संवत्सरावयवाहोरात्रेषु संख्या
सामान्येनैव दृष्टिमन्वाचष्टे संवत्सरस्येति। तान्यपि षष्ट्यधिकानि त्रीणि शतानि प्रसिद्धा
नि तथा च तेषु यथोक्ते। ष्टिष्टकादृष्टिः क्लिप्तेत्यर्थः चितेर्यो संवत्सरात्मप्रजापतिदृष्टिमाह
संवत्सरमिति। यः संवत्सरं प्रजापतिस्तां चिं समाग्निविद्वांसः संपादयंति अहोरात्रे एका
धारात योः संख्यासाम्यादित्यर्थः दृष्टिमनूद्य फलं दर्शयतेवमिति। उक्त संख्यासामान्ये
नाग्निहोत्राहुतीरग्न्यवयवभूततयानुष्मतीसंज्ञकेष्टाः संपाद्य तद्रूपेणाहुतीर्ध्यायन्नाहु
तिमयीश्चेष्टकाः संवत्सरावयवाहोरात्राणि तेनैव संपाद्य पुरुषनाडीस्थ संख्यासामान्ये
न तन्नाडीस्तान्येवाहोरात्राण्यापाद्य तद्रूपेणाहुतीरिष्टकानाडीश्चानुसंदधानो नाड्यहो
रात्रयानुष्मतीद्वारा पुरुषसंवत्सरचितानां समन्वमोयेपाद्याहमग्निः संवत्सरा
त्माप्रजापतिरेवेति ध्यायन्नाग्निहोत्रं य यसौ संवत्सरं जुह्वन्नविद्ययासद्दि तहोमवन्नाग

बृ·अ·३

त्प्रजापतिं संवत्सरात्मकं प्राप्य मृत्युमपजयतीत्यर्थः। एकीयमतमुपसंहृत्य तन्निंदापूर्व
कं मतांतरमाहेत्येवमादिना। एवंविद्वानित्यर्कमग्नीकरोति। यदुक्तमिति। तत्रार्थैवविदानेका
होरात्राविछिन्नाहुतिमात्रेण जगद्रूपं प्रजापतिं प्राप्य मृत्युमपजयतीत्याह। तदेकेनेति। उक्ते
र्थे श्रुतिमवतार्यमभ्यष्टे तदुच्यत इति। सर्वं ह्यात्मादिहेतुवाक्यमाकांक्षापूर्वकमुत्थाप्य व्याकरो
ति कः पुनरित्यादिना। यथोक्तदर्शनवतामेकयैवाहुत्या मृत्युमपजयतीत्यत्र ब्राह्मणांत
रसंवादयत्यथेति। यथा संवत्सरमित्यर्कं तथायद्दहरेवेत्याद्यपि ब्राह्मणांतरेस्त्वित
मित्यर्थः। ब्रह्म हिरण्यगर्भस्तावी जीवः स्वयं कुपरस्मैबलदात्मनावस्थानात्। तपोत
प्यत कर्मान्वतिष्ठत्। यत्कृतकं तदनित्यमितिन्यायेन कर्मनिं --- माह तदैक्षतेति। कर्मस
हायकृतामुपासनामुपदिशति हंतेति। उपासनामनूद्य समुच्चयफलं कथयति। तत्सर्वेविति। १३९
श्रैष्ठ्येपि राजकुमारवदस्वातंत्र्यमाशंक्याह स्वाराज्यमिति। अधिष्ठाय पालयितृत्वमाधिपत्यं।

पश्वन्ने व्याख्याते प्रश्नरूपं मंत्रपदमादत्ते कस्मादिति। ननु चत्वार्यन्नानि व्याख्यातानि त्रीण्येव व्या
चिख्यासितानीति घ आख्यातेषु कस्मादित्यादिप्रश्नो कस्मादित्यन्तं कर्मसाधनेष्वन्नेषु साध्या
नामपि तेषामयातुकृतत्वमस्तीति अभिप्रेत्य प्रश्नं वृथेति मन्वानो व्याचष्टे यदेति। सर्वदेत्यस्य
व्याख्यानैरंतर्येणेति। अन्नानां सदा भोक्तृभिरद्यमानत्वे हेतुमाह तन्निमित्तत्वादिति। भोक्तृणां
स्थितेरन्ननिमित्तत्वात्तैः सदाद्यमानानि यवपूर्णकुसूलवत् प्रभवंति क्षीणानीत्यर्थः। किंच ज्ञानक
र्मफलत्वादन्नानां यत्कृतकं तदनित्यमिति न्यायेन क्षयः संभवतीत्याह कृतेति। अस्तु तर्हि
तेषां क्षयो नेत्याह नचेति। भवतु तर्हि स्वभावादेव प्राप्तान्नात्मकस्य जगतोऽक्षीणत्वं नेत्या
ह भवितव्यं चेति। स्वभाववादस्यातिप्रसंगित्वादित्यर्थः। प्रश्नं निगमयति तस्मादिति। प्र
तिवचनमादाय व्याचष्टे तस्येत्यादिना। तेषां पितृत्वे हेतुमाह मेधयेति। भोगकालेऽपि वि
च्छित प्रातिस्विदृशान्नकर्मसंभवात्प्रवाहरूपेणान्नाक्षयः संभवतीत्यर्थः। तत्र प्रतिज्ञाभा

गमुपादायास्तरापि व्याचष्टे तदेतदिति। हेतुप्रागमुत्पाद्य विपद्यते कथमित्यादिना। तस्मा
त्तदस्य यः संभवति प्रवाहात्मेतेति चोद्यः। उक्तं हेतुव्यतिरेकदूषणोपपादयितुं यद्वैतदित्या
दिवा संतत्याचष्टे यदिति। अन्वयव्यतिरेकसिद्धहेतुं निगमयति तस्मादिति तथा यथा
प्रसक्तमिति पठितव्यं। साध्यं निगमयति। तस्मादिति। अन्वयहेतोः सिद्धफलितमाह त
स्मात् भुज्यमानानामिति। धियेत्यादिस्मृतेः सहोद्गमित्यत्रोक्तं परिहारं प्रपंचयंस्ताः सत्सवि
घ्नानस्य कार्यत्वात्तात्क्षणं ध्वंसितेपि पुनः पुनः क्रियमाणत्वात् प्रवाहात्मना तदच
लं मंदाः पश्यंतीत्यस्मिन्नर्थे तात्पर्यमाहात इति। प्रज्ञाक्रियाभ्यां हेतुभ्यां लक्ष्यंते व्या
वर्त्यते निष्पाद्यते यः प्रबंधः समुदायस्तदारूढस्तदात्मकः स वै लोकश्चेतनाचेतना
त्मको द्वैतप्रपंचः साध्यत्वेन साधनत्वेन च वर्तमानो ज्ञानकर्मफलभूतः क्षणिको
पि स्थिरवल्लक्ष्यते तत्र हेतुः संहतेति संहतानां मिथः सहायत्वेनास्थितानामनेकेषां प्रा २३७

णिनामनंतानि कर्माणानि वासनाश्च तत्संतानैर्नावस्थ— त्वाद्दृढीकृतत्वादिति यावत्। प्र
तीतिकर्मेव संसारस्य स्थैर्यं न तात्त्विकमिति वक्तुं विशिनष्टि नश्वरेति। असारोऽपि सारवत्प्र
तीत्यत्र दृष्टांतमाह कदलीति। अस्फुटोऽपि स्फुटवत्प्रतीत्यत्रोदाहरणमाह मायेत्यादि। अने
कोदाहरणं संसारस्यानेकरूपत्वद्योतनार्थं। केषां पुनरेष संसारोऽन्यथाभातीत्यपेक्षायां
संसाराय पराकुदशामितित्यपेक्षाये नाह तदात्मेति। क्षिमिति प्रतिक्षणध्वंसि जगदिति स्फु
पयु २ त्योच्यते तत्राह तदिति। वैराग्यमपि कुत्रोज्यते तत्राह विरक्तानां हीति। इति वैराग्यमर्थवद
ति शेषः। पुरुषोऽज्ञानामस्य हेतुरित्युपपाद्य तत् ज्ञानमनूद्य तत्फलमाह यो वै तामित्या
दिना। यथोक्तमनुवदति पुरुषरलि। फलविषयं मंत्रपदमुपादाय तद्वीर्यं ब्राह्मणमवता
र्यं व्याकरोति। सोऽन्नमित्यादिना यथोक्तोपासनवतो यथोक्तं फलमुपास्ते प्राधान्येनैव सोऽन्न
मत्तीति संबंधः। विदुषोऽन्नप्रतिग्रहणलाभावे हेतुमाहान्नानामिति। उक्तमर्थं प्रतिगृह्णाति

स्व॰ आ॰ ३ णोक्तैवेति। प्रत्यासत्तिसिद्धये प्रपंचयति सदेवानित्यादिना। साधनात्मकमन्नच तुष्टयमन्नाक्षा

यकारणमस्तीति॥ त्वगुणमस्थापेयपानुरूपोपासनस्य फलं चोक्तं इदानीं आब्रात्मपासमाप्ते

रुत्तरस्य ग्रंथस्य तात्पर्यमाह। पांस्कस्येत्यादिना॥ ब्रालपात्री घस्य तात्पर्यमुक्त्वा मंत्र १८ मनत्या

कांक्षाद्वारा ब्रात्मपामुत्याप्पव्याचष्टे त्रीणीत्यादिना ज्ञानकर्मण्यां समानत्वानि स्तुत्या च तारि

५ मिता णोकल्प्यो विज्यपत्ते त्रीण्यात्मार्थं कल्पादौ कल्पितवानित्यर्थः। अन्यत्रेत्यादि वाक्यमुपादत्ते तेषा

मिति षष्ठी निर्धारणार्था। तत्र मनसोऽस्तित्वमादौ साधयत्यास्तितावदिति आत्मेंद्रियार्थसान्नि

ध्ये सत्यपि कदाचिदेवार्थधीर्जायमाना हेत्वंतरमाक्षिपति न चादृष्टादीत्यादि तदिति युक्तं तस्य १२८

दृष्टसंवादित्वात्तस्मादर्थादिसान्निध्ये ज्ञानकादाचित्कत्वानुपपत्तिर्मनसो साधिके त्य

र्थः। लोकप्रसिद्धिरपि तत्र प्रमाणमित्याह यतरति। अतो। स्तिवात्मकरणाद्यतीं विषयग्राहि रिकं२

करणमिति शेषः। तामेव प्रसिद्धिमुदाहरणमिषु तयोराहरति किंद्दृष्टवानित्यादिना। तत्रे

वान्वयव्यतिरेकावुपन्यस्यति तस्मादिति। यथोक्तार्थापत्तिलोकप्रसिद्धिवशादिति यावत्। त्विमतमात्मव्यतिरिक्तसौयेसं तस्मिन्नस्त्यपि कादाचित्कत्वात् घटवत् इत्यनुमानं त[illegible]दर्थः। तस्मादित्यनुमानादिमानान्तरहन्यदस्ति मनोनामेति संबंधः। रूपादिग्रहणासमर्थस्यापि सत इति प्रमालोच्यते। अंतःकरणस्य चक्षुरादिभ्यो वैलक्षण्यमाह सर्वेति। समनंतरवाक्यं फलितार्थविषयत्वेनादत्ते तस्मादिति। तच्छब्देनोक्तं हेतुं स्पष्टयति तद्ग्रग्रत्व इति। कामादिवाक्यमवतार्य व्याकुर्वन्मनसः स्वरूपं प्रति संशयं निरस्यत्यस्तित्व इति। अश्रद्धादिवत् कामादिरपि विवक्षितो नेति मत्वा मनोबुद्ध्योरेकत्वमुपेत्योपसंहरतीत्येतदिति। द्वैतप्रत्कन्मुरवंमनो पोक्तकर्मवशान्नानार्थाकारेण विवर्तीतेरत्वक्षिप्रेस्यानंतरवाक्यमवतारयति मनोस्तित्वमिति तद्विवान्यत्कारणं स्फोरयति यस्मादिति। तस्मादस्ति विवेककारणमंतःकरणमिति संबंधः। चक्षुरसंयोगात् तेन स्पर्शविशेषा

273

रिदर्शनमिव संप्रयुक्तया त्वचादिनापि मनो विशेषदर्शनं स्यादित्याशंक्याह यदीति । त्वस्या
त्रस्य ग्राहित्वेन विवेचकत्वायोगादित्यर्थः । विवेचके करणांतरे सत्यपि कुतो मनःसिद्धि
स्तत्राह यस्मादिति दृष्टं कार्यं यस्य स्तिता॥ वदिति । उत्तरग्रंथमवतारयितुं भूमिकां करोति
त्रीणीति । एवं भूमिकामारचय्य आध्यात्मिकवाग्व्यारख्यानार्थं यः कश्चित्स्यादिवाक्यमा
दाय व्याकरोत्यथेत्यादिना । शब्दपर्यायो ध्वनिर्द्विविधो वर्णात्मको वर्णात्मकश्च तत्रा
द्योऽव्यवहर्त्तृकंठताल्वादिस्थानसंयोगो द्वितीयो मेघादिकृतः स सर्वोपि प्रकृता वागेवे
त्यर्थः । प्रकाशात्मकमात्रं वागित्युक्तं तत्र प्रमाणमाहेदं तावदिति । तस्मादभिधेयनि
र्णायकत्वान्नासावपलापार्हेति शेषः । वाचोपि प्रकाशात्मत्वात्स्वरूपं प्रकाशकमात्रं
वागित्युक्तमित्याशंक्याहैवेति । दृष्टांतं समर्थयते नहीति । प्रकाशांतरेण सजातीये ३१
नेति शेषः । प्रकाशापि वाक् प्रकाशरूपा चेत्तत्रापि प्रकाशांतरमेष्यमित्यनवस्थां स्यात्

निरासार्थमेषामिति श्रुतिः प्रकाशमात्रं वागित्याह स्वपरनिर्वाहकत्वशब्दस्तस्मात्स्वप्रका
शकत्वेकार्यं यत्र दृश्यते तत्र वाचः स्वरूपमनुगतमेवेत्याह लद्धदित्यादिना। आध्यात्मिक
प्राणविषयं वाक्यमवतार्य व्याकरोत्यथेति। मुखादौ संचारणार्थं हृदयसंबंधिनीया
वायुवृत्तिस्तत्र प्राणशब्दप्रवृत्तौ निमित्तमाह प्रणयनादिति। पुरतो निःसरणादिति याव
त्। हृदयादधो देशे वृत्तिरस्येत्यधोवृत्तिरानाभिस्थानो हृदयादारभ्य नाभिपर्यंतं वर्तमा
न इति यावत्। व्यायच्छन्तं प्राणापानयोर्नियमनं कर्मास्येति तथोक्तः। वीर्यवत्कर्मारण्याम
ग्न्युत्पादनादि। उत्क्रमणो देहे पुष्टिः आदिपदेनोक्तंतिरुक्ता। प्राणशब्देनानशब्दस्य पुनरुक्ति
माशंक्याह त इत्येषामिति। तथापि तृतीयस्य प्राणशब्दस्य तात्पर्यं पुनरुक्तिरित्याशंक्या
ह प्राण इतीति। साधारणासाधारणवृत्तिमान् प्राण इत्यपौनरुक्त्यमित्यर्थः। मनसो
दर्शनादिवत् वाचोऽपि ध्येयप्रकाशनवत् प्राणस्यापि कार्यं वक्तव्यमित्याशंक्याह कर्मे चेति।

275

बृ॰ आ॰ ३

एतन्मयइत्यत्र मयटो विकारार्थत्वं वृत्तसंकीर्तनपूर्वकं कथयति व्याख्यातानीति। आध्यात्मि-
कानां वागादीनामनारंभकत्वं कारयति प्राजापत्यैरिति। आरब्धस्वरूपं प्रश्नपूर्वकमनंत-
रवाक्येन निरूपयति कोऽसाविति। कार्यकरणसंघाते कथमात्मशब्दप्रवृत्तिरित्याशंक्या-
हात्मस्वरूपेणेति। वाङ्मयइत्यादिवाक्यस्य पूर्वेण पौनरुक्त्यमाशंक्याह विशेषेणेति।
वागादीनामाध्यात्मिकविभूतिप्रदर्शनानंतरमाधिभौतिकविभूतिप्रदर्शनार्थमुत्तरग्रं-
थमवतारयति तेषामेवेति। तत्रैकरूपं सामान्यं परामृशति। त्रिलोकीवाक्यवदुत्तरं
वाक्यं विज्ञातादिवाक्यात्प्राक्तनं नेतव्यमित्याह तथेति। विज्ञातादिवाक्यमादाय तद्गतं
विशेषं दर्शयति विज्ञातमिति। विज्ञातं सर्वं वाचो रूपमिति प्रज्ञातोऽर्थः स प्रमेयार्थः। प्रका-
शकत्वेऽपि कथं वाचो विज्ञातत्वमित्याशंक्याह कथमिति प्रकाशात्मकत्वमेव कुतो वा-
चः सिद्धमित्याह वाचेति। वाग्विशेषस्तद्विभक्तिः संदिह्यमानाकारत्वात्संकल्पविकल्पात्म

१८

कृत्वादिति यावत् तस्मात्सर्वं जिज्ञास्यं मनोरूपमिति संबंधः सर्ववत् । वाग्विभूतिविदो य-
था फलमुक्तं तद्वदिति यावत् । अनिरुक्तश्रुतेरविज्ञातरूपो यस्मात्प्राणस्तस्मादविज्ञातं
सर्वं प्राणस्वरूपमिति योजना विज्ञातादिरूपातिरेकेण लोके वेदाद्यभावादिरूपत्वा-
भिधाने नैव वागादीनां लोकाद्यात्मत्वे सिद्धे किमर्थं त्रयो लोका इत्यादिवाक्यमित्याशंक्य त-
द्वक्ष्यमाणार्थमित्याह विज्ञातेति । भूरादिष्वेकैकत्र विज्ञातादित्रयदृष्टेर्वागादिष्वप्यवस्थि-
तत्वात्तदुक्तौ विज्ञातादेर्वागाद्यात्मत्वं नियंतुं शक्यमित्याशंक्याह सर्वत्रेति । प्राणविभू-
तिविदः संप्रति फलं कथयति प्राण इति । लोके विज्ञातस्यैव भोज्यत्वोपलंभादविज्ञातादि-
रूपेण प्राणादेर्न भोज्यत्वोपपत्तिरित्याशंक्याह शिष्येति । शिष्यैरविवेकिभिः संदि-
ह्यमानोऽप कराअस्पिशुस्वस्तेषां भोज्यतामापाद्यमानाद्दृश्यंते पुत्रादिभिश्चाति-
बालैरविज्ञातोऽप कारागपित्रादयस्तेषां भोज्यत्वमापद्यंते तथा प्रकृतेऽपि संभवतीत्यर्थः ।

रुतं मनस्यपां तस्यै वाचः पृथिवीत्याद्यवतारयति व्याख्यातमिति। आधिदैविकार्थस्त
स्येति प्रदर्शनार्थमिति यावत्। समनन्तरसंदर्शस्य तात्पर्यमुक्त्वाक्षराणि योजयति
तस्यादीति। कथमाधाराधेयभावो वाचो निर्दिश्यते तत्राह विरूपे हीति। उक्तमर्थं सं
क्षिप्य। निगमयति तदुभयमिति। अध्यात्ममधिभूतं च यावाक्परिच्छिन्ना तस्यास्तु
ल्यपरिमाणत्वमाधिदैविकवागंशत्वादंशांशिनोश्च तादात्म्यात्तया सह दर्शयति त
त्रेति। तावानयमग्निरिति प्रतीकमादाय व्याकरोत्याधेय इति। समानमुत्तरमित्यस्या
यमर्थः। अध्यात्ममधिकृतं च मनःप्राणयोराधिदैविकमनःप्राणांशत्वात्तादात्म्या
त्प्रायेण तुल्यपरिमाणत्वमुच्यते तथा च वाचा समानं प्राणादावुत्तरवाक्ये क
थ्यमानं समानपरिमाणत्वमिति। आधिदैविकवाग्निवत्तिति व्याख्यानानन्तर्यमथ
शब्दार्थः। मनसो द्वैरूप्यमुक्त्वा व्याप्तिमभिधत्ते तत्रेति। मन एवास्यात्मा वाग्जाया प्राणः

प्रजारलध्यात्मं मन एव पिता वाङ्माता प्राणः प्रजेत्यधिभूतं च वाङ्मनसयोः प्राणस्य प्रजात्व
मुक्तं तथाधिदैवेपि तस्य तत्प्रजात्वं वाच्यमित्यभिप्रेत्याह हताविति कथमादित्यस्य मनस्त्वं
प्राणं प्रति पितृत्वं कथं वाग्नेर्मातृत्वं तत्राह मनसेति। सावित्रं पाकमाग्नेयं च प्रकृत्यामते
कार्यसिद्धदर्शनात्तयोः सिद्धं जनकत्वमित्यर्थः कूर्मश्राद्धेन कार्यमुच्यते। तत्करिष्यामी
तिप्रसेकमपि संधिपूर्वकमादित्याग्न्योर्द्यावापृथिव्योरंतरा संगतिरासीदित्याकेहमे
ति। संगतिकार्यमपि प्रायानुसारि दर्शयति तत इति नायोरिंद्रत्वासंपन्नात्वगु
णविशिष्टस्योपासनमभिप्रेत्याह योजात इति॥ द्वितीयास्यसंपन्नात्वे वागादेरपि
तथात्वं स्यादित्याशंक्याह प्रतिपक्षत्वेनेति यथोक्तसंपन्नव्याख्यानफलमाह तेनेति।
असपत्नगुणकप्राणोपासने फलवाक्यं प्रमाणयति तन्नेति। प्राणस्यासंपन्नत्वे सिद्धे
सतीति यावत् प्रासंगिकत्वं प्रजोत्पत्तिप्रसंगादागतत्वं आधिदैविकयोर्वाङ्मनसयोर्वि

बृ॰आ॰१ म्लानिर्देवतानां तर्यमध्ये स्फुक्तं नन्वेतस्मै त्येत तच्छब्देन प्रजालेनोक्तस्य प्राणस्य क्विमिति न ग्रह
णं तत्राह नमजेति। अनन्तरमुक्तस्य समप्रधानत्वेन प्रकृतत्वादेतच्छब्देन प्रधानपरामर्शो
पपत्तेर्नाप्रधानं परामर्श इत्येतेत्यर्थः। सर्ववद्वाचो मनसश्च पृथिवी द्यौश्च शरीरं यथा त
थेत्यर्थः। दैवरूपे प्राणस्योक्ते व्याप्तिमवशिष्टमाचष्टे तत्रेति। तावानित्यादिप्रतीकमा
दाय व्याचष्टे चन्द्र इति। वाङ्मनःप्राणानामाधिदैविकरूपेणोपासनं विधातुं वृत्तं की
र्तयति तानीति एतेभ्योऽतिरिक्तमधिष्ठानमस्ति तासां क्व विनिविष्टि कार्यात्मकमिति। प्र
जापतिरेतेभ्योऽतिरिक्तोऽस्तीत्याशङ्क्याह समस्तानीति सोमस्करं वृत्तमनूद्य वाक्यमा
दाय व्याचष्टे त एत इति तुल्यां व्याप्तिमेवस्मुनक्रियावदिति। तावदशेषं जगद्व्याप्येति।
योजना। तुल्यव्याप्तिमत्त्वमुपजीव्याह त एवेति तेषां यावत्संसारभावित्वमपि व्यन १८२
क्ति नहीति। कार्यकारणयोर्यावत्संसारभावित्वेति प्राणानां किमायतनमाह कार्येति।

तेषु परिच्छिन्नत्वेन ध्याने दोषमाह स य इति। एवंपातनिंदां कृत्वा विवक्षितमुपासनमुप
दिशासथेति। अत्रत्रये फलवद्ध्यानविषये व्याख्याते वक्तव्याभावात्किमुत्तरग्रंथेनेत्या
शंक्याह रोकीर्तयति पितेति। तेषां तत्फलत्वे प्रमाणाभावमादाय शंकते तन्नेति। प्रति
श्रुतं व्याख्यानं सप्तम्यर्थः। कार्यलिंगकमनुमानं प्रमाणयन्नुत्तरमाहेव्य तइति। अनु
मानमेव स्फुरयितुमन्नेषु पांक्तत्वावर्तिं दर्शयति यस्मादिति तस्मात्कारणमपि तादृ
गिति शेषः। कथं पुनस्तत्र पांक्तत्वधीरित्याशंक्याह वित्तेति। आत्माजायाप्रजेति संग्र
हीतुमपि शब्दः। उक्तेहेतुं व्यक्तीकुर्वन्नुक्तं स्मारयति तन्नेति। अत्रत्रय सप्तम्यर्थः। तथा
पि कृथं पांक्तत्वमित्याशंक्यानंतरग्रंथमवतारयति तत्र वित्तेति। सप्तमीपूर्ववत्। अ
वतारितं ग्रंथं व्याचष्टे योयमित्यादिना। कथं प्रजापतेस्त्रिविधित्तिरादृर्यमाणत्वमपसी
ध्यामायात्वं च तत्राह प्रतिपद्यद्याकीरिति। इदंमर्यादां दर्शयति। यावदिति। अपक्षयस

281

मर्यादामाह यावत् ध्रुवेति। अवशिष्टममावास्यां निविष्टां कलां प्रपंचयन् द्वितीयकलोत्प
त्तिः शुक्लप्रतिपदि दर्शयाति स प्रजापतिरिति। प्राणिजातमेव विशिनष्टि यदपरतिस्थावरं
जंगमं चेत्यर्थः। ओषध्यात्मनेत्युपलक्षणं जलात्मनेत्यपि द्रष्टव्यं फलत्वते प्रजापतौ पां
क्तत्वं च स्फुमुपक्रांतं तदद्यापि नोक्तमित्याशंक्याहैवमिति। तदेव पांक्तत्वं व्यनक्ति द्वे वेति।
कलानां वित्तवद्धितत्वे हेतुमाहोपचये चेति। पांक्तत्वनिर्देशेन लब्धमर्थमाहैवमेवेति॥
संप्रति प्रकृतस्य प्रजापतेरुपक्रमानुसारित्वं दर्शयति जायेति। भवतु प्रजापतेरुक्तनीत्या
पांक्तत्वं तथापि कथं पांक्तकर्मफलत्वं तत्राह कारपोति। पं पांक्तकर्मफलत्वं प्रजापतेरु
क्तप्रासंगिकमर्थमाह यस्मादिति। अपि कृकलासस्येति। कुतो विशेषोक्तिरित्याशंक्याह
कृकलासोपि हीति। कुतस्तस्य पापात्मत्वं प्रजापतेस्तत्राह दृष्टोपीति। विशेषनिषेध
स्य दोषानुतापरत्वात् विरोधः सामान्यशास्त्रेण स्यादिति शंकते नन्विति तीर्थशब्दः शास्त्र

विहितप्रदेशाविषयः साधारण्येन सर्वत्र निषिद्धापि हिंसा विशेषतो मावास्यायां निषिध्यमाना सोमदेवताप्रजार्थान्ततः शेषानुज्ञाप्नावास्ततस्मान्न्योक्तिविरोधोस्तीति परिहरति। बाढमिति। यत्त्वर्वमाधिदैविकस्य नात्मकप्रजापत्युपासनमुक्तं तदहमस्मि प्रजापतिरित्यहंग्रहेण कर्तव्यमित्याह योवारिति। प्रस समुपलभ्यमानं प्रजापतिं प्रश्नद्वारा प्रकटयति। कोसाविति। तस्य प्रजापतित्वमप्रसिद्धमित्याशंक्य परिहरति केनेत्यादिना। कलानां जगद्विपरिणाममनुत्वं कर्मेत्येकं विशेषिकर्महेतुत्वमस्तीति तेन तत्र कलानां वृद्धिप्रवृत्तिरुच्यते साहत्रिकेति। यथा चंद्रमाः कलाभिः शुक्लकृष्णपक्षयोरापूर्यते पक्षीयते च तथा सविद्वान्वित्तेनोपचीयमानेनापूर्यतेऽपचीयमानेन चापक्षीयते। एतच्च लोके प्रसिद्धत्वान्न प्रतिपादनसापेक्षमित्याह स चंद्रवदिति। आत्मैव धकवा कालेस्फुकं नदेवरथचक्रदृष्टांतेन स्पष्टयति तदेतदिति। नाभिश्चक्रपिंडिका तत्स्थानीयं वा नभ्यं तदेव प्रश्न

बृ-आ-२ द्वारा स्फोरयतीति किंतदिति। शरीरस्य चक्रपिंडिकास्थानीयत्वं मयुक्तं परिवारादर्शनादित्याशंक्या
ह प्रधिरिति। शरीरस्य रथचक्रपिंडिकास्थानीयत्वे फलितमाह तस्मादिति पदार्थमुक्त्वा
वाक्यार्थमाह जीवंश्चेति। अत्र त्रयाणामपि प्रजापतावहंग्रहोपासनस्य सफलस्योक्तत्वा
दुक्तव्याभावादुत्तरग्रंथवैयर्थ्यमित्याशंक्य तद्विषयं वक्तुं वृत्तमनुवदत्येवमिति। सा
धनोक्त्यैव फलमुक्तं तयोर्मिथो बद्धत्वात् प्राजापत्यं च फलं प्रागेव प्रदर्शितं तत्किमुत्तर प्रा ५
ग्रंथेनेत्याशंक्य सामान्येन तत्प्रतीतावपि इदमस्येति विशेषानोक्तिं विनेत्यतस्तदुक्त्यर्थ
मुत्तरा श्रुतिरित्याह तत्रेति। एवंग्रंथः सप्तम्यर्थः। नियमोनावगत इति संबंधः। उपन्यासः
प्रारंभः। नावत्राबद्धस्यावधारणरूपमर्थं विवृणोति त्रय एवेति। तदेतल्लोकत्रयं प्रश्नद्वा
रा स्फोरयति केत इत्यादिना॥ जयो नाम पुत्रेण मनुष्यलोकस्याप्तिक्रमः इति केचित्ता १४
न्नलाह साध्य इति। पुत्रेणास्य साध्यत्वमसिद्धमित्याशंक्याह यथाचेति द्विविधो हि मनुष्य

ल्लोकजयः कर्त्तमिशेषानुष्ठानं भोगश्चेत्तत्राद्यमाश्रित्यान्ययोगव्यवच्छेदमेव कार्यार्थं दर्शय
त्ति नान्येनेति द्वितीये त्वयोगव्यवच्छेदस्तरथेऽप्योतिषेमं लोकं जयतीति साधनांतरेणा
पि मनुष्यलोकजयश्रुतेरिति भावः। सर्ववाक्यस्थमेव द्वारमुत्तरवाक्ययोरनुषक्त
मुपेत्य वाक्यद्वयं व्याचष्टे कर्मणेत्यादिना। साधनद्वयापेक्षया फलद्वारकमुत्कर्षं
विद्यायां दर्शयति देवलोक इति द्वारमनुवरलेबुम्भिति। पुत्रादिवज्जायाविनियोगस्यापि
प्रकृतत्वात्फलविशेषे विनियोगो वक्तव्य इत्याशंक्याह जायायास्त्विति। न पृथक्कर्मपुत्र
भ्यामिति विशेषः। न पृथक्साधनं कर्मणः सकाशादिति द्रष्टव्यं। भवत्वेवं साधनत्रय
नियमस्तथापि विद्याकर्मणी हित्वा समनंतरग्रंथे किमिति पुत्रनिरूपणमित्याशं
क्याह विद्याकर्मणोरिति। यथोक्तेचोद्ये पुत्रस्य लोकहेतुत्वज्ञापनार्थं संप्रत्तिवाक्यमि
त्याहातरिति। अथातरिति पदद्वयं व्याख्याय संप्रतिपदं व्याचष्टे संप्रत्तिरिति। किमिदं

285

संप्रदानं नाम तदाह संप्रत्तिरितीति तदेव कर्म विशदयति पुत्रेहीति। अनेन प्रकारेणेति वक्ष्यमाणप्रकारो। किंः आरिष्टादित्यादिपदेन दुःखस्वप्नादिसंग्रहः। प्रत्याह वाक्यत्रयमिति सर्वं धः पुत्रस्याहं ब्रह्मेत्यादिप्रतिवचने हेतुमाह सत्वेति। मयाकार्थयदध्ययनादि तदेवावशिष्टं त्वया कार्यमिति पुत्रस्य प्रागनुशिष्टत्वाभावे प्रतिवचनानुपपत्तिरित्यर्थः। यद्वै किंचेत्यादिवाक्यानां पुत्रानुमंत्रणवाक्यैरर्थभेदाभावात्पुनरुक्तिरित्याशंक्याह तस्येति। यद्वै किंचेत्यादिवाक्यैर्वाक्यार्थमाह योऽध्ययनेति। ब्राह्मणार्थं संगृह्णाति मत्कर्तृका इति त्वं लोक इत्यस्य व्याख्यानं ये वै के चेत्यादि। तत्र पदार्थानुक्त्वा वाक्यार्थमाह त्वं ब्रह्मेति। वाक्यवत्त्वं यज्ञ इति वाक्यमपि व्याख्यातुमित्याह तथेति तरति।। किमिति तत्कर्तृकमध्ययनादिमपि समर्प्यते त्वयैव किं नानुष्ठीयते तत्राह तदूर्ध्वमिति। कर्तव्यतैव बंधनं तद्विषयः क्रतुः संकल्पस्तस्मादिति या

२५

वत्सपुत्रस्त्वादेस्तात्पर्यमाह स चेति। तत्रेति यथोक्तानुशासनोक्तिः एतत्सर्वमित्यादि म
तीकमादायव्याचष्टे सर्वं हीति। अनघलनेक्तार्थविहितस्य लक्ष्णेभावेष्पदर्थत्वं कथमि
त्याशंक्याह छंदसीति। पुत्रानुशासनस्य फलवत्त्वमाह यस्मादित्यादिना। कृतसंप्रत्तिकः
स पिता किं करोतीति त्वपेक्षायामाह सोपितेति। कोयं प्रवेशो न हि विशिष्टस्य केवलवावि
त्वे सर्ववत्प्रवेशः संभवत्यत आह तेनेति। हेतुमिथ्याज्ञानादिः वागादिष्वाविष्टेष्वपि कुतो
र्थांतरस्य पितुरावेशाधीरित्याह। सर्वेषां हीति मृतस्य पितुरितो लोकाद्व्यावृत्तस्य कथं य
थोक्तरूपत्वमित्याशंक्याहैतदुक्तमिति पुत्ररूपेणात्रास्थितिमेव विभजते नैवेति। म
तोऽपि पितानुशिष्टपुत्रात्मनात्र वर्त्तते नात्रैस्मादर्पंतं व्यावृत्तः फलरूपेण च परत्रेति।
भावः उक्तेर्थे ऐतरेयश्रुतिं संवादयति तथा चेति षष्ठी प्रथमार्थ्यांचिता पुत्रानुच्यते
सयदीत्यादिवाक्यमवतार्य व्याकरोत्यथेत्यादिना। अकृतमस्तु तादितिच्छेदः। तस्मादिति

बृ·आ·२

प्रतीकमादाय व्याकरोति स्मरणेनेति। तदेव प्रपंचयतीदं तदिति। पुत्रवैशिष्ट्यं निगमयति स
लीति। पुत्रेणैतल्लोकजयमुपसंहरत्येवमिति। यथोक्तात्पुत्राद्विद्याकर्मणो विशेषमाह
तथेति। कथं तर्हि ताभ्यां पितालोकजय इति तत्राह स्वरूपेति। तदेव स्फुटयति। नहीति। अनु
शिष्टपुत्रेणैतल्लोकजायिनं पितरमधिकृत्याथैनमित्यादिवाक्यं तद्व्याकरोति अथे
ति। पुत्रप्रकरणविच्छेदार्थोऽथशब्दः। आवेशप्रकारबुभुत्सायामुत्तरवाक्यं प्रतिजा
नीते कथमित्यादिना। पृथिव्यै चेत्यादिवाक्यस्य व्यावसंपिण्डवृत्तानुवादपूर्वकमुत्थाप
यति एवमिति अत्रेति। वैदिकं निर्धारयितुं ससमी। बहुवदनमालितेहेतुः स्मृतस्वक्तेति।
मोक्षार्थतामप्याकरणश्रुतिस्मृतिभ्यां वदंतीति शेषः। मीमांसकपक्षं प्रकृतश्रुति
विरोधेन दूषयति तेषामिति। कथमित्याशंक्य श्रुतेरादिमध्यावसानालोचनया पुत्रादेः
संसारफलत्वावगमान्न मुक्तिफलतेत्याह जायेत्यादिना। पुत्रादीनां चेति चकारादेतावा

२५८

288

नैकाम इतिमध्यसंग्रहः। यदुक्तमृणापाकरणश्रुतिस्मृतिभ्यां पुत्रादेर्मुक्तिफलतेति तत्राह
तस्मादिति पुत्रादेः श्रुतं संसारफलत्वं परामृष्टं तच्छब्दः श्रुतिशब्दः स्मृतेरुपलक्षणार्थः।
श्रुतिस्मृत्योरविरक्तविषयत्वे वाक्यशेषमनुकूलयति वक्ष्यति चेति मीमांसकपक्षं नि
राकृत्य स्मार्त्तप्रपंचपक्षमुत्थापयति। केचित्त्विति। मनुष्यलोकजयस्ततो व्यावृत्तिर्यथेत्यपे
रर्थः। पुत्रादिसाधनाधीनतया लोकत्रयव्यावृत्तावपि कथं मोक्षः संपद्यते न हि पुत्रादीन्ये
व मुक्तिसाधनानि विरक्तत्वविरोधादित्याशंक्याह तस्मादिति दृष्टिव्ये चेत्यापैः। घोत्तरश्रु
तिरेव मीमांसकमतवत्स्मार्त्तप्रपंचमतमपि निराकरोतीति दूषयति तेषामिति कथं
सातन्मतं निराकृत्य करोलीसानां कथं श्रुतिं विशिनष्टि कृतेति। अन्यात्मोपासितुस्तदापि
वचनविरुद्धं परमतमित्ययुक्तं तदा तेरेव मुक्तित्वमित्याशंक्याह न चेति। तथापि कथं
यथोक्तं फलं मोक्षो न भवतीत्याह मेधेति। अनात्मनो ज्ञानकर्मजन्यत्वे हेतुमाह पुनः पुन

रिति। स्तत्रातेरविमुक्तित्वे हेत्वंतरमाह यद्वैतदिति। कार्यकरणवत्त्वकृतेरपि स्तत्रभावो न मुक्ति-
रित्याह शारीरमिति। अविद्याततुल्यद्वैतस्य आत्मकृतत्वेनोपसंहारात्तदात्मस्तत्रभावो बंधांत-
र्गतो न मुक्तिरिति युक्त्यंतरमाह अयमिति ननु अविरक्तस्याज्ञस्य स्तत्राप्तिः फलमपि क-
र्मादिविरक्तस्य विदुषो मुक्तिफलमिति व्यवस्थितिरित्याह न चेदमिति न हि पृथिव्यै चे-
त्यादिवाक्यस्यैकस्य सकृच्छ्रुतस्यानेकार्थत्वं प्रतिपद्यते हि तथा वाक्यमितिन्यायादित्यर्थः।
पृथिव्यै चेत्यादिवाक्यानां येन पक्षद्वयं प्रतिक्षिप्तं तदक्षराणि व्याचष्टे पृथिव्या इति।
अन्नमित्यन्नमन्नाद्याकारो येनेनमिति। कथं पुनः स्तत्रात्मफलावाग्गुपासकर्मा विराति
तत्राह सर्वेषामिति। तयोरभेदाद्विदुषोऽप्यव्याप्तिरेव वागिति विदुषि विशेषो नास्तीत्याशं-
क्याह साक्षादिति। द्वयोर्वाच्यदोषविगममुत्तरवाक्येन साधयति साक्षादेवेति। विद्वांश्च स्व-
रूपं संक्षिपत्यमेधेति। वाच्यदार्ढ्यंतिन्यायं मनस्यतिदिशति तथेति। यन्मनः स्वभाववि-

त्मत्वेन दैवमित्युक्तं तदेव विशिनष्टि येनेति। असाविति विद्वदुक्तिः। येन मनसा विद्वान्
शोचसपि तदैत्वभावात्तदैवमिति पूर्वेणास्य संबंधः। मनस्फलं स्यायं प्राप्नोति दिशाति ता
धेति। तमेव दैवं प्राणं प्रभ्रमपूर्वकं प्रकटयति सवारलिसवाइति स एवं विदित्वादि व्याचष्टे
सयइति। विदिरत्र लाभार्थः न केवलं यथोक्तमेवाविद्याफलं किंतु फलांतरमप्यस्ती
त्याह। कंचेति। सर्वभूतात्मत्वे तद्दोषयोगात्तस्याजाप संपदमनादेयमित्युत्तरवाक्यव्याव
र्तामानं कयाहायेति। सर्वप्राणि सुखदुःखेरिसस्माद्ध्वंसराब्दोऽध्याहर्तव्यः सर्वात्म
केविदुष्ये कैकभूतनिष्ठदोषयोगो नास्तीत्युत्तरमाह तत्रेति तदेव प्रपंचयति परिछि
न्नेति। अपरिछिन्नधीत्वेपि सूत्रात्मकेविदुषि सर्वभूतांतर्भावात्तत्तदुःखादियोगः
स्यादेवेत्याशंक्य जठरकुहरविपरिवर्तिकृमिदोषैरस्माकमसंसर्गवत्पूर्वतेपि सं
भवान्नैवमित्याभिप्रेत्याह मारणेति। नोपपद्यते विदुषो दुःखमिति पूर्वेणास्य संबंधः। दष्णं

291

बृ॰ आ॰ २

त्वं विवृणोति यथेति मैत्रस्य स्वहस्ताद्यभिमानवतस्तद्दुःखादिवियोगवद्विदुषः स्वात्म
नः स्वांशाध्यस्तसर्वफलाभिमानिनस्तद्दुःखादिसंसर्गः स्यादित्याशंक्य दार्ष्टांतिकमाह
तथेति। ममतावता हीत्यादिपदेनाहंताग्रहणं तद्वद्दुःखनिमित्तं मिथ्याज्ञानमादिश
ब्देन रागादिरुक्तः। उक्तेर्थे श्रुतिमवतार्य व्याचष्टे एतदेतदिति श्रुतमेवगच्छतीति संबंधः।
फलरूपेण वर्तमानस्य कथं कर्मसंबंधः स्यादित्याशंक्याह फलमिति उक्तमेव व्यन
क्ति निरतिशयमिति। अथेत्यादिवाक्यस्य वक्तव्यशेषाभावादानर्थक्यमाशंक्य
व्यवहितोपासनानुवादेन तदंगव्रतविधानार्थमुत्तरं वाक्यमित्यानर्थक्यं परिह
रति तस्य एतद् इत्यादिना॰ व्रतमित्यवरूपानुष्ठेयं कर्मोच्यते। जिज्ञासायाः फलमनः
शब्दार्थः उपासनोक्त्यानंतर्यमथशब्दार्थं कथयत्यनंतरमिति। विचारणामेवस्फा १५८
रयति एषामिति। प्रवृत्तायां मीमांसायां प्राप्ताव्रतमभिन्नत्वेन धारणीयमिति। निर्धार

णार्थमारब्धायिकां प्रणयतीति तन्नेत्यादिना। कथं वागादिषु करणेषु कर्मत्वाद्धप्रवृत्तिरित्याह।
कर्मीर्थानीति। तदीयस्य हेरूपयोगमुपदर्शयितुमस्मिकां करोतीति तानीति। स्पर्द्धाप्रकारं
प्रश्नपूर्वकं प्रकटयति कथमित्यादिना। यथा कर्मस्वीयं स्वीयं व्यापारमनुसरस व्रतं दधि
रे वागादीनां करणानीत्यर्थः। प्रजापतेर्वागादिषु श्रमद्वारा स्वकर्मप्रच्युतिरासीत्सेदित्यत्र का
र्यलिंगकमनुमानं प्रमाणयतीति तस्मादिति। वागादीनां श्रमव्रतत्वनिर्द्धारणार्थंनिंतर्यमथ
त्रावार्थः। प्राजापत्ये प्राणेमस्कृत्यस्तत्वाभावे कार्यलिंगकमनुमानं सूचयतीते तेनेति प्र
वर्ततेति प्रवर्तते प्राण इति संबन्धस्तथापि कथं प्राणस्यैव व्रतं धार्यमित्यपेक्षायामाह ता
नीति। ज्ञानार्थमनुसंधानप्रकारमेवदर्शयत्यथमिति। तस्य श्रेष्ठत्वे फलितमाह तं ते
ति। इतिशब्दं व्याकरोत्येवं निनिश्चित्येति अस्माकं वागादीनां व्रतानि स्तोऽवारिणाय
नपर्याप्तानीति त्रि[illegible] दधिरे प्राणव्रतमेवेति संबंधः। प्राणरूपत्वमुक्ता करणानां

तन्नामत्वमाह यस्मादितायस्मादित्यस्यतस्मादितिव्यवहितेन संबंधः आपारूपं चलना
त्मत्वमिति कुतोनिश्चियते तत्राह नहीति तर्हि करणेषु प्रकाशात्मत्वमित्याशंक्याह चलने
ति। संप्रति विद्याफलमाह य एवमिति तदेवस्य एयति यास्मिन्निति तपतिस्तत्यसुतात स्या
वंन्रास्तापत्यः। कस्येदंफलमित्याकांक्षे सर्वोक्तमेव स्फुरयति य एवमित्यादिना। नकेवलं विद्या
या यथोक्तमेव फलं किंतु फलांतरमप्यस्तीत्याह किंचेति। आपा विदासरु स्पर्शन कर्तव्येति
भावः। इत्यध्यात्ममित्यस्यानर्थक्यमाशंक्याहेत्येवमिति आध्यात्मकं दर्शनमुक्त्वाऽधिदैव
कं दर्शनं वक्तुमनंतरं वाक्यमवतारयत्सयेति। तर्हि ज्वलिष्यामीत्यादि किमर्थमित्याशं
क्याऽकस्येति। वदिष्यामीत्यादावुक्तं व्याख्यानमिहापि द्रष्टव्यमित्याहाध्यात्मवदिति। २४१
यथा दैवतं स्वं स्वं देवताव्यापारमनतिक्रम्यान्या देवता विद्युदाद्या दध्रिरे धृतमित्य
र्थः। स यथेत्यादि व्याचष्टे अध्यात्ममिति वायुरपि मत्कृतानां स्वकर्मणो न प्रच्यावितइति

स्वेन क्रमु व्रतेनाभग्नव्रत इति शेषः। तदेव साधयति म्लोचंतीति ब्राह्मणोक्तमर्थमुपसंहर
त्येवमिति ब्राह्मणार्थदार्ढ्यार्थं मंत्रवतार्य व्याकरोति यतश्चेत्यादिना सूर्योऽधिदैवमुदयकाले
वायोरुद्गच्छति। तत्र चापरस्यां ध्यासमयेऽस्तं गच्छतीति स एव चाध्यात्मं प्रबोधसमये चक्षु
रात्मना प्राणादुदेति पुरुषस्य स्वापसमये च तस्मिन्नेवास्तं गच्छतीति यतश्चेत्यादेर्वि
भागः। श्लोकस्योत्तरार्धं प्राणादित्यादि ब्राह्मणव्यवहितं श्लोके पूर्णताज्ञापनार्थं प्रथ
मं व्याचष्टे तं देवा इति। साधारणस्य प्रकृतत्वात्सामान्येन विशेषं लक्षयित्वाह
धृतवंत इति स एवेति धर्मपरामर्शः तत्रेति। सतिसप्तमी। संहरणं मंत्रमधिकरोति। इ
मं मंत्रमिति पूर्वोक्तिः। उत्तरार्धस्य ब्राह्मणमाकांक्षापूर्वकमुत्थाप्य व्याचष्टे तमि
त्यादिना तेरभग्नत्वेन मीमांसितं तेऽनुगच्छति। सर्थः। विशेषणस्यार्थवत्वं साधयति
यत्विति। उक्तं हेतुमग्निरहस्यमाश्रित्य विशदयति। अथेति। यथात्रैतत्कपमार्थ्यथराद्वः

295

बृ·अ·१

अनुगच्छतीत्यागम्यतीत्येतत्। वायुमनुत्यदधीन एव तस्मिन्काले उदासस्तमेति उद्वासाद
स्तंगत इत्यर्थः। इति शब्दोऽग्निरहस्यवाक्यसमाप्त्यर्थः। अध्यात्मं प्राणव्रतमधिदैवं च वा
युव्रतमित्येकमेव व्रतेषु पश्चितीति मंत्रब्राह्मणाभ्यां प्रतिपाद्य तस्मादित्यादिवाक्यं चष्टे यस्मादि
ति। न हि वागाद्योऽग्न्यादयो वा परिस्पंदविरहिणः स्थातुमर्हंतीति तेन प्राणादिव्रतं तैरनुवर्त्ति
तमेवेत्यर्थः। एकमेवेति नियमे प्राणव्यापारस्याप्यग्नत्वे हेतुमाह नहीति तदनुपरमे पलित
माह तस्मादिति। ननु प्राणनाद्यभावे जीवनासंभवात्तस्यार्थिकत्वात्तदनुष्ठानं न विधे
यमित्याशंक्यैवकारलभ्यं नियमं दर्शयति हित्वेति। नेत्यादिवाक्यस्याक्षरार्थमुक्त्वा
तात्पर्यार्थपसंहरति। प्राणव्रतस्य सकृदनुष्ठानमाशंक्य सर्वेंद्रियव्यापारनिवृत्तिरू
पं संन्याससमाचरणमनुवर्त्तते यदि स्याह यदीति विपक्षे दोषमाह यदिहीति प्राणा
दिपरिस्पंदपरिहारार्थं नियमं निगमयति तस्मादिति विद्याफलं वक्तुं भूमिकां करोति ते

मि

१५०

नेति व्रतमेव विशिनष्टि प्राप्नोतीति प्रतिपत्तिमेव प्रकटयति सर्वं पश्यतेष्विति संप्रति विद्याफलं क
थयत्येवमिति। कथमेकस्मिन्नेव विज्ञाने फलविकल्पः स्यादित्याशंक्य विज्ञानप्रकर्षापेक्षं
सायुज्यं तानि कर्मापेक्षं च सालोक्यमित्याह विज्ञानेति। ब्राह्मणं। प्रपंचितस्याविद्याकार्य
स्य संक्षेपेणोपसंहारार्थं ब्राह्मणांतरमवतारयति यदेतदिति फलमपि ज्ञानकर्मणो
रुत्कर्षविशेषवत् यदेतत् प्रस्तुतमिति संबंधः। अव्याकृतप्रक्रियायामुक्तं स्मारयति
याद्वेति। व्याकृताव्याकृतस्य जगतः संगृहीतं रूपमाह सर्वमिति। वाङ्मनः प्राणाख्यं त्रय
मिति न्नांकांप्रत्याह किं तदित्यादिना। किमर्थः पुनरयमुपसंहार इत्याशंक्याह नात्मैवेति।
आत्मनो बाह्यार्थमाह यत्स्याक्षादिति। अनात्मत्वेन जगतो हेयत्वं तच्छब्देन परामृश्यते वैराग्य
मपि किमर्थमित्याशंक्याह नहीति। अविरक्तो हि कुतूहलितया तत्राधिकारी स्यादित्याशंक्या
ह कार्येति। अनात्मप्रमाणमप्यात्मानं प्रत्याययिष्यत्यात्मनः सर्वात्मकत्वात्कुतो विरोध इत्या

शंकामाह तथेति। कथं तर्हि प्रत्यगात्मधीस्तत्राह कश्चिदिति। उपसंहारस्येत्थं सफलत्वेपि सर्वस्य
जगतो नामादिमात्रत्वं प्रमाणाभावादयुक्तमिति शंकते कथमिति। अनुमानैः संभावनां द
र्शयन्नेति। तत्र तत्कार्यहेतुकमनुमानमाह तेषामिति। वागित्येतदुत्थामिति संबंधः। इंद्रिय
व्यावृत्त्यर्थं वाक्यार्थमाह नामेति। स्वगृहीतमर्थं विवृणोति यः कश्चेत्यादिना। उक्तमुपपादयि
तुकाममुत्तरवाक्यमित्याह तदाहेति। कार्यकारणभावे विकिमायातमत आह कार्यं चेति। सर्वे
त्व नामविशेषास्तन्मात्रत्वात्तेनापि गृह्यंते तत्कार्यत्वात् यद्यत्कार्यं तत्तत्तेनापि गृह्यते यथा मृदो
घटः इत्यर्थः। सर्वे नामविशेषाः सामान्ये कल्पिताः प्रत्येकं तदनुविद्धत्वाद्यदिदं येनानुविद्धं स
र्पादिवदित्यनुमानांतरमाह तथेति। कार्याणां कारणेंतर्भाववदिति यावत्। उक्तमेव प्रश्नपूर्व
कं प्रपंचयति कथमित्यादिना। सामान्यं साधयत्येतद्धीति। एतस्य नामविशेषा नाममात्रं त ५१
र्विंतीत्याह किंचेति। नामविशेषाणां नाममात्रादात्मलाभात्तस्मादविशेषात्तत्रैवांतर्भावं इ

त्यक्तसार्थः। सर्वे नामविशेषास्तत्सामान्यान्नापृथग्वस्तुतः संति ते नाम्रवस्त्वात्मा घेयेवात्म
वं तस्ते ततोन्ये वस्तुतो न संति यथा मृदात्मवंतो घटादयो वस्तुतस्ततोन्ये न संतीत्यनुमा
नै व्याप्तिं साधयति। यस्य चेति हेतुसमर्थनार्थमुत्तरवाक्यमुत्थापयति कथमित्यादिना। अ
तः शब्दमात्रात्तद्विशेषाणामात्मलाभोपभवतीति शेषः। तत्रैव युक्तिमाह ततो हीति तत्रैव वा
क्यमभ्युपगतार्थव्याप्त्या च एतदित्यादिना लक्ष्मात्तस्मात्तन्मात्रात्तद्विशेषाणामात्मलाभ इति वाक्य
शेषः। प्रथमकंडिकयासिद्धमर्थमुपसंहरत्येवमिमिति उपपत्तित्रयमुत्तरवाक्यद्वयेपि तुल्य
मित्यादिना तेन चमुत्तरयोरिति। तत्र व्याख्यानसापेक्षाणि पदानि व्याकरोति। अथेत्यादिना
नामव्याख्यानानंतर्यमर्थः शब्दार्थः वक्तुरुक्तमिति संबंधः। चक्षुरिति चक्षुःशब्दाभिधेयं
चक्षुर्विषयसामान्यमभिधीयते तच्च रूपसामान्यं तदपि प्रकृतरूपमात्रमिति योजना। रूप
प्रकरणानंतर्यमिथेत्युच्यते क्रियाविशेषाणां क्रियामात्रेऽन्तर्भावं प्रश्नद्वारा स्फोरयति। क

299

बृ॰ आ॰ २ थमित्यादिना। आत्मशब्देनात्र शरीरनिर्वर्त्यकर्मग्रहणे पुरुषविधब्राह्मणशेषमनुकूलय
ति। आत्मना हीति। तत्रैवोपपत्तिमाह शरीरे चेति। तथापि कथमात्मशब्देनात्र शरीरनिर्वर्त्यं कि
र्म क्रियादिसामान्यं तल्लक्षणयेत्याहान इति संक्षेपस्यापि संक्षेपांतरमाह तदेतदिति। तदेत
त्त्रयं त्रिदंडविष्टम्भवत्संहतं तदेकमिति संबंधः। कथं संहतत्वमत आहेतराश्रयमिति। रू
पं विषयमाश्रित्य नामकर्मणी सिध्यतः स्वातंत्र्येण निर्विषययोस्तयोः सिद्ध्यदर्शनान्नाम
कर्मणी वाश्रित्य रूपं सिध्यति न हि ते हित्वा किंचिदुत्पद्यत इतरथा वा वाचकेन वाच्यस्य तेने
तरस्य ताभ्यां च क्रियायास्तयालयोरपेक्षादर्शनादन्योन्यमस्ति व्यंजकत्वमाहेतरेत
रेति। सति नाम्नि रूपसंहारदर्शनाद्रूपे च सति नामसंहारदृष्टेः सतोश्च तयोः कर्मण्यस्त
स्मिंश्च सति तयोरुपसंहारोपलंभादितरेतरप्रलयमित्याहेतरेतरप्रलयमिति। त्रया
याणामेकत्वं विरुद्धमिति शंकित्वा परिहरति। एकेनेत्यादिना। कथं कार्यकरणसंघातात्मना १५२

300

त्रयाणामेकत्वं तत्राह तथेति। नामरूपकर्मणां कार्यकारणसंघातमात्रत्वेपि ततो व्यतिरिक्तं सं
घातादन्यत्स्यादित्याशंक्याहैतावदिति। नामादित्रयस्य संघातमात्रत्वे कथं व्यवहारास्पदं का
र्यमित्याशंक्याहात्मेति संघातोयमात्मशब्दितः स्वयमेकोपि सन्नध्यात्मादिभेदेन स्थितः
त्रयमेव भवतीति व्यवहारास्पदं कार्यमित्यर्थः। एकस्मिन्नपि संघाते कार्यकरणरूपेणावां
तरविभागमाह तदेतदिति। आत्मभूतस्य तस्योपाधित्वेन स्थित इति यावत्। अविनाशी
स्थूलदेहे गच्छत्यपि यावन्मोक्षं न गच्छतीत्यर्थः। एकस्मिन्नपि संघाते कार्यकरणरूपेणा
वांतरविभागमाह तदेतदिति। आत्मभूतस्य तस्योपाधित्वेन स्थित इति यावत्। अविनाशी
स्थूलदेहे गच्छत्यपि यावन्मोक्षं न गच्छतीत्यर्थः। सच्चत्यच्च सत्यं भूतपंचकं तदात्मकेनामरू
पे इत्याह नामेति करणयाप्यात्मा कथ्यत इति क्रियात्मकत्वेति। पंचीकृतपंचमहाभूतात्म
तत्कार्यं सर्वं सच्चत्यच्चेति व्युत्पत्तेः सत्यं वै राजन्शरीरं कार्यमपंचीकृतपंचमहाभूतत

त्कार्यात्मककरणरूपस्य तद्द्वारा लिंगस्य सूत्रात्मकस्यायतनं तस्यैवावच्छेदकं तत्सर्वं सवत्वना
त्मापि स्थूलदेहच्छन्नत्वात् दुर्विज्ञानं तेनापि छन्नं प्रत्यग्वस्तु सुतरामिति तदुक्तानेऽ
व हि तैर्वाच्यमिति भावः। इदानीमविद्याकार्यप्रपंचमुपसंहरत्येतदिति। एवं विद्या
विषयविवरणस्य वक्ष्यमाणोपयोगमुपसंहरत्यत इति प्रपंचितेत्यत्र विद्याविषयेत
तो विरक्तस्यात्मानं विविदुषोस्तज्ज्ञापनार्थं चतुर्थप्रमुखः संदर्भो भविष्यति तस्मा
दविद्याविषयविवरणमुपयोगीति भावः॥ ॥छ॥ ॥इति श्रीमत्परमहंसपरिव्रा
जकाचार्यश्रीशुद्धानंदपूज्यपादशिष्येण भगवदानंदज्ञानेन कृतायां बृहदारण्यक
भाष्यतात्पर्यटीकायां तृतीयोऽध्यायः॥ ॥३॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥श्रीः ॥श्रीः ॥श्रीः ॥श्रीः ॥श्रीः ॥श्री ॥श्रीः ॥श्रीः

KKSU LIBRARY
RAMTEK
441 106
M.1495
Dist Nagpur

```
[OrderDescription]
,CREATED=04.09.20 16:36
,TRANSFERRED=2020/09/07 at 10:55:59
,PAGES=302
,TYPE=STD
,NAME=S0003588
,Book Name=M-1495-BRIHDARNYAK BHASHYATATPARY TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
```

```
FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
```

```
FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
```

```
FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
```

```
FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
```

```
FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
```

```
FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
```

```
FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
```

```
FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
```

FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF

```
FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,
```